तत्र्यम्बकशेवडेविरचिता

स्तवमञ्जूषा

B
638
/ST
07804

JACL-KRC
007804

रभारती प्रकाशन

वाराणसी

12.2L

7804

7804

SV-2024

12.2L

Phone : 236391
Chaukhamba Sanskrit Pratishthan,
P. B. No. 2113,
38, U.A., Jawahar Nagar, Bungalow Road,
DELHI-110007.

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
८७

महाकवि-वसन्तत्र्यम्बकशेवडे-विरचिता

स्तवमञ्जूषा

भूमिका-लेखकः—

आचार्य शेषराजशर्मा 'रेग्मीः'

सम्पादकः—

डॉ० ब्रह्मानन्द त्रिपाठी

साहित्याचार्यः, आयुर्वेदाचार्यः

एम. ए., पी-एच. डी., डी. एस-सी. ए.

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक—

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

सर्वाधिकार प्रकाशकाधीन

प्रथम संस्करण १९८५

मूल्य २५–००

अन्य प्राप्तिस्थान—

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., जवाहरनगर, बंगलो रोड

दिल्ली ११०००७

दूरभाष : २३६३९१

*

प्रधान वितरक—

चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ६३०७६

JACL-KRC

007804

मुद्रक—

ती मुद्रणालय

वाराणसी

THE

CHAUKHAMBA SURBHARATI GRANTHAMALA

87

STAVAMAÑJŪṢĀ

OF

VASANTA TRIMBAKA ŚEVAḌE

Introduction by

Acharya Shesharaja Sharma 'Regmi'

Edited by

Dr. Brahmananda Tripathi

Sahityacharya, Ayurvedacharya

M. A., Ph. D., D. Sc. A.

CHAUKHAMBA SURBHARATI PRAKASHAN

VARANASI

© CHAUKHAMBA SURBHARATI PRAKASHAN
(*Oriental Publishers & Distributors*)
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001

First Edition
1985

Also can be had of
CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U. A., Jawaharnagar, Bungalow Road
DELHI 110007
Telephone : 236391

*

Sole Distributors
CHOWKHAMBA VIDYABHAWAN
CHOWK (Behind The Benares State Bank Building)
Post Box No. 1069
VARANASI 221001
Telephone : 63076



महाकविः वसन्तत्र्यम्बकशेवडे

निवेदनम्

स्तवानां मञ्जूषां नगपतिसुताया निरुपमां
नवीनां निर्माय प्रणिहितमतिर्मुद्रणविधौ ।
वसन्तोऽयं भक्तिप्रवणहृदयान् काव्यरसिकान्
विना गर्वं सर्वान् मुकुलितकरो विज्ञपयति ॥ १ ॥

साहित्यशास्त्रे निपुणा भवन्तः शब्दार्थशुद्धौ निकषायमाणाः ।
इमां मदीयां रचनां स्तवानां कृपाकटाक्षैः सकृदाद्रियन्ताम् ॥ २ ॥

निर्गुणं किमपि नाऽस्ति भूतले नैव किञ्चिदपि दोषवर्जितम् ।
बोभवीति गुणदोषयोः सदा साहचर्यमितरेतराश्रयम् ॥ ३ ॥

परिहृत्य कण्टकचयं यथा जनाः स्थलपङ्कजं सुरभिगन्धि चिन्वते ।
अपहाय दोषनिकरं तथा बुधाः सदया गुणग्रहणमत्र तन्वताम् ॥ ४ ॥

स्वादुकाव्यरसमिश्रमुत्तमं दुश्चिकित्सभवरोगनाशनम् ।
अम्बिकास्तुतिमयं रसायनं सेव्यतामिदमहर्निशं बुधैः ॥ ५ ॥

अभिनवां नगराजसुतास्तुतिं विरचितां ललितैर्वचनैर्मया ।
सहृदयाः परिशील्य मम श्रमं सफलयन्तु विपश्चिदपश्चिमाः ॥ ६ ॥

प्रेष्ठः सुतः परमदुर्ललितो भवान्या माहेश्वरः स वरिवर्ति कविर्वसन्तः ।
यः कालिदासपदवीमनुवर्तमानो वैदर्भरीतिमुदजीवयदस्तकल्पाम् ॥ ७ ॥

आदाय जह्नुतनयासलिलात् प्रसादं
पीयूषतो मधुरतां मृदुतां शिरीषात् ।
ओजोगुणं दिनमणेः शशिनश्च कान्तिं
काव्यं परिस्फुरति यस्य गुणैरनूनम् ॥ ८ ॥

राज्ञां सभासु शतशः कवयो बभूवुः शृङ्गारगर्भवचसां रचनासु दक्षाः ।
एकः सभाकविरयं जगदम्बिकाया वैदग्ध्यमावहति भक्तिरसे वसन्तः ॥ ९ ॥

शृङ्गारवीरकरुणादिरसाः समस्ताः
सम्भावनां कविजने नितरां दधानाः ।
नार्हन्ति किञ्चिदपि भक्तिरसस्य साम्यं
देवा यथा भगवतः प्रमथाधिपस्य ॥ १० ॥

अष्टौ रसान् मुनिवरो भरतो जगाद
शान्ताधिकान् नवरसान् कतिचिद् ब्रुवन्ति ।

भोजश्चतुर्दशरसान् स्वमतानभाणी-
देकं रसं जगति भक्तिरसं वदामः ॥ ११ ॥

देवेषु शम्भुरिव सूर्य इव ग्रहेषु
शेषो यथा फणिषु पक्षिषु वैनतेयः ।
सिंहो मृगादिषु कविष्विव कालिदासः
सर्वङ्कषो जयति भक्तिरसो रसेषु ॥ १२ ॥

कविपदमतिदुर्लभं जगत्यामिह समवाप्य महेश्वरप्रसादात् ।
व्यतनुत रचनामिमां स्तवानां विजितसुधारसमाधुरीं वसन्तः ॥ १३ ॥

यदि नगतनयास्तवानुरागो यदि कवितारसरीतिलोलुपत्वम् ।
अवहितमनसस्तदा गुणज्ञाः श्रृणुत वसन्तकवेर्गिरां विलासम् ॥ १४ ॥

वैदर्भरीतिमनुसृत्य विनिर्मितेयं
स्तोत्रावली ललितमञ्जुलसन्निवेशा ।
माला यथा विकसितैः कुसुमैर्निबद्धा
प्रीणातु विश्वजननीं गिरिराजकन्याम् ॥ १५ ॥

शैलात्मजायाश्चरणारविन्दं सर्वस्वभूतं शरणं यदीयम् ।
निमित्तमात्रं स इह स्तवानां मञ्जूषिकायामभवद् वसन्तः ॥ १६ ॥

परिस्फुरद्भक्तिरसप्रकर्षं निर्माय काव्यत्रितयं वसन्तः ।
उपासनां श्रीजगदाम्बिकायास्त्रिकालयोग्यां त्रिविधामकार्षीत् ॥ १७ ॥

छायेव या मूर्तिमती सदैव पुत्रस्य मे सन्निधिमादधाति ।
अनेन काव्यत्रितयेन यायाद् विश्वेश्वरी सा जननी प्रमोदम् ॥ १८ ॥

जीयाज्जगत्त्रयपतिर्भगवान् महेशो
जीयादशेषजननी नगराजकन्या ।
जीयात् सुधासहचरी रचना स्तवानां
जीयाच्चिराय शिवभागवतो वसन्तः ॥ १९ ॥

वाराणस्यां विहितवसतिः स्नेहपात्रं भवान्याः
कारुण्याब्धेस्त्रिपुरजयिनो गर्भदासो वसन्तः ।
कृत्वा मातुः स्तवनरचनां मुद्रयित्वा च यत्नाद्
भक्त्या तस्याः पदकमलयोः सादरं सन्दधाति ॥ २० ॥

वसन्तत्र्यम्बकशेवडे

भूमिका

अद्‍भुतपदार्थनिशामनप्रसूतः सप्रसादमानसतो भावोद्रेकः कवित्वम् । तच्चाऽनाकरजन्ममनर्घ्यं रत्नम् ।

श्रद्धापरिपूताऽन्तःकरणेन केनचित् सहृदयविचक्षणेन कस्यचिच्छ्रद्धेयस्य गुणगणवर्णनं स्तवः । स च स्तोत्रं स्तुतिर्नुतिश्चेत्यनेकैः पर्यायवाचकपदैः प्रतिपाद्यत इत्ययं तस्य संस्तवः । अपौरुषेयवाक्यरूपाद् वेदादारभ्य लोकेऽप्यस्य भूयसा प्रयोगयोगः समुपलभ्यते । यत उभयत्राराध्यमानस्यालौकिकगुणगण-भूयिष्ठस्य देवादेः स्तवः प्रकाशपदमुपगच्छति । अर्चा द्विविधोपकरणनिकुर-म्बेन साध्यमानैका, आराध्यमानस्य गुणगणवर्णनेन प्रतिपाद्यमाना द्वितीया । सेयं द्वितीयाऽप्याभ्यन्तरभावजनितत्वात् प्रकृष्टकोटिमाटीकितत्वेनाऽद्वितीया । सहऽजातोऽकृत्त्रिमा । प्रथमा बाह्यपदार्थाऽपेक्षकत्वेन कृत्त्रिमा । तत्र प्रथमाऽर्चा श्रेयस्यप्युपचारप्रयोगे न्यूनाधिक्यभावेन पदे पदेऽप्याशङ्कितप्रत्यवाया । द्वितीया तु प्रत्यवायिसाध्वसराहित्येन श्रेष्ठा । सेयमर्चा वाङ्मयी ।

सुरसरस्वतीवाङ्मये सौरभाऽतिशयसमन्वितानां स्तवस्तवकानां संख्या विपुला राराज्यतेतरां सुतराम् । तत्र मद्दर्शनश्रवणपथपथिकान् कांश्चित्स्तवगुच्छा-न्देशकालविभागादीनुपेक्ष्य केवलं गुणगणविश्रुतिं समपेक्ष्योद्दिशामि ।

(१) वशिन्यादिवाग्देवीरचितं सुललितं ललितासहस्रनामस्तोत्रम् । तत्र तन्त्रभास्कर-भास्कररायस्य भाष्यमस्ति । (२) कामेश्वरी-कामेश्वर-कलिता ललितात्रिशती । (३) महर्षिदुर्वासो विरचितः श्रीविद्यास्तवः । (४) उपमन्युकृतो भगवच्छङ्करस्तवः । (५) भगवत्पादगौडपादविरचितः सुभगोदयः । (६-७) भगवत्पादशङ्कराचार्य-प्रणीताऽऽनन्दलहरी सौन्दर्य-लहरी च । तत्र चरमायाः स्तुतेर्विद्वद्वरलक्ष्मीधरकृता परमा विवृतिः । विद्व-द्वृन्दसमुपासितो महिम्नः स्तवः । यत्र मधुसूदनसरस्वतीचरण-विरचिता हरिहरवर्णनात्मिका व्याख्या शोभते । (९) कालिदासकलिता नवरत्नमाला-स्तुतिः । (१०) भीष्मनिर्दिष्टं श्रीविष्णुसहस्रनामस्तोत्रं, यत्र भगवत्पाद-शङ्कराचार्यकृतं भाष्यम् । (११) श्रीगणेशोपदिष्टं गणेशसहस्रनामस्तोत्रम् । (१२) आथर्वणरहस्यस्थं प्रशस्यं लक्ष्मीनारायणहृदयम् । (१३) राजकुल-शेखरेण कुलशेखरेण रचिता मुकुन्दमाला । (१४) मूककविकृता मूकपञ्च-शती वा देवीपञ्चशती । (१५) उद्भटकविवरबाणभट्टकृतं चण्डीशतकम् । (१६) महाकविरत्नाकरनिर्मिता गौरीशङ्करयोरुक्तिप्रत्युक्तिमयी वक्रोक्त्य-लङ्काराऽलङ्कृता वक्रोक्तिपञ्चाशिका । (१७) अलङ्कारशास्त्राचार्येणाऽऽ-नन्दवर्द्धनाचार्येण प्रणीतं देवीशतकम् । (१८) साम्बकविनिर्मिता सूर्यवर्णन-

प्रकाशिका साम्बपञ्चाशिका। (१९) लीलाशुकाऽपरपर्यायेण विल्वमङ्गलेन प्रणीतं कृष्णकर्णामृतं वा कृष्णलीलाऽमृतम्। (२०) विद्वद्वरजगद्धरभट्टकृतः स्तुतिकुसुमाऽञ्जलिः। स्तवग्रन्थेषु सर्वेषु महत्तम उत्तमतमश्च। अत्राऽनेकैः प्रकरणैर्भगवच्छङ्करस्य परमरमणीयान्येकोनचत्वारिंशत्सङ्ख्यकस्तोत्राणि विलसन्ति। ग्रन्थोऽयं महाकाव्यसादृश्यं विभर्ति। (२१) अभिरूपप्रवररूपगोस्वामिस्वामिका पद्यावलिः, अत्र भगवत्कृष्णविषयाण्युमापतिधर-जयदेव-शरणदेव-श्रुतिधर-कविप्रवरकविराज-लक्ष्मणसेनकर्तृकाणि निरवद्यानि पद्यानि विद्योतन्तेतराम्। (२२) वेङ्कटाऽध्वरिरचितं लक्ष्मीसहस्रनामकं बृहत्कायं स्तवकाव्यम्। अत्र पञ्चविंशतिसङ्ख्यकाः स्तवाः। (२३) काव्यालङ्कारिकसमाजे विराजमानेन पण्डितराज-जगन्नाथेन कीर्तिता गङ्गालहरी। इयं द्वापञ्चाशत्सङ्ख्यकाशिखरिणीच्छन्दोभिः प्रशंसाशिखरमारूढा, प्रसादमाधुर्यगुणभूयिष्ठा श्रेष्ठा प्रेष्ठा च।

स्तवसङ्ख्यायां नेयं परिसङ्ख्या, मतिपथोपात्तानां केषाञ्चिदेव स्तवस्तवकानां मालेयं समुपगुम्फिता।

एषु पूर्वनिर्दिष्टेषु स्तवप्रबन्धेषु शेवडेकुलललामभूतैर्विद्वद्वरपरममाहेश्वरैर्महाकविवसन्तत्र्यम्बकमहोदयैर्विरचितेयं स्तवमञ्जूषा चरमाऽपि वैदुष्य-पराभक्ति-काव्यगुणसम्पत्तिभूयिष्ठतया परमा देदीप्यतेतरां सुतराम्। अस्या उद्घाटनाऽन्तरमारम्भ-मुखादिशीर्षकैर्बहुभिः प्रचुराः स्तवाः समासाद्यन्ते। इतः पूर्वं महाकविमहोदयैः कवित्वाऽलङ्कृतं ग्रन्थषट्कं निर्मितम्। ते च ग्रन्था यथा—(१) रघुनाथतार्किकशिरोमणिचरितम्। (२) वृत्तमञ्जरी। (३) विन्ध्यवासिनी विजयमहाकाव्यम्। (४) शुम्भवधमहाकाव्यम्। (५) श्रीकृष्णचरितम्। (६) श्रीमोतीबाबा-जामदार-चरितम्।

पूर्वोक्तेषु विन्ध्यवासिनीविजयमहाकाव्यं शुम्भवधमहाकाव्यं च सुश्राव्यकाव्यमाधुर्येण विद्वन्निवहेन वहुशः प्रशंसितम्। शेवडेमहाकवीनां प्रायः सर्वा अपि रचनाः प्रसादमाधुर्यगुणैरलङ्कार-रस-ध्वनिभिः वैदर्भ्या रीत्या च परिपूरिताः। प्रभूतसदनुभूतविषयचयकल्पनाकुशलानां प्रतिभाभास्वरमतिमतां श्रीमतां काव्यं कीदृशं श्रुतिमनोहरं लोकोत्तरं सुश्राव्यमास्वाद्यं स्यादिति पारेधिषणम्।

सविशेषनवनवोन्मेषशालिनी प्रतिभा, नानाविधसदागमसदागमविभूषिता धिषणा तदुपर्यैकान्तिकभगवद्भक्तिसभाजितैकतानता यत्रैतत्त्रितयं विलसति तादृशस्य भक्तिकाव्यस्य लोकोत्तरत्वेन को नाम सहृदयः स्वहृदये परमानन्दसन्दोहं नाऽनुविन्दति? एतद्विधे हि विषये "मधुरं हि पयः स्वभावतो ननु कीदृक्सितशर्कराऽन्वितम्।" इयमुक्तिश्चरिताऽर्था बोभवीति। सर्वतन्त्राऽपरतन्त्राणां कवितावनितास्वयंवृतानां नानाविधलौकिकविषयजाते शास्त्रपरिष्कृत-

सिद्धान्तव्राते च समानाऽधिकाराणामेषां महाकवीनां प्रायः सर्वा अपि रचना अनिर्वचनीयतां प्राप्तवन्तीत्यत्र न कस्याऽपि विसंवादः। एतादृशे विकराले कलिकाले धर्ममर्यादाहीने राष्ट्र उच्छृङ्खलसमाजेऽपि सुरसरस्वतीसेवन-सदाचारपरायणानामेतादृशानां महाभागानां प्रादुर्भावः कस्य सचेतसश्चेतांसि हर्षपरवशं न विदधाति ?

साम्प्रतमहं स्थालीपुलाकन्यायेन तद्रचनातः कानिचिन्मधुरमनोहरस्थलानि निर्दिशामि।

आरम्भस्तव आरम्भपद्यमिदं कीदृशं हृद्यं निरवद्यं च—

सदयं हृदये गले सुनीलं धवलं वर्ष्मणि लोहितं कपर्दे।
नयने विषमं प्रियं शिवायाः किमपि स्यादभिवृद्धये महो नः ॥ पृ० १ ॥

—अत्र भगवतः शिवस्य प्रतिप्रतीके भगवत्याः शिवायाः प्रीतिजनकता कियता कौशलेन महाकविना प्रत्यपादि।

कादम्बिनी काचन मेचकाभा मदन्तरङ्गाऽम्बरचुम्बिनी स्यात्।
संसारदावाऽनलपीडितानां स्मृताऽपि या तापमपाकरोति ॥ पृ० १ ॥

—अत्र शिवायां मेघमालात्वरूपणाऽर्थमन्तरङ्गेऽम्बरस्य संसारे दावाऽनलत्वस्यारोपणादश्लिष्टशब्दनिबन्धनं केवलपरम्परितरूपकम्, एवं च तापाऽपनोदने कादम्बिन्याः सेवनं विना केवलस्य स्मरणस्य हेतुत्वाद् व्यतिरेकोऽनयोः संसृष्टचा कविनिष्ठभगवतीभक्तिविषयकवस्तुनो व्यञ्जनादलङ्कारेण वस्तुध्वनिः।

स्वकान्त्या यः प्रत्यादिशति नवनीलोत्पलचयं,
भ्रमद्भृङ्गालीनां कलयति च शोभामविकलाम्।
पदं स्वीयं धत्ते विबुधनिबहो यस्य कृपया
कटाक्षो मां मातस्तव पदनतं पातु स चिरम् ॥ पृ० १७ ॥

—अत्र प्रथमचरणे प्रतीपाऽलङ्कारो द्वितीये निदर्शना, तृतीय चरणे विबुधानां स्वपदाधाने देवीकटाक्षरूपपदस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गं चाऽलङ्कारत्रयस्य निरपेक्षरूपेण स्थितेः संसृष्टिरतो देवीभक्तिरूपवस्तुनो व्यञ्जनाद् अलङ्कारेण वस्तुध्वनिः।

स्मारं स्मारं तावकीनं पदाब्जं वारं वारं कीर्तनं त्वद्गुणानाम्।
हारं हारं सूक्तिरत्नं गुरूणां वारं वारं सौख्यसिन्धुं वगाहे ॥ पृ० २५॥

—अत्रत्यः शब्दाऽनुप्रासप्रकर्षश्चेतोहरः।

त्वदीयं सौन्दर्यं प्रभवति न वक्तुं फणिपति-
र्न साक्षाद् वाग्देवी श्रवणसुभगालापकुशला।
इतः किं वा ब्रूमः सकलयतिनाथः स्मररिपु-
र्यदेतेनाकृष्टो लुठति तव पादाऽम्बुजतले ॥ पृ० ४१ ॥

—अत्र शङ्करस्य देवीपादाम्बुजतले लुठने देव्याः सौन्दर्यरूपपदस्य हेतुत्वा-त्पदार्थहेतुकं काव्यलिङ्गं तथा चाऽलङ्कारेण भक्तनिष्ठभगवतीभक्तिरूपवस्तुनो-व्यञ्जनाद् भावध्वनिः ।

या त्वं सुधाकरमुखी परमाणुमध्या
भास्वद्रदा सकलयौवतमौलिमाला ।
तस्याः सुतस्तव महेश्वरि ! वक्रतुण्डो
लम्बोदरः पुनरयं कथमेकदन्तः ॥ पृ० ४७ ॥

—अत्र परिहासस्तवे प्रथमचरण उपमाद्वयं, देव्यां यौवतमौलिमालात्वेन रूपणाद्रूपकं, विरूपयोः सङ्घटनाद्विषमं चेत्यलङ्कारचतुष्टयस्य मिथोऽनपेक्षया स्थितेः संसृष्टिश्च ।

सत्यां त्वयि त्रिभुवनेश्वरि ! शर्मदायां
क्षोणीपतिं कमपि नैव सभाजयामः ।
त्यक्त्वा निलिम्पतटिनीं निकटे वहन्तीं
किं मन्दधीरपि निपानमुदाश्रयेत ॥ पृ० ४९ ॥

—सत्यां देव्यां क्षोणीपतेः सभाजनं, गङ्गायां विद्यमानायां निपानाश्रयः, अत्र दृष्टान्ताऽलङ्कारः ।

त्वङ्कारगर्भवदनं सदनं मदस्य
कङ्कादिभक्ष्यमतनोन्महिषाऽसुरं या ।
पङ्काश्मराशिषु पदस्मरणं च यस्या-
ष्टङ्कात्मतां भजति तां नगजां नमामः ॥ पृ० ५९ ॥

—अत्र रूपकस्याऽनुप्रासाऽलङ्कारस्य च सम्मिश्रणं कस्य मानसं नानन्दयति ।

कुन्दपुष्पति दिगङ्गनाऽजिरे, सानुषु क्षितिभृतां हिमायते ।
स्वर्गसिन्धुसलिलेषु हंसति व्योमकेशदयिते ! भवद्यशः ॥ पृ० ७१ ॥

—अत्रैकस्यैव भगवतीयशोरूपस्योपमेयस्य कुन्दपुष्प-हिम-हंसरूपाणां बहूनामुपमानां सत्त्वान्मालोपमाऽलङ्कारः । अतो भगवतीभक्तिरूपवस्तुनो व्यञ्ज-नादलङ्कारेण वस्तुध्वनिः ।

न यमुना, न मनागपि नर्मदा, न सरयूर्न तथा सुरनिम्नगा ।
तव कथाऽमृतसिन्धुरनारतं हरति देवि ! यथा कलिकल्मषम् ॥ पृ० ७३ ॥

—अत्र देवीकथायाममृतसिन्धो रूपणाद्रूपकं तथा यमुनादीनामपेक्षया कलि-कल्मषध्वंसने देवीकथाऽमृतसिन्धोराधिक्यवर्णनाद् व्यतिरेकश्चेति द्वयोरलङ्कार-योर्मिथोऽनपेक्षया स्थितेः संसृष्टिः, देवीभक्तिरूपवस्तुनो व्यञ्जनादलङ्कारेण वस्तुध्वनिः ।

परिशिष्टं वक्तव्यम्

स्वच्छनूत्ननुतिराजिराजिता श्रीलपण्डितवसन्तसभाजिता ।
शोभना कृतिरियं सुधीव्रजे हारवद्विलसताद् गले सदा ॥ १ ॥
इत्थमेव सुरभारतीं सदाऽभ्यर्चयन्वुधगणं च रञ्जयन् ।
स्तादनामयतया महाकविर्जीवताच्च सततं शतं समाः ॥ २ ॥
विग्रहो मम रुजा च विग्रहं नेच्छतो विदधदस्ति सन्ततम् ।
अल्पशक्तिवशतः समासतः संस्तुतिर्लघुरियं प्रकाश्यते ॥ ३ ॥

सं० २०४२
सफलैकादशी
ब्रह्मघट्टः (वाराणसी)

शेषराजशर्मा रेग्मीः

महाकाव्यरचयितुः परिचयः

लोकोत्तरचरित्रवतां सतां विशेषविदुषां महाकविप्रभृतीनां च जन्म संसारिणां कस्मैचन श्रेयसे एव सम्भवति, एतादृशेष्वेव पुण्यचरितेष्वन्यतमं स्थानं वर्वर्ति महाकविशेवडेमहाभागस्य, विद्याशेवधिरयं महाराष्ट्रान्तर्गतसतारानगराभिजनः। नगरमिदं गो-ब्राह्मणप्रतिपालकस्य क्षत्रियकुलावतंसस्य च्छत्रपतिशिवाजीमहाराजस्य वंशजानां राजधानीरूपेण चिराद् विराजतेस्म। छत्रपते राजसभायां शेवडेकुलजाः सम्मानितपदमधिरूढा राजनीतिकुशलाश्चेति सुविदितम्। एकोनविंशतिशताब्द्याः प्रारम्भे परस्परकलहक्षीणबलं मराठासाम्राज्यं कथाशेषतां गतम्, अवशिष्टैराङ्ग्लशासकानां स्वामित्वं स्वीकृतम्।

१८४८ तमे ख्रिष्टाब्दे सर्वपश्चिमश्छत्रपतिः श्रीशाहजीमहाराज अप्पासाहेबमहोदयः स्वर्गतः। औरसपुत्रविरहितः अप्पासाहेबमहाभागः स्वराज्यसञ्चालनाय कमपि दत्तकपुत्रं क्रोडीचकार; किन्तु तदानीन्तनेन 'गवर्नरजनरल' पदे प्रतिष्ठितेन 'लार्डडलहौजी' पदाभिधेन स उत्तराधिकाराय न स्वीकृतः। एवं सताराराज्यं विपन्नम्। तदनु प्राप्तपाश्चात्यशिक्षः शेवडेमहोदयस्य पितामहो मध्यप्रदेशीये राजकीयविद्यालये प्रधानाध्यापकरूपेण नियुक्तः। तदानीं शेवडेवंशीयाः प्राचीनमध्यप्रदेशस्य सम्प्रति महाराष्ट्रान्तर्गतविदर्भदेशस्य निवासिनः समभवन्।

श्रीशेवडेतातपादः श्रीत्र्यम्बकलक्ष्मणशेवडेमहोदयो बी. ए., एल. एल. बी. उपाधिमधिगत्य अधिवक्तृपदञ्च समवाप्य प्रारम्भे अमरावतीनगर्यां पश्चाच्च नागपुरे व्यवहाराजीवकार्यं प्रारब्धवान्। स मेधावी प्रतिभासम्पन्नश्चासीत्। अतएव किञ्चित्कालान्तरं स महाधिवक्तृपदं (एडवोकेट-जनरल) तदनन्तरं न्यायमूर्ति-(हाईकोर्ट जज)-पदं च सादरं लब्धवान्। शेवडेमहोदयस्य मातुर्नाम आसीत् 'विमलाबाई'। इयं वाईनगरस्थे बखले कुले जन्म लेभे। शेवडेमहोदयस्य मातामहः श्रीसदाशिवरामचन्द्रबखलेमहाशयो मुम्बापुरीस्थ उच्चन्यायालये ख्यातनामा अधिवक्ता (एडवोकेट) आसीत्।

श्रीशेवडेमहोदयस्य जन्म मुम्बापुर्यां स्वकीयमातामहसदने अक्टूबरमासस्य द्वितीयतारिकायां १९१७ तमे ख्रिष्टाब्दे समभवत्। भवतः प्रारम्भिकमध्ययनम् अमरावत्यां तत्पश्चात्कालिकञ्च नागपुरे पूर्तिमगच्छत्, भवता नागपुरविश्वविद्यालयतः १९४१ ई० वर्षे एम. ए. परीक्षा ससम्मानं समुत्तीर्णा। भवतो मातृ-पितृकुलं संस्कृतानुरागि आसीत्। अतएव भवतोऽपि संस्कृतेऽनुरागः स्वाभाविक आसीत्। भवता प्राचीनपद्धत्या गुणौघगुरुभ्यः सद्गुरुभ्यः साहित्य-न्याय-व्याकरणप्रभृत्यनेकशास्त्राणां यथाविधि ज्ञानमधिगतं, येषां स्वाध्यायोऽद्यावधि सन्ततं प्रचलत्येव।

श्रीशेवडेमहाभागः प्रारम्भे मराठीभाषायां पद्यरचनां प्रारब्धवान्, कालान्तरे स एव नैकविधानि संस्कृत-काव्यानि प्राणैषीत्। भवतः कुलदेवता श्रीदुर्गा वर्वर्ति। अतः स्तोत्ररूपेण महाकाव्यरूपेण च भवता भगवती भवानी कामं भाविता।

कृतिपरिचयः—

१. रघुनाथतार्किकशिरोमणिचरितम्—अयं सुप्रसिद्धो नैयायिकः। अस्य चरितस्य प्रथमं प्रकाशनं सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य सारस्वतीसुषमा-पत्रिकायां समजनि, तदनन्तरं स्वतन्त्र-पुस्तकरूपेण च समभवत्।

२. वृत्तमञ्जरी—अत्र शताधिकवृत्तानां सरलया सुरगिरा निर्देशो वर्तते। अत्रोदाहरणरूपेण समुपन्यस्तानि सर्वाण्यपि पद्यानि भगवतीस्तुतिपरकाणीति ग्रन्थकर्तुर्वैशिष्टयम्। छन्दोज्ञानप्रकाशिका नूनमेषा अनन्यसाधारणा कृतिः। अत्र स्वोपज्ञावृत्तिर्विषयं विशदयति। अस्याः प्रशंसा विद्वत्तल्लजैरहमहमिकया कृता बाभाति।

३. विन्ध्यवासिनीविजयमहाकाव्यम्—दुर्गाभक्तिवशंवदेन तदीयप्रेरणया प्रणुन्नेन शेवडेकुलभूषणेन विरचितमभिनवकाव्यमिदं प्रकाशनात्पूर्वमेव कालिकातानगरीस्थैः हनुमानट्रष्टाधिकारिभिः पुरस्कृतम्, तदनु लक्ष्मणपुरस्थैः 'संस्कृत-अकादम्यधिकारिभिः' कालिदासाभिधेन सर्वोच्चपुरस्कारेण सभाजितम्, अस्मिन् वर्षे 'केन्द्रीयसंस्कृत अकादम्या' च सम्मानितम्। अत्र सर्वत्र प्रसादगुणस्य वैदर्भीरीतेश्च साम्राज्यं पठतां शृण्वतां च मनांसि सममेव पुलकयति। अस्य पद्य सङ्ख्या १०३९, सर्गाश्च षोडशमिताः।

४. शुम्भवधमहाकाव्यम्—अस्य श्लोकसङ्ख्या ८१६, सर्गाश्च चतुर्दश-मिताः। अत्र विविधवृत्तानां प्रयोगाः कवेश्छन्दोवशंवदतां सूचयन्ति। किं बहुना प्रशंसितेन महाकाव्यमिदं प्रकाशनात् पूर्वमेव कालिकातानगरीस्थैः 'हनुमान-ट्रष्टाधिकारिभिः' पुरस्कृतं, तदनु लक्ष्मणपुरस्थैः 'संस्कृत अकादम्यधिकारिभिः' सम्मानितम्। तैस्तैर्विश्वविद्यालयैः सेयं काव्यद्वयी शोधप्रबन्धलेखनाय च स्वीकृता।

५. स्तवमञ्जूषा—अत्र सप्तत्रिंशत्स्तोत्राणि सन्ति, येषु स्तोत्रकर्तुः स्वाभाविकी भक्तिः स्वच्छन्दं विरहन्ती कमप्यलौकिकं सुखातिशयं सन्तनोति। अत्र सम्पूर्णश्लोकसङ्ख्या १००८ परिमिता। एतदतिरिक्ता गङ्गा-यमुना-गोदा-वरीपयोष्णीनदीप्रभृतीनां स्तवाः, समस्यापूर्तयश्च बहुविधाः सङ्गृहीताः सन्ति।

६. श्रीकृष्णचरितम्—नागपुरतः प्रकाशितं प्रसन्नमधुरं वैदर्भीरीतिमण्डितं शतश्लोकात्मकं खण्ड-काव्यमिदम्।

७. श्रीमोतीबाबाजामदारचरितम्—इदमपि लोकोत्तरलक्षणलक्षितं सन्त-चरितात्मकं खण्डकाव्यं नागपुरतः प्रकाशितम्।

८. अभिनवं मेघदूतम्—प्रसन्नमधुरया सुरगिरा गुम्फितं खण्डकाव्यमिदं कालिदासकाव्यसरणिं बलात् स्मारयति। श्रीमद्वसन्तशर्मणा नागपुरं विहाय सम्प्रति काशीवासमूरीकृत्य ब्राह्मणोचितं सकलं दैनिकं कर्म स्वाध्यायाध्यापना-दिकं कुर्वता सर्वात्मना साम्बः शिवः सेव्यते।

डॉ० ब्रह्मानन्दत्रिपाठी

विषय-सूची

	पृष्ठाङ्काः
१. आरम्भस्तवः	१
२. आमुखस्तवः	४
३. प्रथमप्रबोधस्तवः	१०
४. द्वितीयप्रबोधस्तवः	११
५. सुप्रभातस्तवः	१४
६. पुष्पाञ्जलिस्तवः	१७
७. प्रकीर्णस्तवः	१८
८. मालास्तवः	२१
९. सेवावसरस्तवः	२५
१०. भूषास्तवः	२९
११. नक्षत्रमालास्तवः	३०
१२. नवरत्नमालास्तवः	३२
१३. पादादिकेशान्तवर्णनस्तवः	३३
१४. करुणास्तवः	३८
१५. चित्रस्तवः	४३
१६. परिहासस्तवः	४४
१७. औदार्यस्तवः	४८
१८. क्षमापणस्तवः	५०
१९. कोपापनोदनस्तवः	५२
२०. चरणारविन्दस्तवः	५६
२१. नमस्कारस्तवः	५८
२२. राशिस्तवः	६१
२३. रथोद्धतास्तवः	६२
२४. पीठाधिदेवातास्तवः	६५
२५. ऐश्वर्यस्तवः	६६
२६. कलहस्तवः	७०
२७. कीर्तिस्तवः	७२
२८. भक्तिस्तवः	७४
२९. कटाक्षस्तवः	७६
३०. शरणागतिस्तवः	८०
३१. उदयस्तवः	८२
३२. निवेदनस्तवः	८३
३३. आशंसास्तवः	८८
३४. परिवारस्तवः	८९
३५. निद्रास्तवः	९२
३६. परिपूर्तिस्तवः	९५
३७. उपसंहारस्तवः	९७

स्तवमञ्जूषा

॥ श्रीः ॥

महाकवि-श्रीमत्-पण्डितवसन्तत्र्यम्बकशेवडे-विरचिता

स्तवमञ्जूषा

आरम्भस्तवः

सदयं हृदये गले सुनीलं धवलं वर्ष्मणि लोहितं कपर्दे।
नयने विषमं प्रियं शिवायाः किमपि स्यादभिवृद्धये महो नः॥ १॥
शिवं स्वभक्ताभयदानसक्तं नक्तंदिवं चेतसि चिन्तयामि।
गङ्गाजले कैरवकोशशङ्कां यदुत्तमाङ्गे तनुते शशाङ्कः॥ २॥
महेश्वरोत्तुङ्गकपर्दनद्धां नमामि बालेन्दुकलां मनोज्ञाम्।
विचिन्त्य यां केतकपत्रलेखामाश्चर्यमग्ना विबुधा भवन्ति॥ ३॥
सरोजकिञ्जल्कपिशङ्गभासं वन्दे जटाजूटमहं शिवस्य।
शशी यदुत्सङ्गगतो बिभर्ति जालस्थचामीकरमीनशोभाम्॥ ४॥
करेण शम्भोः शिरसि स्थिताया जलं समादाय सुरापगायाः।
क्षिपन् सफूत्कारमितस्ततस्तद् देयाच्छिवं बालगजाननो नः॥ ५॥
कादम्बिनी काचन मेचकाभा मदन्तरङ्गाम्बरचुम्बिनी स्यात्।
संसारदावानलपीडितानां स्मृताऽपि या तापमपाकरोति॥ ६॥
चापबाणसृणिपाशधारिणी बन्धुजीवकुसुमारुणप्रभा।
कामकोटिवरपीठवासिनी पातु काऽपि परदेवता चिरम्॥ ७॥
उन्मिषत्कमलपत्रजित्वरं सत्वरं हरिणगर्वभञ्जने।
दीक्षितं सदयवीक्षिते शिवालोचनत्रितयमस्तु नः श्रिये॥ ८॥
स्तोतुमद्रितनयां प्रवर्तते मन्दधीरिह वसन्तनामकः।
अन्तरीक्षमवगाहितुं यथा दुर्बलोऽपि कलविङ्कशावकः॥ ९॥

स्तावं स्तावं कतिपयपणप्राप्तये दुर्नरेन्द्रान्
कारं कारं धनिजनमनस्तुष्टये चाटुवादान्।
निर्विण्णोऽहं भगवति मृषावादसञ्जातदोषां
जिह्वां स्वीयां तव गुणसुधाधारया क्षालयामि॥ १०॥
आगोपालं परिचितयशाः पाणिनिः शब्दजातं
स्तोत्रं मातस्तव रचयितुं नाऽधिगच्छेत्प्रयत्नात्।
छन्दःशास्त्रे परमनिपुणः सैतवः पिङ्गलो वा
प्रस्तोतुं त्वामुचितमथवा नाऽप्नुयात्पद्यबन्धम्॥ ११॥

यस्या नाथस्तव नगसुते सर्वविद्यानिदानं
पुत्रो द्वैपायनमुनिकृतेर्लेखको भारतस्य ।
भृत्या नृत्यागमपरिणतास्तण्डुनन्दीश्वराद्या-
स्तां त्वां स्तोतुं किमपि हृदयं लज्जते सज्जतो मे ॥ १२ ॥

भक्त्या मया परममन्दधिया प्रणीतं
स्तोत्रं भवानि रसहीनमपि प्रकामम् ।
स्वान्ते तनोतु परितोषमिदं त्वदीये
धत्तूरपुष्पमिव बालमृगाङ्कमौलेः ॥ १३ ॥

शशिना रहिता यथा निशा सरसी वा शतपत्रवञ्चिता ।
कविता गुणकीर्तनं विना तव मातर्न दधाति चारुताम् ॥ १४ ॥
विधुरा सहकारमाधुरी न मनागाद्रियते सुधां बुधः ।
अयि कीर्तिकथारसस्य ते पुरतो नास्ति सिता मता सताम् ॥ १५ ॥
चन्द्रमौलिदयिते मदम्बिके साहसं पुनरिदं क्षमस्व मे ।
त्वामवाङ्मनसगोचरं नृणामीडितुं यदभिलाषमुद्वहे ॥ १६ ॥

त्वां शङ्करप्रियतमे ध्रुवमस्तशङ्कं
तुष्टूषतो मम मनो मनुते न लज्जाम् ।
भासां निधेर्विरचितं घृतदीपदानं
हासाय पूजनविधौ न भवेज्जनानाम् ॥ १७ ॥

ज्ञानं वदन्ति सुधियः कृतिसाध्यताया
ये कारणं जननि देहभृतां प्रवृत्तौ ।
दृष्ट्वा तव स्तवनकर्मणि मत्प्रवृत्तिं
सर्वेऽपि ते मनसि विस्मयमावहेयुः ॥ १८ ॥

वाग्देवते जहिहि सम्प्रति मौनमुद्रां
विद्रावयस्व जडतां मयि बद्धमूलाम् ।
स्तोतुं स्वभक्तजनभावितभूरिभद्रां
रुद्रार्चितां गिरिसुतां भव सावधाना ॥ १९ ॥

ज्योत्स्नारसं चुलुकयन्ति यथा चकोरा
भृङ्गा लिहन्ति कमलेषु यथा मरन्दम् ।
आस्वादयन्ति रसिकास्तव मीलिताक्षा
द्राक्षाधिकां जननि कीर्तिकथां तथैव ॥ २० ॥

किं यौवनेन किमहो पुरुषायुषेण
किं पाटवेन किमु शास्त्रपरिश्रमेण ।
किं सम्पदा किमथ रूपगुणैश्च तस्य
नास्त्येव यस्य गिरिजे त्वयि भक्तिलेशः ॥ २१ ॥

शुश्रूषया गुरुमुखादधिगत्य वेदान्
लब्ध्वा निरुक्तवचनेन तदर्थबोधम् ।
इष्ट्वा मखेषु विबुधान् किमु साधनीयं
नोत्पद्यते यदि भवच्चरणानुरागः ॥ २२ ॥

नैसर्गिकी स्फुरति सा न कवित्वशक्तिः
शिक्षाऽपि देवि मम काव्यविदां विदूरा ।
शास्त्रावलोकनविधिर्विधिवञ्चितस्य
नास्त्यम्बिके तव कथं स्तवमातनोमि ॥ २३ ॥

गौडी प्रौढिं मयि न भजते डम्बरं जृम्भयन्ती
स्थैर्यं धैर्यच्युतिमुपगता टीकते नाऽपि लाटी ।
पाञ्चाली सा नगपतिसुते चञ्चला नाऽञ्चते मां
प्रायः प्रीतिं मम न तनुते देवि वैदर्भरीतिः ॥ २४ ॥

कोशाभ्यासं मम विजहतो नाऽभिधा साभिमाना
तत्सम्बद्धा गमयति न मां लक्षणा लक्ष्यभावम् ।
सञ्जायेत प्रतिपदमुमे व्यञ्जना खञ्जकल्पा
कामं वामं सकलमपि मे हन्त तुष्टूषतस्त्वाम् ॥ २५ ॥

कवयः प्रवयन्तु वाग्वितानं गवयाँस्तान्न वयं तु मानयामः ।
भवयातनया भृशं विषण्णास्तव कीर्तिस्तवमेव भावयामः ॥ २६ ॥

प्रान्तरे नगसुते भवाभिधे ध्वान्तराशिपरिपूरितान्तरे ।
भ्रान्तिजन्यमखिलं मम श्रमं क्लान्तिदं प्रशमयेत्तव स्तुतिः ॥ २७ ॥

प्राक्कविप्रवरवक्त्रनिःसरद्वाक्सुधारसजुषस्तवाऽम्बिके ।
स्तोत्ररूपमिदमस्मदर्पितं व्यञ्जनं सपदि रञ्जयेन्मनः ॥ २८ ॥

वादे च चाटुवचने च विकत्थने च
वाचालतेति बहुधा प्रथते गुणो यः ।
निःसंशयं परिणमत्यगराजकन्ये
लीलास्तवेषु तव वाग्मितया स एव ॥ २९ ॥

यं सानुकम्पमवलोकयसे सभाग्यं
संसारतः सपदि तस्य भवेद्विमुक्तिः ।
शंसामि कंसरिपुवन्द्यपदारविन्दां
वंशावतंसमचलाधिपतेरतस्त्वाम् ॥ ३० ॥

ध्वंसाय कोकविपदां तमसा कृतानां
हंसान्न लोकजननि प्रभवेद्यथाऽन्यः ।
स्तोत्राद्विना तव तथा मम पातकानां
गोत्रात्मजे विघटने क इवाऽभ्युपायः ॥ ३१ ॥

का देवि हानिरियता यदि नाऽऽद्रियन्ते
दोषाभिभूतहृदयास्तव कीर्तिगाथाम् ।
पुण्ड्रेक्षुदण्डमधुरां हृदयङ्गमां तां
चर्वन्ति शर्वदयिते रसिकाः सहर्षम् ॥ ३२ ॥

विषयप्रवणाय रोचते न शिवे त्वद्गुणवर्णनामृतम् ।
न धिनोति गुडौदनः खरं न रसालस्य फलं क्रमेलकम् ॥ ३३ ॥

अहमलङ्कृतिरीतिगुणादिषु प्रतिदधामि न यद्यपि पाटवम् ।
तदपि देवि तव स्तुतिकाम्यया कवयितुं स्पृहयामि नगात्मजे ॥ ३४ ॥

तव कटाक्षवशाज्जगदम्बिके स्फुरतु मद्धृदये प्रतिभाङ्कुरः ।
गुणगणान् गणयँस्तव सादरं सफलयामि यथा निजभारतीम् ॥ ३५ ॥

शिशुना मया विरचिते तव स्तवे पिशुना भवानि रचयन्तु दूषणम् ।
भवतीव्रतापपरिहारतत्परा भवती परं न विमुखत्वमाश्रयेत् ॥ ३६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायामारम्भस्तवः ॥

आमुखस्तवः

ये प्राक्तनाः सरसमञ्जुलवाग्विलासा
वैदर्भरीतिनिपुणाः प्रथिताः कवीन्द्राः ।
बद्धाञ्जलिः शिरसि तान्विनयावनद्धः
साहित्यसारसरसाँस्तरसा नमामि ॥ १ ॥

भूयांस एव कवयो गवया यदीयो
वर्षानदीव जवनो वचसां प्रवाहः ।
कस्तूरिकाहरिणवत्स कविर्दुरापो
यस्याऽस्ति जह्नुतनयासलिलोपमेयः ॥ २ ॥

याते दिवं हृदयहारिणि कालिदासे
चाऽस्तङ्गतेषु भवभूतिपुरःसरेषु ।
वागीश्वरीवदनलब्धवरप्रसादः
कस्तादृशीं जगति काव्यधुरां वहेत ॥ ३ ॥

वाग्गुम्फनेन जगतां हृदयङ्गमेन
यैरर्जितो दशसु दिक्षु यशःप्रकर्षः ।

एष स्तवप्रणयने जगदम्बिकायाः
सर्वानहं सपदि तान् मनसा स्मरामि ॥ ४ ॥
साहित्यशास्त्रपरिशीलनसंस्कृताना-
मम्भोजगर्भसुकुमारगिरां कवीनाम् ।
आमोदमङ्कुरयति प्रतिभाविलास-
श्चेतःस्थले कमपि काव्यविदां जनानाम् ॥ ५ ॥
सन्दर्भशुद्धिमभिलष्यति कश्चिदेकः
श्लेषप्रियो भवति कश्चन लक्ष्यहीनः ।
ध्वन्यध्वनीनपदमञ्चति कश्चिदन्यः
कश्चित्प्रसादगरिमाणमुरीकरोति ॥ ६ ॥
केचित्प्रयान्ति मुदमक्षरडम्बरेण
केचित्पदार्थमिह केवलमाद्रियन्ते ।
सारस्वतश्रुतिरहस्यविदो भजन्ते
तुल्यं पुनः पदपदार्थनिवेशमेव ॥ ७ ॥
शब्दास्त एव हि भवन्ति त एव चार्था-
स्तेषां परं विजयते रचनाविशेषः ।
यस्यैव दोषगुणभेदकृतो विभाति
भेदः स्फुटं जगति दुष्कविसत्कवीनाम् ॥ ८ ॥
तुल्याऽपि वर्णघटना पदयोर्दधाति
लोके कदाचिदपि नैव समानरूपम् ।
शब्दः ककारघटितः किलकोकिलस्य
माधुर्यमेति, कटुतामथ वायसस्य ॥ ९ ॥
जागर्त्यनादिनिधनं भुवनप्रकाशं
ब्रह्मस्वरूपमिह किञ्चन शब्दतत्त्वम् ।
अर्थात्मना परिणता हि यतः समस्ता
सन्दृश्यते सदसती जगतः प्रवृत्तिः ॥ १० ॥
नैसर्गिकी सुकृतिनां प्रतिभा कवीनां
संस्कारमर्हति हि शास्त्रकृतं प्रभूतम् ।
यद्गोलकुण्डखनितो जनितोऽपि हीरः,
कान्तिं न शाणकषणेन विना दधाति ॥ ११ ॥
द्वावर्हतः कविपदं भुवि निर्विकल्पं
प्राचेतसः स हि पराशरनन्दनश्च ।
सर्वेऽपि यत्समुपजीव्य कृतिं तदीयां
दाक्षीसुतप्रभृतयः कवयाम्बभूवुः ॥ १२ ॥

पक्वं फलं शुकमुखाद्गलितं बिभर्ति
लोकम्पृणं रसमिति प्रवदन्ति वृद्धाः ।
सर्वप्रियं निगमकल्पतरुप्रसूतं
सत्यापयेत्तदिह भागवतं जनानाम् ॥ १३ ॥

मन्ये षडङ्गसहितः खलु वेदपाठः
स्वर्गापवर्गपदवीं गमयेत् कदाचित् ।
लब्ध्वा नरः कविपदं गिरिशप्रसादा-
त्स्वर्गे चिरं वसति मुक्तिसुखं च भुङ्क्ते ॥ १४ ॥

मायेव विश्वजननी जगदीश्वरस्य
काचिच्चिरं विजयते कविकल्पनाख्या ।
एकैव या निरवलम्बनमात्मशक्त्या
निर्मात्यपूर्वमिव काव्यमयं प्रपञ्चम् ॥ १५ ॥

योगीश्वरान् कविरतिक्रमते समस्ता-
न्मन्ये विनाऽपि भुवि योगजधर्मलाभम् ।
नूनं करामलकवत्स्वगृहस्थितो यः
साक्षात्करोति भुवनत्रयवस्तुजातम् ॥ १६ ॥

अभ्यर्हितोऽपि जगतां रविरुज्ज्वलश्रीः
साम्यं कदाचिदपि नैव कवेः प्रयाति ।
सञ्चारमाशु निबिडासु वनस्थलीषु
कुर्यात्कविर्न तु रविर्लभते प्रवेशम् ॥ १७ ॥

निर्माणकर्मकुशलौ द्रुहिणः कविश्च
विभ्राजते परमयं तु तयोर्विशेषः ।
सृष्टिर्यदस्ति सुखदुःखमयी विधातु-
र्धत्ते सुखैकमयतां तु कविप्रपञ्चः ॥ १८ ॥

मन्ये हिरण्यकशिपुं सुरपक्षपाता-
न्निःसंशयं कविरधः कुरुते सलीलम् ।
प्रह्लादमेकमसुराधिपतिः ससर्ज
दत्ते नृणां कविरखण्डमनेकवारम् ॥ १९ ॥

अर्थं न मुञ्चति पदानि परीक्षमाणः
कोशं विलोकयति शङ्कितचित्तवृत्तिः ।
जागर्ति रात्रिमखिलां ध्वनिचिन्तनेन
चेष्टां करोति कृपणस्य कविः समग्राम् ॥ २० ॥

यः शब्दशास्त्रपरिशीलनकान्दिशीकः
शास्त्रान्तरेष्वपि निरस्तपरिश्रमश्च ।

व्युत्पत्तिमात्रमवलम्ब्य करोति काव्यं
धिक्तं विकत्थनपरं कविदुर्दुरूटम् ॥ २१ ॥
पुण्येन किञ्चिदधिगत्य कवित्वशक्तिं
लब्ध्वा मनाग्गुरुमुखादपि शास्त्रबोधम् ।
यो दूषयेद्धनिकचाटुभिरात्मवाचं
तं दूषकं कविविदूषकमेव मन्ये ॥ २२ ॥
क्षुद्रा जनाः कतिपये न समाद्रियन्ते
पीयूषसारभरितं यदि पद्यबन्धम् ।
हानिस्ततो भवति किं कविकुञ्जराणां
जीवन्ति काव्यरसिकाः शतशः पृथिव्याम् ॥ २३ ॥
ये मत्सरग्रहगृहीतधियः कियन्तः
श्रुत्वा वचांसि मधुराणि महाकवीनाम् ।
आन्दोलयन्ति न शिरः सह साधुवादै-
र्घूका हि ते भुवि मनुष्यशरीरभाजः ॥ २४ ॥
माधुर्यधुर्यवचसां कविपुङ्गवानां
सम्पद्यते यदि शिवस्तवनप्रवृत्तिः ।
जन्मान्तरीयसुकृतौघविपाकरूपः
सोऽयं सुवर्णसुमसौरभयोग एव ॥ २५ ॥
ये केचिदत्र कवयः प्रतिभानवन्तो
वाग्डम्बरेण महता मनुजान् स्तुवन्ति ।
निर्माय जातिकुसुमैः रुचिरां स्रजं ते
कण्ठे खरस्य विनयेन निवेशयन्ति ॥ २६ ॥
अन्याय्यमत्र भुवने नितरां यदेत-
न्मन्यामहे सुकवयो धनिकान् स्तुवन्ति ।
किं मुग्धबुद्धिरपि मद्यघटे विदध्यात्
कार्तस्वरे सुरभिदुग्धमहाभिषेकम् ॥ २७ ॥
किं हीयते यदि नरान् विषयैकसक्ता-
नामोदयेन्न वचसां रचना कवीनाम् ।
नाभ्यर्हिता यदलिनां मलिनान्तराणां
किं कोविदानपि न गन्धफली धिनोति ॥ २८ ॥
दृष्ट्वा मदान्धमतिभिः स्वकृतेरवज्ञां
मा नाम यान्तु हृदये कवयो विषादम् ।
मत्स्यादनैर्जलचरैरवहेलिताऽपि
संसेव्यते न नलिनी किमु राजहंसैः ॥ २९ ॥

हृद्या शिवस्तुतिमयी भणितिः कवीना-
मासीदति श्रुतिपथं यदि भाग्यभाजाम् ।
माध्वीलिहां न रणितं ध्वनितं न वेणो-
श्चित्तं न तद्रमयति क्वणितं विपञ्च्याः ॥ ३० ॥

उत्तंसयन्तु कृतिनो नगराजकन्या-
स्तोत्रात्मिकां बकुलमञ्जरिमात्मकर्णे ।
यस्या निरन्तरमरन्दझरं निषेव्य
को वा नरो भ्रमरवन्न मुदं दधाति ॥ ३१ ॥

जीव्यात्सुखं चिरतरं स कविर्यदीया
सूक्तिः प्रसादमधुरा विधुरा च दोषैः ।
शैलाधिराजतनयास्तवनप्रसक्ता
साक्षात्सुधारसझरीमधरीकरोति ॥ ३२ ॥

जीयान्नगेन्द्रदुहितुः प्रसिता स्तवेषु
स्वर्गापगासहचरी कविसूक्तिधारा ।
या कर्णशष्कुलिपुटं स्फुटमभ्युपेता
पापं निहन्ति भवतापमपाकरोति ॥ ३३ ॥

कात्यायनीस्तवमयी रसभावसिद्धा
सूक्तिः कवेर्विनिसृता वदनारविन्दात् ।
काश्मीरदेशरसिकप्रथितां वितस्ता
तीरोद्भवामपि विनिन्दति हारहूराम् ॥ ३४ ॥

सा काऽपि हापितभवा वरिवर्ति सूक्ति-
र्दुर्गास्तवार्थमुदिता मुदितान्तरङ्गा ।
या सारवं मधुरिमोद्गतसारवन्तं
प्रत्नं विखण्डयति पुण्ड्रकमिक्षुदण्डम् ॥ ३५ ॥

अभ्यासतोऽपि बहवः कवयन्ति लोके
द्राघीयसीमपि वयन्ति च काव्यकन्थाम् ।
द्राक्षारसप्रतिकृतिं गिरिजाप्रसादाद्-
वैदर्भरीतिमधिगच्छति कश्चिदेव ॥ ३६ ॥

मानुष्यकं परमदुर्लभमत्र वाचा-
माचार्यकं च समवाप्य ततो दुरापम् ।
नाचाम्यते नगसुतास्तवनामृतं चेत्
का चातुरी ननु तुरीयवयः स्थितस्य ॥ ३७ ॥

पुत्रीकृतानां गिरिराजपुत्र्या वैदर्भसन्दर्भगिरां कवीनाम् ।
अमन्दमन्दारमरन्दधाराधुरन्धरा वाक्प्रसरा जयन्ति ॥ ३८ ॥

आचान्तमाध्वीकरसावलेपा जयन्ति वाचां रचनाः कवीनाम् ।
याश्चारुचन्द्रार्धधरप्रियाया नवस्तवप्रक्रममाचरन्ति ॥ ३९ ॥

हंसायिताः सत्कविमानसेषु शंसाविशेषा जगदम्बिकायाः ।
ध्वंसाय संसाररिपोः प्रसक्ताः कर्णावतंसाः कृतिनां भवन्ति ॥ ४० ॥

शैलात्मजास्तुतिपराः कविकोकिलानां
लोकोत्तरा मधुरवाग्विसरा जयन्ति ।
नित्यं सुवर्णघटिता ध्वनिनोपपन्ना
ये कर्णपूरपदवीं सुधियां व्रजन्ति ॥ ४१ ॥

वक्रोक्तिभिर्विरहिता कविता हिताऽपि
विद्वज्जनेषु न चमत्कृतिमादधाति ।
भ्रूविभ्रमेष्वनिपुणा पुरवासियूनां
किं ग्रामवामनयना हरते मनांसि ॥ ४२ ॥

व्यङ्ग्यार्थभङ्गिरुचिरः कविवाग्विलासो
हृद्यो यथा नहि तथा प्रकटाभिधेयः ।
मन्दस्मितं कुलभुवो नवयौवनायाः
शोभां यथा विचिनुते न तथाऽट्टहासः ॥ ४३ ॥

आवर्जयेत् सहृदयाननलङ्कृताऽपि
शब्दार्थभावमधुरा रचना कवीनाम् ।
अव्याजरम्यनिखिलावयवा कुलस्त्री
किं राजते न मणिभूषणवर्जिताऽपि ॥ ४४ ॥

चेतोहराऽपि कविसूक्तिसुधा बुधानां
सूते मनागरसिकस्य तु न प्रमोदम् ।
ख्यातं जने यदरुचिग्रहपीडितस्य
तिक्तायते वदनसीमनि शर्कराऽपि ॥ ४५ ॥

स्वादिष्ठमैक्षव रसादपि शैलजायाः
स्तोत्रामृतं श्रवणशुक्तिकया पिबन्तः ।
धन्याः प्ररूढपुलका विनिमीलिताक्षा
धुन्वन्ति भक्तिभरिता निजमस्तकानि ॥ ४६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायामामुखस्तवः ॥

प्रथमप्रबोधस्तवः

जननि भास्करशीतकरात्मकं नयनयुग्ममहो तव मीलितम् ।
जगदिदं तमसा परिवेष्टितं झटिति जागृहि जागृहि जागृहि ॥ १ ॥
सुरगणो विधिविष्णुपुरःसरः सफलतां नयनस्य समीहते ।
अयि शिवेन समं जगदम्बिके झटिति जागृहि जागृहि जागृहि ॥ २ ॥
किमपि मेचकलोहितपाण्डुरं दिशि विभाति सुपर्वपतेर्महः ।
पिशुनयत्यचिरोद्गमनं रवेर्झटिति जागृहि जागृहि जागृहि ॥ ३ ॥
विकचयन् सरसीरुहमण्डलं विमलयन्नखिलं जगतीतलम् ।
उदयभूभृति भाति विभावसुर्झटिति जागृहि जागृहि जागृहि ॥ ४ ॥
विधुवियोगवशादिव दुःखिता कुमुदिनी विजहाति निजश्रियम् ।
गिरिगुहासु तमोऽपि निलीयते झटिति जागृहि जागृहि जागृहि ॥ ५ ॥
उपवने नववंशलतादले दधति देवि तुषारकणाः स्थिताः ।
मरकतेष्विव मौक्तिकविभ्रमं झटिति जागृहि जागृहि जागृहि ॥ ६ ॥
नगसुते विगलन्ति वियद्द्रुमात्प्रतिकलं कलिका इव तारकाः ।
कुसुमवद्विधुरत्र विशीर्यते झटिति जागृहि जागृहि जागृहि ॥ ७ ॥
मुदमुदञ्चति कोककदम्बकं शुचमुपैति चकोरकुलं परम् ।
विधिवशादयमम्ब विपर्ययो झटिति जागृहि जागृहि जागृहि ॥ ८ ॥
मधुकराश्चपला इव भिक्षुकाः कमलिनीमुपयाचितुमागताः ।
विदधति स्तवनं चटुभाषितैर्झटिति जागृहि जागृहि जागृहि ॥ ९ ॥
अयि सभाजयितुं रविमुद्गतं विततकन्धर एष नखायुधः ।
असकृदारटति स्फुटकर्कशं झटिति जागृहि जागृहि जागृहि ॥ १० ॥
वहति गैरिकविभ्रममद्रिषु द्रुमगतं नवपल्लवतुल्यताम् ।
इदमुदित्वरमित्रमहः शिवे झटिति जागृहि जागृहि जागृहि ॥ ११ ॥
नवजपाकुसुमद्युतिमश्नुते भजति दाडिमपुष्पमनोज्ञताम् ।
उदयशैलवने रविमण्डलं झटिति जागृहि जागृहि जागृहि ॥ १२ ॥
मलयशैलतटात् समुपागतो मरुदयं भवतीमिह सेवितुम् ।
वहति मन्दमिवाध्वपरिश्रमाज्झटिति जागृहि जागृहि जागृहि ॥ १३ ॥
नभसि देवि जवेन समुत्पतच्छुककुलं पुरतो रविवाजिनाम् ।
जनयति क्षणमत्र तृणभ्रमं झटिति जागृहि जागृहि जागृहि ॥ १४ ॥
पतति तत्क्षणमेव स वारुणीं द्विजपतिः खलु यः परिषेवते ।
व्रजति तत्र निदर्शनतां विधुर्झटिति जागृहि जागृहि जागृहि ॥ १५ ॥
अचलनन्दिनि बल्लवयोषितां दधिविलोडनशब्दकरम्बितः ।
हरति चित्तमयं वलयध्वनिर्झटिति जागृहि जागृहि जागृहि ॥ १६ ॥

दिनकरं समुपास्य यथाविधि द्विजवराः खलु जुह्वति पावकम् ।
रविविभावसुरूपिणि चण्डिके झटिति जागृहि जागृहि जागृहि ॥ १७ ॥
श्रवणमञ्जुलनादमनोरमः पटह एष गणैस्तव ताड्यते ।
दशदिशोऽस्य रवेण निनादिता झटिति जागृहि जागृहि जागृहि ॥ १८ ॥
कनकरत्नमया घृतदीपका अनुसरन्ति विधुं गतरोचिषम् ।
कलरवं कुरुते तव सारिका झटिति जागृहि जागृहि जागृहि ॥ १९ ॥
जननि तावकवासगृहाजिरे लुठति सेवक एष निराश्रयः ।
समभिवाञ्छति दर्शनवेतनं झटिति जागृहि जागृहि जागृहि ॥ २० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां प्रथमप्रबोधस्तवः ॥

द्वितीयप्रबोधस्तवः

उदयशिखरं पाथोजिन्याः पतिः परिचुम्बति
श्रयति भुवनं काश्मीराम्भोधरादिव सेचनम् ।
मधुरवचनैर्वासद्वारे स्तुतिं तव मागधा
विदधति जगन्मातः प्रातः प्रबोधमवाप्नुहि ॥ १ ॥
वरुणककुभो भालप्रान्ते विभाति विशेषकं
तिमिरपटलं कस्तूरीणां द्रवैरिव निर्मितम् ।
चरमशिखरिप्रत्यासन्नं सुधाकरमण्डलं
स्मितमिव मुखे तस्या देवि प्रबोधमवाप्नुहि ॥ २ ॥
शशधरपयःकुम्भं धृत्वा करे रजनीवधू-
रपरजलधिं याति स्नानेच्छया गजगामिनी ।
कुटिलतरलस्तस्याः पश्चात्तमिस्रकचोच्चयो
विलसति परं मातः प्रातः प्रबोधमवाप्नुहि ॥ ३ ॥
भगणकुसुमस्तोमं स्वीयैश्चिनोति करैः कृती
गगनसुमनोवाटीमध्ये दिवाकरभूसुरः ।
तव चरणयोः प्रातःपूजां विधातुमना अयं
नहि समुचितः कालक्षेपः प्रबोधमवाप्नुहि ॥ ४ ॥
मुकुलितकरास्तिष्ठन्त्येते सुरास्तव चत्वरे
जननि मुनयो गायन्त्युच्चैः स्वरेण रथन्तरम् ।

तुमुलनिनदो वादित्राणां दिशासु विगाहते
जहिहि शयनं हंसश्वेतं जहाहि जहीहि तत् ॥ ५ ॥
गिलति रभसादस्तक्ष्माभृद्बुभुक्षुरिव द्रुतं
तुहिनकिरणं मत्वा स्थूलाकृतिं नवमोदकम् ।
द्विजपतिपरिद्रोहात्पापं दधाति तमोमिषा-
दहह विकृतिं याति प्रज्ञा क्षुधा महतामपि ॥ ६ ॥
व्यधित निखिलं शास्त्रं शालातुरीयमुनेरसौ
निजमुखगतं श्रावं श्रावं पुरा खलु टिट्टिभः ।
पुनरपि चिरात्तस्याऽऽवृत्तिं समारभतेतरां
प्रयतहृदयो ब्राह्मे काले प्रबुध्य टिसंज्ञया ॥ ७ ॥
बटुसमुदयः पर्णागारे शिरांसि विकम्पयन्
पठति मधुरं वेदं हस्तैः स्वराक्षरसंयुतम् ।
निहितहृदयं पाठे तेषां कुरङ्गकदम्बकं
स्मरति कवलं नीवाराणां न सम्प्रति चर्वितुम् ॥ ८ ॥
स्वगृहमगमत्प्रातः सन्ध्यामुपास्य विहायसि
त्रिदशसरितः सप्तर्षीणां गणः पुलिने द्रुतम् ।
नियमकुशलः सावित्रीमादिवाकरदर्शना-
दसुरमहितः शुक्राचार्यो जपन्नवतिष्ठते ॥ ९ ॥
उडुंशकुनयः सुप्तं दृष्ट्वा विकर्तनकर्षकं
गगनकलमक्षेत्रं सायं यथेप्सितमाविशन् ।
किरणगुलिकाक्षेपं कुर्वन् विबुध्य स साम्प्रतं
गमयति रुषा रक्तः सर्वानमून् बहिरञ्जसा ॥ १० ॥
अशिशिरकरः प्रत्यायातः प्रियस्तव साम्प्रतं
कथयति कुलं रोलम्बानामितीव सरोजिनीम् ।
विकसितमुखी कान्तोदन्तं निशम्य ददाति सा
भृतिमिव मुदा तस्मै स्वीये दले मधुभोजनम् ॥ ११ ॥
विरहजनितां चक्राह्वानां रुजं सहवासिनां
निशि सकरुणं दृष्ट्वा म्लानिं परां नलिनी ययौ ।
दिनकृदगदङ्कारे पूर्वक्ष्माधरदेहली-
मुपगतवति प्राप्ताश्वासा प्रमोदमुपैति सा ॥ १२ ॥
शिथिलय निजां निद्रां प्राणप्रिये प्रतिबुध्यता-
महिमरुचिना सम्भाष्यैवं करैरिव कम्पिता ।
मधुकरकुलध्वानैर्दत्वा मुहुः स्फुटहुङ्कृतिं
कमलनयनोन्मेषं मन्दं करोति सरोजिनी ॥ १३ ॥

निशि कलयते साम्यं का नः क्षपापतिनोज्झिता
तिथिरिति यमैः पृष्ठः काकारवैरिव कोकिलः ।
वदति शिखरे माकन्दस्य क्रमेण कुहूः कुहू-
रिति दिनमुखे रक्तः कण्ठे निषेव्य नवाङ्कुरम् ॥ १४ ॥
मुदितमनसः सूर्यालोकाद्रथाङ्गसमाह्वया
दधति सलिले वीचीलोलाः कुशेशयसौहृदम् ।
मधुपकलभा निद्रातन्द्राविमुग्धविलोचनाः
कथमपि चिरं भ्रामं भ्रामं विदन्ति भिदां द्वयोः ॥ १५ ॥
उडुचिपिटकान् विक्रेतुं यः प्रसार्य निषेदिवान्
सुरपथवणिग्वीथ्यां नक्तं निशाकरनैगमः ।
विकलकरणो निद्राऽलाभात्प्रयाति शनैः शनै-
रुषसि निखिलानादायैतानयं स निजालयम् ॥ १६ ॥
चटचटरवैर्वैतानाग्नौ हुताः समिधो वने
विदधति रुषा रक्ता गालिप्रदानमिवैनसाम् ।
अनलशरणान्निर्गच्छन्तीं नवाञ्जनमेचकां
मुदिरपटलीं मत्वा धूम्यां नदन्ति शिखावलाः ॥ १७ ॥
सततगतिना शाखाजालं विधूय निपातितैः
कुसुमनिकरैः सौरभ्यस्य प्रकर्षमवापिताः ।
उपवनभुवः सत्यं सत्यापयन्ति दिनोदये
भजति पृथिवीगन्धं द्रव्येष्विति प्रथितं मतम् ॥ १८ ॥
अमरमुकुटीमाणिक्यानां घनैः किरणाङ्कुरै-
श्छुरितमभितस्त्वत्प्रासादे सभागृहकुट्टिमम् ।
असुररुधिरैर्दिग्धं मत्वा लिलिक्षति साम्प्रतं
चटुलरसनो दुर्गे कण्ठीरवस्तव वाहनम् ॥ १९ ॥
अहिमकिरणे सीताजानौ निधाय निजं महो
वहति नितरां विच्छायत्वं विधुर्भृगुनन्दनः ।
अरुणवदना कान्तोत्कर्षं सलज्जमवेक्षते
जनकतनया सन्ध्या हित्वा तमः परिगुण्ठनम् ॥ २० ॥
मरकतमणिस्तम्भच्छायामिषात्तव मन्दिरे
तिमिरनिकरं लीनं भीत्या गवेषयितुं किल ।
अहमहमिकायुक्ता मातर्गवाक्षमुखादिमे
दिनमणिकरा मन्दं मन्दं विशन्ति निशात्यये ॥ २१ ॥
स्थविरनृपतिः पाश्चात्याद्रिं प्रयाति निशाकर-
स्तदनु लभते राज्यं सर्वं तदीयमहस्करः ।

पयसि मधुपा मुच्यन्तेऽस्याभिषेकमहोत्सवे
कमलकलिकाकारागारान्मरन्दमलिम्लुचाः ॥ २२ ॥

प्रमदविपिनक्रीडावापी जलेषु विहारिणो
ललितगमनाचार्या नानाविलासविचक्षणाः ।
मृदुकलकलैरम्भोजिन्या बरीभ्रति किङ्किणी-
क्वणितमधुरैर्हंसाः सौखप्रसुप्तिकतामिव ॥ २३ ॥

जय जय महादेवि क्षिप्रं विकासय लोचने
व्रजति समयो नेदं युक्तं विलम्बनमम्ब ते ।
शयनभवनान्निष्क्रामन्ती समं त्रिपुरारिणा
मयि सकरुणं दृष्टिक्षेपं निधेहि तवात्मजे ॥ २४ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां द्वितीयप्रबोधस्तवः ॥

सुप्रभातस्तवः

निर्भर्त्सनैर्विरहिणामिव निष्प्रभत्वं
बिभ्रत्प्रयाति चरमाचलमोषधीशः ।
तारागणोऽपि विजहाति निजामभिख्यां
मातः समस्तजगतां तव सुप्रभातम् ॥ १ ॥

अज्ञानवद्विलयमेति घनान्धकार-
स्तत्त्वावबोध इव दीधितिमानुदेति ।
मुक्तिः सतामिव भविष्यति षट्पदानां
शैलाधिराजतनये तव सुप्रभातम् ॥ २ ॥

निद्रासुखं समनुभूय यथाभिलाषं
निर्गच्छतां मधुलिहां कमलोदरेभ्यः ।
गुञ्जारवः श्रुतिसुखं तनुते जनानां
त्रैलोक्यनाथदयिते तव सुप्रभातम् ॥ ३ ॥

म्लानिं वनं भजति सम्प्रति कैरवाणां
लक्ष्मीः प्रवेशमधिगच्छति पङ्कजेषु ।
प्राची दिगुज्ज्वलति याति तमः प्रतीचीं
बालेन्दुमौलिदयिते तव सुप्रभातम् ॥ ४ ॥

रात्रिर्विनश्यति समृद्धिरिवोद्धतानां
ज्योत्स्ना न भाति वनिता गतयौवनेव ।
धत्ते नभः शरदि नीरमिव प्रसादं
मातः समस्तजगतां तव सुप्रभातम् ॥ ५ ॥

वैतालिका धृतसमुज्ज्वलवेषभूषाः
सद्गद्य-पद्य-रचना-प्रथितप्रभावाः ।
द्वारि स्थितास्तव पठन्ति यशःप्रशस्ति
शैलाधिराजतनये तव सुप्रभातम् ॥ ६ ॥

हैयङ्गवीनदधिदुग्धघटान् विशाला-
नादाय हट्टमभि सत्वरमेतुकामाः ।
निर्यान्ति गोपवनिता निजमन्दिरेभ्य-
स्त्रैलोक्यनाथदयिते तव सुप्रभातम् ॥ ७ ॥

आसन् गमागमनशून्यतया निशायां
ये निद्रिता इव सुखं नगरस्य मार्गाः ।
ते जागरामिव भजन्ति मनागिदानीं
बालेन्दुमौलिदयिते तव सुप्रभातम् ॥ ८ ॥

आदित्यमुन्नमितकन्धरमीक्षमाणा
निर्गत्य भूमिरुहकोटरतो विहङ्गाः ।
कुर्वन्ति कूजितमिषाज्जयघोषमस्य
मातः समस्तजगतां तव सुप्रभातम् ॥ ९ ॥

आदाय लोहनलिकां दृढमंसदेशे
निद्रातुरा अपि निजं प्रहरं समाप्य ।
गच्छन्ति यामिकजनाः स्वनिकेतनानि
शैलाधिराजतनये तव सुप्रभातम् ॥ १० ॥

मञ्चस्थिता लघुशिलाशकलाभिघातैः
क्षेत्रे शुकानुपगतान् विनिवारयन्त्यः ।
गायन्ति मञ्जुलरवैः कलमस्य गोप्य-
स्त्रैलोक्यनाथदयिते तव सुप्रभातम् ॥ ११ ॥

उत्फुल्लपङ्कजवनान्मकरन्दबिन्दून्
सञ्चित्य देवि मधुपर्कमसौ विधित्सुः ।
आयाति वासभवनं पवनस्त्वदीयं
बालेन्दुमौलिदयिते तव सुप्रभातम् ॥ १२ ॥

तारं निशम्य कृकवाकुरुतं प्रबुद्धा
ग्रामस्त्रियः शिशुजनं परिसान्त्वयन्त्यः ।

सम्मार्जनादिगृहकर्मणि संसजन्ति
मातः समस्तजगतां तव सुप्रभातम् ॥ १३ ॥

मञ्जुस्वनत्कनककङ्कणदत्ततालः
सम्मिश्रितो मधुरगीतरवैर्वधूनाम् ।
गेहान्तराच्छ्रुतिमुपैति घरट्टनादः
शैलाधिराजतनये तव सुप्रभातम् ॥ १४ ॥

हेषान्विताः खुरपुटैः क्षितिमुल्लिखन्तः
कुल्माषगन्धचलदोष्ठपुटास्तुरङ्गाः ।
अग्रे विकीर्णमपि नाऽऽददते तृणौघं
त्रैलोक्यनाथदयिते तव सुप्रभातम् ॥ १५ ॥

कक्षापुटेषु परिगृह्य मृगाजिनानि
सन्ध्यार्चनाविहितकालविलोपभीताः ।
तोयाशयान् द्विजजनास्त्वरितं व्रजन्ति
बालेन्दुमौलिदयिते तव सुप्रभातम् ॥ १६ ॥

नीत्वा निशां विरहतापवशात्समग्रां
पूर्वाचले तरणिबिम्बमवेक्षमाणा ।
तीरान्तरात्प्रियमुपाच्छंति चक्रवाकी
मातः समस्तजगतां तव सुप्रभातम् ॥ १७ ॥

वाचालयन् दश दिशो मदयन् मयूरान्
निद्रां नृणामपनयन् रमयन् किशोरान् ।
देवालयेष्वयमुदञ्चति वाद्यघोषः
शैलाधिराजतनये तव सुप्रभातम् ॥ १८ ॥

सर्वङ्कषं तिमिरभारमपास्य दूरं
स्थित्वा मुहूर्तमुदयाचलकूटदेशे ।
भास्वान्विलङ्घितुमुपक्रमतेऽन्तरिक्षं
त्रैलोक्यनाथदयिते तव सुप्रभातम् ॥ १९ ॥

देवा गदाधरविरिञ्चिमहेश्वराद्या
नागाश्च वासुकिमुखा मुनयश्च सर्वे ।
कुर्वन्तु पुण्यसरितः कुलपर्वताश्च
बालेन्दुमौलिदयिते तव सुप्रभातम् ॥ २० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां सुप्रभातस्तवः ॥

पुष्पाञ्जलिस्तवः

स्वकान्त्या यः प्रत्यादिशति नवनीलोत्पलचयं
भ्रमद्भृङ्गालीनां कलयति च शोभामविकलाम् ।
पदं स्वीयं धत्ते विबुधनिवहो यस्य कृपया
कटाक्षो मां मातस्तव पदनतं पातु स चिरम् ॥ १ ॥
यदा धृत्वा रोषं हिमनगसुते त्वं वनमगा-
स्तदा त्वामाराद्धुं जननि गिरिशोऽभूद्गिरिचरः ।
प्रसादं तन्नृत्यं सपदि तव चित्ते विनिदधे
चिरं कोपावेशो वसति गृहिणीनां न हृदये ॥ २ ॥
अये येनाऽऽकृष्टं भगवति महेशस्य हृदयं
त्वमेव स्त्रीरत्नं हिमगिरिसकाशात्तदभवः ।
हिमाद्री रत्नानां खनिरिति ततः सर्वभुवने
ययौ नूनं प्रख्यामितरदुरवापामवितथाम् ॥ ३ ॥
त्वदीयं लावण्यं भवति वचनानामविषय-
स्तुलां शङ्के पङ्केरुहमपि न धत्ते नखरुचाम् ।
निरस्तं वीणाया मधुररणितं मञ्जुलगिरा
गुणाः कोटिं यान्ति प्रकृतिमहतां कामपि पराम् ॥ ४ ॥
विशालाक्षी दुर्गे त्वमसि विषमाक्षस्तव पति-
र्निवासः प्रासादे तव पितृवने खण्डपरशोः ।
सखीवृन्देनेत्थं समुपहसितायाः पितृगृहे
स्मितं मां साकूतं तव तुहिनकान्तं समवतु ॥ ५ ॥
विधत्तां पद्माक्षी हरिचरणसेवां जलधिजा
यथेच्छं वा गङ्गा नटतु शितिकण्ठस्य शिरसि ।
रुचिं तीर्थे देवे क्वचिदपि निबध्नाति न मनः
शरण्यं सर्वस्वं मम भवतु ते पादयुगलम् ॥ ६ ॥
पुरः पूषाचन्द्रौ करकलितवेत्रौ प्रचलतः
सुराः पद्यैः कीर्तिं तव जननि गायन्ति मधुरैः ।
करे हैमं छत्रं वहति युवराजो गणपतिः
परीता सेनाभिर्व्रजसि पुरमारुह्य शिबिकाम् ॥ ७ ॥
उमारूपं धृत्वा हिमनगगृहे क्रीडसि सुखं
भवानीरूपेण प्रमथपतिगेहे विहरसि ।
महाकाली भूत्वा क्षपयसि युगान्ते त्रिभुवनं
चरित्रं स्यान्मातः कथमिव न ते विस्मयपदम् ॥ ८ ॥

लुठन्तः पादाब्जे तव कविवराः शैलतनये
यथेच्छं कल्पन्ते मधुमधुरपद्यप्रणयने ।
मुखामोदे लुब्धा तव न तनुते दिग्गजमदे
मनीषां पुष्पे वा सुरविटपिनां भृङ्गपटली ॥ ९ ॥
पदाम्भोजे क्षिप्तः परिमलविहीनोऽपि नितरा-
मुपादेयो मातस्तव भवतु पुष्पाञ्जलिरयम् ।
अये हेरम्बस्य स्खलदपि महादेवि गदितं
सुतस्नेहाच्चित्ते तव न कुतुकं किं व्यतनुत ॥ १० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां पुष्पाञ्जलिस्तवः ॥

प्रकीर्णस्तवः

पीयूषदीधितिकलाममलां दधानं
नीलोत्पलद्युतिहरं नयनाभिरामम् ।
वामार्धमन्धकरिपोः सुरराजचूडा-
रत्नप्रभाच्छुरितपादयुगं स्मरामि ॥ १ ॥
द्राक्षारसो विरस एव भवेदवश्यं
कीर्ति मुधां प्रकटयन्ति बुधाः सुधायाः ।
सन्माक्षिकं मतिमतामपि नाऽक्षिपात्रं
तन्निस्तुलं तव कथारसमम्ब मन्ये ॥ २ ॥
ब्रह्मादयः सुरवरा निजमौलिदेशे
धृत्वा त्वदीयचरणाम्बुजरेणुलेशम् ।
सर्गस्थितिप्रशमनप्रभृतानि कर्तुं
कार्याणि शैलतनये प्रभवन्त्यजस्रम् ॥ ३ ॥
मातस्त्वदीयपदपङ्कजसेवनेन
मन्दोऽपि याति पदवीं प्रथमां कवीनाम् ।
मूकोऽपि वाक्पतितुलामधिरोहति द्रा-
गन्धोऽपि विन्दति जनः खलु दिव्यदृष्टिम् ॥ ४ ॥
ध्यायन्ति ये कुमुदिनीरमणावतंसा-
मम्बामशेषधरणीधरराजकन्याम् ।

स्वाभाविकीं चपलतामपहाय लक्ष्मी-
स्तेषां गृहेषु सततं कुरुते निवासम् ॥ ५ ॥
नारायणे न रमते कमलासने वा
चेतो मदीयमथवा तरुणेन्दुमौलौ ।
प्रालेयभूधरसुतामतसीप्रसून-
भासां करोति शरणं शुचिमन्दहासाम् ॥ ६ ॥
चेतो निशामय वदामि हितं त्वदीयं
काञ्चित्तुषारगिरिजां भज कल्पवल्लीम् ।
यस्याः परिग्रहवशादधिपः पशूनां
कापालिकोऽपि जगदीश्वरतामियाय ॥ ७ ॥
त्वं कल्पना कविजने प्रतिभा बुधेषु
शक्तिस्त्वमेव दहने दहनानुकूला ।
सौरी रुचिस्त्वमसि चान्द्रमसी च मात-
र्नैसर्गिकी मधुरता सलिले त्वमेव ॥ ८ ॥
देवाः कपालिकमलासनकेशवाद्याः
सन्त्येव भक्तिसुलभाः करुणार्द्रचित्ताः ।
कुर्वे किमत्र सकलानपि तानुपेक्ष्य
चित्तं क्षमाधरसुतां भजते मदीयम् ॥ ९ ॥
त्वत्कीर्तिकीर्तनविधौ दृढदत्तचित्तो
वाग्डम्बरेषु चतुरश्चतुराननोऽपि ।
मातः स पञ्चममुखच्छिदि शूलपाणौ
रोषाभिषङ्गकलुषां दृशमादधाति ॥ १० ॥
त्वत्पादपूजनविधौ कृतवीर्यसूनोः
साम्यं महेन्द्रपदवीं तव दर्शनेषु ।
स्तोत्रावलीविरचने तव शेषभावं
प्रालेयभूधरसुते स्पृहयामि नित्यम् ॥ ११ ॥
रोमाञ्चमञ्चति वपुर्मम तावकीन-
नामग्रहे सजलतां नयनं प्रयाति ।
जिह्वा निसर्गमधुरा जडिमानमेति
हस्तद्वयं मुकुलितं भवति प्रकामम् ॥ १२ ॥
आकर्षणं प्रकुरुते सुरसुन्दरीणा-
मीशं जगत्त्रयगुरुं वशमातनोति ।
संस्तम्भनं दिनमणेर्विदधाति शैत्यं
वैश्वानरं नयति ते चरणाब्जदासः ॥ १३ ॥

त्वामम्ब कुङ्कुमरसोज्ज्वलकान्तियुक्तां
कामेश्वराङ्कनिलयामनुचिन्तयेद् यः ।
निश्चप्रचं गणयितुः स कनिष्ठिकायां
स्थानं लभेत गणनावसरे कवीनाम् ॥ १४ ॥

निर्याति वक्त्रकमलात् सहसा त्वदीयं
बीजत्रयं गिरिसुते पुरुषस्य यस्य ।
स्वर्गाङ्गनाभुजलतापरिरम्भणानां
गात्रं तदीयमधिगच्छति पात्रभावम् ॥ १५ ॥

दण्डं बिभर्ति कुरुते नियमं जनानां
यः सन्तनोति वसतिं दिशिदक्षिणस्याम् ।
सोऽपि त्वदर्चनपराच्छमनो बिभेति
सङ्गीयसे त्वमत एव च दक्षिणेति ॥ १६ ॥

स्वेच्छावशेन विविधानि विधातुकामा
कार्याणि सृष्टिभृतिघातपुरःसराणि ।
पद्मासनाच्युतशशाङ्कशिखामणीनां
रूपाणि विश्वजननि त्वमुरीकरोषि ॥ १७ ॥

देहप्रभाविलसितैरनिशं नयन्ती
तापिच्छगुच्छसुषमां विषमामवस्थाम् ।
येषां विभाति हृदये गिरिराजकन्या
पुण्यानि गण्यपदवीं न भजन्ति तेषाम् ॥ १८ ॥

पीयूषसिन्धुजठरे परिराजमानं
दिव्यप्रभं वलयितं नवपारिजातैः ।
कल्पक्षमारुहपरिष्कृतमध्यभागं
सञ्चिन्तयामि सततं कनकान्तरीपम् ॥ १९ ॥

तस्मिन् महारजतनिर्मितमण्डपान्तः
सिंहासने विविधरत्नमये निषण्णाम् ।
नानाविभूषणधरां विबुधैः परीतां
ध्यायामि तत्रभवतीं नगराजकन्ये ॥ २० ॥

ये रक्तचन्दन-जपा-करवीरपुष्प-
बिल्वच्छदैरनुदिनं परिपूजयन्ति ।
कौलक्रमेण भवतीं भवतापहन्त्रीं
यन्त्रस्थितां जननि ते शिवतां व्रजन्ति ॥ २१ ॥

पापाटवीलवनकर्मकुठारराजः
संसारसिन्धुतरणोद्यमकर्णधारः ।
कल्पद्रुमो जनमनोरथपूरणेषु
त्वत्पादयोर्विजयते विहितः प्रणामः ॥ २२ ॥
ध्यायन् हिमाचलसुताचरणाब्जयुग्मं
कुर्वन् प्रपाठमथ सप्तशतीस्तवस्य ।
पाशाष्टकं शिथिलयन् प्रतिवासरं च
धन्यः करामलकवद्विदधाति मोक्षम् ॥ २३ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां प्रकीर्णस्तवः ॥

मालास्तवः

वन्दे हिमाद्रितनयां कमलायताक्षीं
बालार्ककोटिसुषमां परमाणुमध्याम् ।
नारायणादिपरिपूजितपादपद्मां
भक्तप्रियां दशननिर्जितकुन्दशोभाम् ॥ १ ॥
गौरीति शैलतनयेति शिवप्रियेति
कात्यायनीति महिषासुरमर्दिनीति ।
दुर्गेति भक्तजनदुर्गतिहारिणीति
संलापिनं जननि मां सततं विधेहि ॥ २ ॥
शिवप्रिये सादरमेतदेव कृताञ्जलिस्त्वामहमर्थयामि ।
त्वदीयपादाम्बुरुहद्वयस्य भवे भवे संस्मृतिरस्तु नित्यम् ॥ ३ ॥
नाऽहं वन्दे विजितकमलं तावकं पादयुग्मं
वारं वारं जननि नरकाद् रौरवाख्याद्भयेन ।
वित्तं वित्ताधिपवदथवा नाऽधिगन्तुं प्रभूतं
भक्तत्राणप्रणयिनि रतिस्तत्र नैसर्गिकी मे ॥ ४ ॥
नाऽऽकाङ्क्षा मे द्रविणनिकरे नाऽपि भोगे न मोक्षे
दैवायत्तं भवति हि यतः प्राणिनां सौख्यदुःखम् ।
भूयो भूयः सकलजननि त्वामिदं प्रार्थयेऽहं
पादाम्भोजे तव दृढतरा मामिका भक्तिरस्तु ॥ ५ ॥

स्वगृहे विपिनेषु वा विदेशे जलयानेऽप्यथवा मम स्थितस्य ।
हृदये जगदम्बिका विधत्तां नवनीलोत्पलसन्निभा निवासम् ॥ ६ ॥
चिन्तयामि हृदि सर्वमङ्गलां स्मेरवक्त्रसरसीरुहां सदा ।
मेदिनीधरमहेन्द्रकन्यकां देववृन्दनुतपादपङ्कजाम् ॥ ७ ॥
कुवलयनयनां कृपाणहस्तां कुरु शरणं मम चित्त शैलकन्याम् ।
नहि सुखकरमस्ति किञ्चिदन्यत् क्षितिधरराजसुतापदाब्जतुल्यम् ॥ ८ ॥

भ्रातः पद्मपलाशसंस्थितपयोबिन्दूपमं जीवितं
भोगाशा मृगतृष्णिका जलधरच्छायोपमा श्रीरपि ।
इत्यालोच्य निरन्तरं गिरिसुतापादाब्जसंसेवया
तत्कीर्तिश्रवणेन वा क्षपय रे कालं वृथा मा भ्रम ॥ ९ ॥

संसाराब्धौ विषयसलिले बन्धुकल्लोलमाले
मोहावर्ते तनयदयितानक्रचक्रावकीर्णे ।
बाहूत्क्षेपं करुणकरुणं क्रन्दतां मज्जतां नो
हस्तालम्बं वितर कृपया सत्वरं शैलकन्ये ॥ १० ॥

हे लोका यदि बाधते भवमहाव्याधिः परं दुःसहो
युष्मानेष निरन्तरं हितकरं वाक्यं तदाऽऽकर्ण्यताम् ।
सम्भूता तुहिनाचलादनुगता स्थाणुं पुराणं तथा
वल्ली काचन सेव्यतामपचिता देवैरपर्णाभिधा ॥ ११ ॥

येषां नः पृथिवीधरेन्द्रतनया देवेन्द्रमौलिस्फुर-
न्नानारत्नमरीचिचुम्बितपदा माता महेशः पिता ।
ते दग्धोदरपूरणार्थमधिपं कञ्चिन्मदान्धं वयं
क्षुद्रं चाटुशतैः स्तुवीम यदि तन्मौग्ध्यं किमस्मात्परम् ॥ १२ ॥

वाचा गद्गदरुद्धया सपुलकैरङ्गैरपाङ्गैः स्रवद्-
बाष्पाम्भःकलुषैः स्थिरेण मनसा मूर्ध्ना नतेनाऽधिकम् ।
कृत्वा वक्षसि पाणिपल्लवयुगं त्वत्पादपङ्केरुह-
ध्यानासक्तिपरायणस्य गिरिजे सम्पद्यतां मे जनुः ॥ १३ ॥

तौ पादौ गिरिजाप्रदक्षिणविधिर्याभ्यां समभ्यस्यते
तच्छीर्षं विचिनोति यद्गिरिसुतापादाब्जलग्नं रजः ।
तन्नेत्रद्वयमद्रिराजतनयावीक्षापरं यत्सदा
सा जिह्वा मधुरप्रिया पिबति या दुर्गाभिधानामृतम् ॥ १४ ॥

जिह्वे वर्णय चण्डिकां, गिरिसुतां सञ्चिन्त चेतः, शिवां
भक्त्या पूजय पाणियुग्म, गिरिजाकीर्तिं श्रुते संशृणु ।
नेत्रद्वन्द्व विलोकयाऽचलसुतां, पादद्वय त्वं व्रज
श्रीदुर्गालयमद्रिराजतनयां वन्दस्व शीर्षाऽनिशम् ॥ १५ ॥

आम्नायाध्ययनं शुकप्रलपितं, दानोपवासादिकं
दम्भः कर्म समग्रमध्वरविधिश्छागीयहिंसाफलः ।
गङ्गासागरमज्जनं मदगजस्नानं नराणां विना
यत्पादाम्बुजसंस्मृतिं विजयते सा शैलराजात्मजा ॥ १६ ॥

वपुषि रचय मामके निवासं मनसिज मा हितमेव ते वदामि ।
निजजनपरिपन्थिनि प्रकृत्या भवति कृपाकृपणः शिवाकृपाणः ॥ १७ ॥

प्रालेयाद्रिसुतामशेषजननीं हालाहलप्राशन-
प्रोद्गच्छत्परितापपीडिततनोः सञ्जीवनीं शूलिनः ।
दुर्गां दुर्गतिनाशिनीं भगवतीं राकाशशाङ्काननां
चेतः संश्रय भक्तकल्पलतिकामन्यैस्तु किं दैवतैः ॥ १८ ॥

माकार्षं कर्मजातं तव चरणसरोजन्मसेवाविभिन्नं
मा स्मार्षं पुत्रदारद्रविणगृहपशूँस्त्वत्स्मृतौ विघ्नभूतान् ।
मा नैषं कीर्तनेन क्षणमपि च विना प्रत्यहं त्वद्गुणानां
मा भूवं भक्तिहीनस्त्वयि विषयसुखासक्तचित्तः कदापि ॥ १९ ॥

नानादुराचरणसन्ततिसङ्कुलोऽहं
दासोऽपि ते जननि यो भवितुं न योग्यः ।
तं मां सुतीयसि तदा वद तावकीनं
किं वर्णयामि शरणागतवत्सलत्वम् ॥ २० ॥

पीयूषमाधुर्यधुरन्धराणि पापापनोदाध्वरदीक्षितानि ।
नामानि देव्याः श्रुतिसम्मतानि जिह्वे समुच्चारय मङ्गलानि ॥ २१ ॥

चण्डी भवानी नगराजकन्या दुर्गा मृडानी जगदम्बिकेति ।
नामानि भक्त्या न गृणन्ति सम्यग् हा हन्त कीदृग् जडता नराणाम् ॥ २२ ॥

त्रैलोक्यत्राणमन्त्रं प्रबलतरभवव्याधिनिर्वाणमन्त्रं
कैवल्यप्राप्तिमन्त्रं बहुविधदुरितव्यूहविध्वंसमन्त्रम् ।
सिद्धीनां मूलमन्त्रं श्रुतिनिगमशिरोवाक्यसन्दिष्टमन्त्रं
दुर्गा दुर्गेति मन्त्रं वद वद रसने सर्वसम्पत्तिमन्त्रम् ॥ २३ ॥

भक्ताभीष्टकरौषधं शिवमनःसम्मोहनैकौषधं
संसारार्तिहरौषधं सुरपतिप्रत्यर्थिनाशौषधम् ।
पापापायकरौषधं हिमगिरेर्नेत्रोत्सवैकौषधं
चेतः सर्वगदौषधं पिब सखे दुर्गेति दिव्यौषधम् ॥ २४ ॥

रे रे मनोमधुप वाचमिमां मदीयां
श्रेयस्करीं शृणु सखे विहितावधानः ।
प्रालेयभूधरसुताचरणारविन्द-
द्वन्द्वं निषेव्य कुरु चिन्मधुपानलीलाम् ॥ २५ ॥

मातस्त्वां हृदि चिन्तयामि सततं वन्दे पदाब्जं तव
त्वां पश्यामि श्रृणोमि तावकगुणान् गच्छामि ते मन्दिरम् ।
निर्माल्यं तव धारयामि शिरसा तिष्ठामि ते चत्वरे
त्वन्नामामृतमापिबामि दुरितव्याधेः परं भेषजम् ॥ २६ ॥

ये तावकीनगुणकीर्तिकथां विहाय
श्रृण्वन्ति गीतरचनां गणिकाजनानाम् ।
ते रासभाः सकलभूधरराजकन्ये
क्षोणीतले मनुजरूपधराश्चरन्ति ॥ २७ ॥

कामादयो रिपुजना विनिहन्तुकामा-
मां शक्तिहीनमभितो वलयीभवन्ति ।
तत्त्वं कृपापरवशा परिरक्ष तूर्णं
नो चेदपेतशरणः सुतरां हतोऽस्मि ॥ २८ ॥

अनन्तरोगोपहतं कलेवरं दिने दिने ह्रासमुपैति तावकम् ।
तदौषधं मूढ वदामि चण्डिकां त्रैलोक्यचिन्तामणिमाशु संश्रय ॥ २९ ॥

चित्रं नरः स्पर्शमणिं विहाय पाषाणमूरीकुरुते विमूढः ।
त्यक्त्वा तुषाराद्रिसुतां प्रणौति कृताञ्जलिः कञ्चन यत् क्षितीशम् ॥३०॥

हसन्तु निन्दन्तु जनाः स्तुवन्तु विवदन्तु वा ।
तथापि न विमुञ्चामि चण्डिकाचरणाम्बुजम् ॥ ३१ ॥

उत्क्षिप्य बाहुयुगलीमिदमारटामि
रे रे जना जपत शैलसुताभिधानम् ।
संसारतापपरिहारकरं तदन्य-
न्नास्त्येव किञ्चिदपि सत्यमुपायजातम् ॥ ३२ ॥

संसेविताः सुरवरा विधिमाधवाद्या-
स्तीर्थानि चाऽपि सकलानि विलोकितानि ।
त्वामन्तरेण मम पातकघातकार्ये
कुत्रापि मातरियती पटुता न दृष्टा ॥ ३३ ॥

बाष्पाम्भःपरिपूर्णनेत्रयुगलं सस्वेदरोमोद्गमं
तालीवादनतत्परं तव पुरो नृत्यन्तमालोक्य माम् ।
निन्दन्ति स्वजनास्तथापि जननि त्वद्भक्तिकादम्बरी-
पानोन्मादवशंवदं गणयति स्वान्तं न तन्मामकम् ॥ ३४ ॥

चण्डी नः परिपातु विश्वजननी चण्डीं भजामः सदा
चण्ड्या दैत्यजना रणेषु निहताश्चण्ड्यै नमस्कुर्महे ।
चण्ड्याः सर्वमिदं जगत्समभवच्चण्ड्यास्तु दासा वयं
चण्ड्यां भक्तिरहर्निशं भवतु नो हे चण्डि नः पालय ॥ ३५ ॥

माता मेना तव जनयिता क्षोणिभृच्चक्रवर्ती
प्राणेशानस्त्रिपुरमथनः कार्तिकेयस्तनूजः ।
भृत्या देवा विधुरनुजनिः सद्म कैलासपीठं
साम्राज्यं ते भुवनमखिलं तन्न मन्ये त्वदन्यम् ॥ ३६ ॥

त्वमेव लोके प्रकृतिः सनातनी पिनाकपाणिः पुरुषः समीरितः ।
सुरासुराशीविषमानवात्मकं जगत्त्रयं देवि विनिर्मितं त्वया ॥ ३७ ॥

स्मारं स्मारं तावकीनं पदाब्जं कारं कारं कीर्तनं त्वद्गुणानाम् ।
हारं हारं सूक्तिरत्नं गुरूणां वारं वारं सौख्यसिन्धुं वगाहे ॥ ३८ ॥

सुरेन्द्रकोटीरशिखामणिप्रभावितानतीराजितपादपङ्कजाम् ।
स्मरन्ति ये भूधरराजकन्यकां प्रयान्ति ते मोक्षपदं निरामयम् ॥ ३९ ॥

मातश्चतुर्विधपुमर्थनिदानभूतं
पापाकुलेऽपि मयि धेहि कृपाकटाक्षम् ।
त्वं चेन्मदुद्धरणयत्नमुरीकरोषि
लोकत्रये तव तदा भविता सुकीर्तिः ॥ ४० ॥

नूतनाम्बुधरकान्तिधारिणी माहिषासुरविनाशकारिणी ।
चण्डिकाप्रणतवृन्दतारिणी पातु मां शिवमनोविहारिणी ॥ ४१ ॥

निपतति यदि दुर्गानामवह्निस्फुलिङ्गो
दुरितवनमशेषं सत्वरं दन्दहीति ।
हिमगिरितनयायां भक्तिरात्यन्तिकी चेत्
सविनयमथ मुक्तिस्तिष्ठति द्वारदेशे ॥ ४२ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां मालास्तवः ॥

सेवावसरस्तवः

अम्भःप्रपूर्णान् कलधौतकुम्भान् सम्भावयन्त्यः करपङ्कजेषु ।
जम्भारिवन्द्ये परिषेवितुं त्वामेताः समस्ताः सरितः समेताः ॥ १ ॥

यस्यास्तरङ्गा अवगाहभाजां स्वःसौधसोपानवदाचरन्ति ।
तामार्तरक्षाप्रवणान्तरङ्गामिमां त्वमालोकय देवि गङ्गाम् ॥ २ ॥

निवारयन्तीं शमनालयस्य बाधामसाधारणतां दधानाम् ।
संसारकक्षे दमुनायमानां मातस्त्वमेनां यमुनामवेहि ॥ ३ ॥

या सूर्यवंशोद्भवभूपतीनां धत्ते तटे भास्वरयूपजालम् ।
तामद्रिकन्ये सरयूं त्वमेतां नयस्व नूनं नयनातिथित्वम् ॥ ४ ॥
यत्तोयसंस्पर्शनमात्रलाभाद् गतिं वरेण्यां कति नाप्नुवन्ति ।
इयं सति प्राग्रहरे सतीनां सा गोमती सम्प्रति सन्निधत्ते ॥ ५ ॥
आसादयेद् यज्जलमज्जनेन विधूय पापं भुवि को न भद्रम् ।
पुम्भावयुक्तं गिरिजे तमेतं चिराय सम्भावय शोणभद्रम् ॥ ६ ॥
तपस्विनः प्रत्यहमाद्रियन्ते जलेन यस्याः सवनं त्रिसन्ध्यम् ।
तां विश्वमातस्तमसां विहन्त्रीं विलोकय त्वं तमसां पुरस्तात् ॥ ७ ॥
या यज्वनां विन्दति तीरभुक्तेरनेकयागावभृथोपयोगम् ।
सा वाग्वती वाक्पतिगीतकीर्ते सम्प्रीतये लोचनयोस्तवाऽस्तु ॥ ८ ॥
आबालवृद्धं प्रथते पृथिव्यां यस्याः शिलानां पुरुषोत्तमत्वम् ।
तां मण्डयन्तीं निजसन्निकर्षं मेनात्मजे मानय गण्डकीं त्वम् ॥ ९ ॥
पीठस्थितायास्तवकामरूपे नेनेक्ति यः पादसरोजयुग्मम् ।
तं ब्रह्मपुत्रापरनामधेयं लौहित्यमेतं जगदम्ब विद्धि ॥ १० ॥
या नामसाम्यादिव गाधिसूनोः कदाचिदासज्जति रौद्ररूपम् ।
असौ त्रिलोकीश्वरि सम्मुखं ते सा कौशिकी तिष्ठति बद्धहस्ता ॥ ११ ॥
आप्लाव्यमानाः सलिलैर्यदीयैश्चोला नदीमातृकतां वहन्ति ।
तामम्ब लम्बोदरवत्सले त्वं दृगब्जपात्रीकुरु सह्यपुत्रीम् ॥ १२ ॥
यत्सङ्गमं दक्षिणसागरेण मुक्ताफलानां प्रभवं वदन्ति ।
तामाम्रवृक्षाञ्चितकूलकच्छां त्वमम्ब साक्षात्कुरु ताम्रपर्णीम् ॥ १३ ॥
यद्वायुरेलासुरभिर्गवाक्षे संसेव्यते केरलकामिनीभिः ।
तालीवनश्यामलतीरदेशा विभाति सैषा मुरला भवानि ॥ १४ ॥
तुलाप्रसङ्गे सति यज्जलस्य पीयूषमायास्यति यूषसाम्यम् ।
मज्जज्जनप्रापिततुङ्गभद्रां तां पश्य कात्यायनि तुङ्गभद्राम् ॥ १५ ॥
कन्यागते देवगुरौ विशन्ति सर्वाणि तीर्थानि जले यदीये ।
सा कृष्णमूर्तिर्द्रवरूपमाप्ता विराजते पार्वति कृष्णवेणी ॥ १६ ॥
यदाश्रितानामिह देहभाजां न दुःखवार्ता घटते कदापि ।
न बाधितुं वा प्रभवेत् कृतान्तो घटप्रभां तामवधारयस्व ॥ १७ ॥
या निर्विशङ्कं समुपागतानां मलापहारं तनुते जनानाम् ।
नेदीयसी ते नगराजकन्ये मलप्रभा साऽप्यमलप्रभाऽऽस्ते ॥ १८ ॥
यस्यास्तटे भक्तिमतां निधानं पुरं परं राजति पौण्डरीकम् ।
या सन्नतिक्षेत्रमलङ्करोति वर्वर्ति सा भीमरथी तवाऽग्रे ॥ १९ ॥
जटाकटाहाज्जगदीश्वरस्य हठात्तटं सह्यगिरेः प्रपन्ना ।
द्राक्षालतामण्डितपार्श्वभागा गोदावरी ते हृदयं धिनोतु ॥ २० ॥

महालसारूपमुपेत्य विष्णुस्तनोति यस्याः पुलिने निवासम् ।
तामिक्षुकेदारसमृद्धिरम्यां सभाजय त्वं प्रवरां महेशि ॥ २१ ॥
या मज्जनैः कुण्डिनसुन्दरीणां दधाति रम्यां मृगनाभिलेखाम् ।
सा पुण्यतोया वरदानशीले मुदं त्वदक्ष्णोर्वरदा ददातु ॥ २२ ॥
सिंहाचले मातृपुरे स्थिताया मनोज्ञबन्धां तव कीर्तिगाथाम् ।
गायन्ति यद्रोधसि शालिगोप्यः सेयं प्रणीता गिरिराजकन्ये ॥ ३२ ॥
वराहरूपस्य जनार्दनस्य स्वेदप्रवाहाज्जनिमादधाना ।
वानीरकुञ्जाञ्चितमञ्जुलश्रीः सैषा शिवे पुण्यपयाः पयोष्णी ॥ २४ ॥
यद्वीचिजाले कलहंसमाला हिन्दोललीलासुखमभ्युपैति ।
नृत्यन्ति तीरे शिखिनः सलीलं तापी सरित्सेयमगेन्द्रकन्ये ॥ २५ ॥
विधाय यस्याः सलिले विहारं भुक्त्वा मृणालानि सपल्लवानि ।
क्रीडन्ति वप्रेषु गजा यथेच्छं सा नर्मदा स्यात्तव शर्मदात्री ॥ २६ ॥
कृत्वा तटे सान्ध्यविधिं प्रभाते सङ्गृह्य यस्याः सरसीरुहाणि ।
विप्रा महाकालमुदर्चयन्ति शिप्रा समीपे वरिवर्ति सैषा ॥ २७ ॥
बिभर्ति या सैकतलीनहंसा दुकूलशोभां विदिशानगर्याः ।
तामम्बिके सस्यसमृद्धिधात्रीं नेत्रास्पदं वेत्रवतीं कुरुष्व ॥ २८ ॥
ध्वान्तच्छटानामिव घर्मरश्मिर्दुष्कर्मणां या कुरुते विनाशम् ।
सा रन्तिदेवोज्ज्वलवैजयन्ती चर्मण्वती त्वत्पुरतो विभाति ॥ २९ ॥
यस्यास्तटी वेदविदां द्विजानामग्न्याहितानामधिवासभूमिः ।
सैषा जगद्वन्द्यपदारविन्दे सरस्वती देवनदी प्रसिद्धा ॥ ३० ॥
निमज्जतां जातु निजप्रवाहे छिनत्ति या पातकमुन्नतद्रुम् ।
कृपाकटाक्षेण कृतार्थय त्वं शिवप्रिये तां शतधा शतद्रुम् ॥ ३१ ॥
हंसीव दुग्धोदकयोर्विवेकं या प्रागुदग्देशपृथग्विभागम् ।
करोति विद्वज्जनशब्दसिद्ध्यै सा वर्तते नूनमिरावतीयम् ॥ ३२ ॥
काश्मीरजस्य प्रथितो जगत्यां यत्तीरजातस्य यशःप्रकर्षः ।
चकास्ति सा प्रोद्धृतवीचिहस्ता वेदप्रशस्ता तटिनी वितस्ता ॥ ३३ ॥
कुल्याजलैर्व्रीहियवादिकानां क्षेत्राणि यस्याः प्रतियान्ति वृद्धिम् ।
प्रतीरसम्पादितभूरियागा सेयं जगत्स्वामिनि चन्द्रभागा ॥ ३४ ॥
निःसंशयं शैलसुते तुलायामन्ध्रूयते यस्य नदीसमूहः ।
तं बन्धुरं पश्चिमसिन्धुबन्धुं सिन्धुं त्वमानन्दय दृष्टिपातात् ॥ ३५ ॥
तुषारशीतेन जलेन यस्या निदाघतापं शमयन्ति लोकाः ।
सा चण्डिके खण्डितसर्वपाशा विभ्राजते त्वत्पुरतो विपाशा ॥ ३६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां सेवावसरस्तवः ॥

भूषास्तवः

प्रातः प्रबुद्धशतपत्रसपत्ननेत्रे
मातः सदाशिवमनोरथवैजयन्ति ।
आमूलचूलमनवद्यशरीरयष्टेः
सम्भूषणैस्तव भविष्यति को विशेषः ॥ १ ॥

रामणीयकनिधेर्निकेतनं कार्मणं शिवविलोचनस्य या ।
लोकरीतिमनुसृत्य केवलं सा त्वमावहसि मण्डनक्रियाम् ॥ २ ॥

द्रष्टुं तवाऽऽसेचनकं स्वरूपं योगीश्वरा दिव्यदृशः क्षमन्ते ।
अभ्यस्य नेपथ्यकलां त एव त्वामम्बिके भूषयितुं समर्थाः ॥ ३ ॥

मातश्चतुःषष्टिकलानिदानं त्वामेव निश्चप्रचमामनन्ति ।
तस्यास्तवाऽलङ्करणक्रियायां सखीजनः किं पटुतामुपेयात् ॥ ४ ॥

तव विनिर्जितपल्लवतल्लजे विरचितं चरणाम्बुरुहद्वये ।
इदमलक्तरसैरनुरञ्जनं भजति शैलसुते पुनरुक्तताम् ॥ ५ ॥

आसञ्जितं तव विभास्वरमङ्घ्रियुग्मे
रत्नाङ्गुलीयनिकुरम्बमगेन्द्रकन्ये ।
पातुं मरन्दमभितः समुपागतानां
शोभामुपैति कमले मधुमक्षिकाणाम् ॥ ६ ॥

शिक्षितुं गतिविलासचातुरीं पादलग्नमिव भक्तिपूर्वकम् ।
हंसकद्वयमिदं हिरण्मयं राजते तव वृषध्वजप्रिये ॥ ७ ॥

निहितं तव पादयोरिदं रमणीयं मणिनूपुरद्वयम् ।
समवाप्य पदं सुदुर्लभं तनुते देवि मुदेव शिञ्जितम् ॥ ८ ॥

मञ्जुस्वनत्काञ्चनकिङ्किणीकः शिवे तवाऽयं रशनाकलापः ।
करोति संश्रित्य नितम्बबिम्बं पिनाकिसम्मोहनमन्त्रजापम् ॥ ९ ॥

कलिता नवरत्ननिर्मिताः करशाखासु बहूर्मिकास्त्वया ।
विलसन्ति नगाधिपात्मजे तव लावण्यरसोर्मिका यथा ॥ १० ॥

अविरतमिह लब्ध्वा हस्तयोः सन्निधानं
तव वितरणलीलादर्शनाज्जातहर्षा ।
मणिगणपरिकीर्णा देवि झङ्कारदम्भात्
कलयति वलयालिः साधुवादप्रदानम् ॥ ११ ॥

अङ्गदं तव सुवर्णनिर्मितं पीतगौरभुजमध्यसंस्थितम् ।
चित्रमेतदगराजकन्यके जायते स्मररिपोरनङ्गदम् ॥ १२ ॥

वक्षःप्रदेशे तव लम्बमानो मुक्ताफलानामयमम्ब हारः ।
लुठन्निव त्वद्गुरुकूटपीठे विद्योतते जह्नुसुताप्रवाहः ॥ १३ ॥

नगेन्द्रकन्ये भुवनत्रयस्य त्वमेव लोके जननी प्रसिद्धा ।
तस्मादयं माणवकस्त्वदीयं मन्ये समाश्लिष्यति कण्ठदेशम् ॥ १४ ॥

अधिगतपरभागा मण्डलं तारकाणां
विहसति तव कण्ठे देवि नक्षत्रमाला ।
जगति विदितमेतत् संश्रयादीश्वराणां
भवति गुणयुतानां नित्यमुत्कर्षलाभः ॥ १५ ॥

नासिकाभरणमम्बतावकं स्वच्छमौक्तिकमरीचिभास्वरम् ।
सङ्गतं कुमुदबन्धुसन्निधौ भाति दैत्यगुरुमण्डलं यथा ॥ १६ ॥

गुम्फितं रुचिरकृष्णमणीभिस्तावकं जयति मङ्गलसूत्रम् ।
कालकूटकलनादपि नाऽभूद् यद्वशादशिवमम्ब शिवस्य ॥ १७ ॥

नेत्रयोर्विरचिता नगकन्ये भासते तव नवाञ्जनलेखा ।
वेधितुं हृदयमम्ब पुरारेः सूचिकेव कलिता मदनेन ॥ १८ ॥

ताटङ्कभूषणमुदञ्चितरश्मिजालं
प्रालम्बमानमनिशं श्रवणे त्वदीये ।
वन्दारुभक्तजनरक्षणयामिकस्य
स्वान्तस्य देवि भजते तव दीपभावम् ॥ १९ ॥

तुहिनांशुमरीचिमालिनौ नियतं राहुभयेन दुःखितौ ।
व्रजतस्तव कर्णपूरतामभयं याचितुमद्रिकन्यके ॥ २० ॥

अवतंसितां बकुलमञ्जरीं त्वया परितश्चरन्नवमरन्दलोलुपः ।
तरुणेन्दुचूडदयिते मधुव्रतस्तनुते तमालतरुपल्लवभ्रमम् ॥ २१ ॥

शिवनितम्बिनि भाति विशेषकस्तव कुरङ्गमदेन करम्बितः ।
अवसरं पतितुं नयनोत्पले भ्रमरबाल इव प्रतिपालयन् ॥ २२ ॥

पुष्पाणि जाम्बूनदनिर्मितानि न्यस्तानि केशेषु तवोज्ज्वलानि ।
घनान्धकारे स्फुरतामुडूनां भजन्ति सादृश्यकलां भवानि ॥ २३ ॥

सीमन्तदेशे परिकल्पितेयं सिन्दूरलेखा तव शैलकन्ये ।
संसूचयन्तीव महेश्वरत्वं कपर्दिनो राजति भाग्यरेखा ॥ २४ ॥

चिकुरपाशविधन्तुदपीडनाद् वदनचन्द्रमसं तव रक्षितुम् ।
वृतिरिव प्रतिभाति विनिर्मिता त्रिपुरसुन्दरि रत्नललाटिका ॥ २५ ॥

मुकुरस्तव रत्नमण्डितः कनकस्तम्भयुगे निवेशितः ।
जगदीश्वरि तत्र दृश्यतां निजरूपं जगदेकभूषणम् ॥ २६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां भूषास्तवः ॥

नक्षत्रमालास्तवः

तावकं कथमगेन्द्रकन्यके वर्णयामि महिमानमद्भुतम् ।
अश्विनीं रथगजेन्द्रसंयुतां या जिगेथ युधि दैत्यवाहिनीम् ॥ १ ॥
समरे महिषासुरस्य नाशाद् भुवनोपप्लवकारिणः प्रकामम् ।
श्रवणाभरणीबभूव मातस्तव कीर्तिर्दशदिग्विलासिनीनाम् ॥ २ ॥
अभिनवगजकृत्तिकां वसानः पितृवनवासपरायणः कपाली ।
तव करकमलग्रहेण नूनं नगतनये जगदीशतां बिभर्ति ॥ ३ ॥
कामये न धनधान्यसम्पदं नाऽपि राजभवने सभाजनम् ।
मुक्तिसौधशिखराधिरोहिणी भक्तिरस्तु तव पादपङ्कजे ॥ ४ ॥
नयनयोः सुषमामवलोक्य ते मृगशिरः समुपैति विनम्रताम् ।
तव शिवे वदनेन विनिर्जितः कुमुदबन्धुरपि क्षयमश्नुते ॥ ५ ॥
श्रवणान्तिकवासमादधाना कृतनीलोत्पलगर्वसर्वमोषा ।
शिशिरीकुरुतां भवार्दितं मां करुणार्द्रा तव दृष्टिरद्रिकन्ये ॥ ६ ॥
द्विषदाक्रमणादशिश्रियद्विपिनं यः सुरथो नराधिपः ।
स पुनर्वसुवृद्धिसंयुतस्तव मातः परिचर्ययाऽभवत् ॥ ७ ॥
निजभक्तिमतां निरामयं दिशसि त्वं पुरुषायुषं नृणाम् ।
धनधान्यसमृद्धिशालिनीं गिरिकन्ये परिपुष्यसि श्रियम् ॥ ८ ॥
त्वां दोषाकरशेखरां त्रिजगतां योषासु भूषायितां
शेषाशेषमुखाभिवर्णितयशोलेशां सुरेशार्चिताम् ।
ये ध्यायन्ति महेश्वरार्पितदृढाश्लेषां सुवेषान्वितां
तेषां सद्मनि बृंहितं गिरिसुते हेषा च संश्रूयते ॥ ९ ॥
तव पादसरोजसङ्गतं चिनुते यः शिरसा रजःकणम् ।
तरुणेन्दुशिखामणिप्रिये तमघानि प्रभवन्ति नेक्षितुम् ॥ १० ॥
कतिचिदत्र हरिं समुपासते कतिपये पुनरर्यमदैवताः ।
श्रुतिरहस्यविदो वृणते जनाः शरणमद्रिसुते भवतीं परम् ॥ ११ ॥
जिष्णुविष्णुविधिमौलिलालितं बिभ्रती पदमनन्यगोचरम् ।
जायसे मयि शिवे दयोत्तरा फल्गुनीति विदधाति विस्मयम् ॥ १२ ॥
ऊरुद्वयं तव विलोक्य चमूरुदृष्टे-
र्हस्तं निजं गजपतिर्मनुते विहस्तम् ।
स्तम्भायते शिवनितम्बिनि साऽपि रम्भा
सम्भावनां न लभते करभस्तुलायाः ॥ १३ ॥
चित्राचरित्रसरणिस्तव गोत्रकन्ये
नेत्रातिथित्वमुपयाति जगत्त्रयस्य ।

यत्त्वं स्वयं दृढतरं भवसङ्गताऽपि
दूरीकरोषि भवबन्धमुपासकानाम् ॥ १४ ॥
दयस्वातीव त्वं मम निरवलम्बस्य गिरिजे
तव स्वाम्यं लोके विधिहरिहराणामभिमतम् ।
विहाय त्वां चिन्तामणिमयनिवासां भगवतीं
क्व निःस्वः सद्योऽहं शरणवरणं देवि कलये ॥ १५ ॥
स्वर्गान्निरस्ता महिषासुरेण द्रुमा विशाखा इव कान्तिहीनाः ।
पुनः स्वकीयं पदमाप्तुकामास्त्वामेव भेजुर्विबुधा भवानि ॥ १६ ॥
स्फुरद्वंशीनादैस्त्रिभुवनमनोमोहनिपुणं
पतिं देवं नन्दात्मजमभिलषन्त्यः स्मरवशाः ।
विधातुं त्वत्पूजां क्षितिधरसुते गोपवनिता
अगच्छन् कालिन्दीपुलिनमनु-राधाप्रभृतयः ॥ १७ ॥
कृपाकटाक्षस्य तवाऽद्भुतस्य न यो जनो भाजनतामुपैति ।
जातादरा पर्वतराजकन्ये ज्येष्ठा स्वयं तं न चिराद् वृणोति ॥ १८ ॥
वात्या यथा शिवनितम्बिनि तूलपूलं
स्थूलं गणं हरति या सकलाशुभानाम् ।
मूलं स्वभक्तजनभाग्यपरम्परायाः
कूलङ्कषा जयति सा करुणा त्वदीया ॥ १९ ॥
वव्रे यदर्थमथ विप्रबटोरपूर्वा-
ऽऽषाढाजिनासनधरा तनुरीश्वरेण ।
तस्याः सुरासुरनरोरगवन्दितायाः
कर्तुं स्तुतिं तव कथं प्रभुतां भजेयम् ॥ २० ॥
निर्जित्य यः सुरपतिं वसुविश्वदेव-
ताराधिपादिसकलान् स्ववशे चकार ।
सोऽपि त्वया जननि बाहुबलावलिप्तः
शुम्भासुरो रणभुवि प्रसभं विजघ्ने ॥ २१ ॥
श्रवणं प्रवणं कुरु स्वकीयं श्रवणार्थं मम देवि भाषितस्य ।
तव पादयुगं श्रितस्य किं मे भवपाथोनिधिमज्जनं नु युक्तम् ॥ २२ ॥
जगन्मातः शम्भोः सहचरि नवाम्भोजनयने
निरालस्या ये त्वन्नियतवरिवस्यां विदधते ।
धनिष्ठानां तेषां त्वयि परमनिष्ठां कलयतां
मुखे वाणी लास्यं विरचयति दास्यं च नृपतिः ॥ २३ ॥
तुदति यस्तव भक्तमनागसं क्षितिधरेश्वरपुत्रि नराधमः ।
शतभिषक्सहितोऽपि गदार्दितस्त्वरितमेव स मृत्युमुपार्च्छति ॥ २४ ॥

यात्राप्रसङ्गे प्रमथाधिपेन युक्ता, कृतप्रोष्ठपदा त्वमम्ब।
स्थाणुश्रिता जङ्गमशैलसंस्था विभ्राजसे कल्पलतेव नूनम् ॥ २५ ॥
धन्या वदान्यां भुवनैकमान्यां ध्यायन्ति ये त्वां नगराजकन्याम्।
सञ्जायते तत्प्रतिहारभूमौ रेणूत्तरा भाद्रपदाभिघातैः ॥ २६ ॥

श्रीरेवतीरमणलाङ्गलसम्प्रहार-
त्रस्यत्कलिन्दतनयालहरीसतीर्थ्याः ।
भक्तव्रजे स्थिरतरां श्रियमादधाना
मातः पतन्तु मयि ते करुणाकटाक्षाः ॥ २७ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां नक्षत्रमालास्तवः ॥

नवरत्नमालास्तवः

सोममौलिदयिते त्वया विना को मदीयमघसञ्चयं हरेत्।
होमदानजपविप्रभोजनैर्लोममात्रमपि नाऽस्य हीयते ॥ १ ॥
क्षुद्रद्रुमाणां मलयाद्रिवाटीसंसर्गलाभादिव चन्दनत्वम्।
सञ्जायते देवि तव प्रसादादमङ्गलानामपि मङ्गलत्वम् ॥ २ ॥

जम्भारातिर्विनतविबुधश्रेणिसम्भावनीयः
प्राप्तः शापादवनतदशां क्रोधभट्टारकस्य।
आराध्य त्वां भगवति जगद्वन्द्यपादारविन्दां
भेजे लक्ष्मीं पुनरपि भुजस्तम्भमालम्बमानाम् ॥ ३ ॥

सकृदपि भुवनेशीं सर्वविद्यात्मिकां त्वां
हृदयकमलमध्ये सादरं चिन्तयेद् यः।
प्रभवति स भवानि त्वत्प्रसादात्सभायां
सुरगुरुमपि जेतुं वाग्विलासैर्विचित्रैः ॥ ४ ॥

मातस्त्वदीयं चरणारविन्दं ये सर्वसिद्धिप्रदमानमन्ति।
ते सन्ततं हन्त विनाऽपि यत्नादाशु क्रमादुन्नतिमाप्नुवन्ति ॥ ५ ॥
जयति तव कृपाकटाक्षपातः स्मरहरमानसहंसि संश्रितेषु।
अशनिरिव वसुन्धराधरान् यः सपदि भिनत्तितरां महान्तरायान् ॥ ६ ॥
जगदम्ब कुटुम्बिनि स्मरारेरविकं मां ग्रसते वृकः कृतान्तः।
अधुना समुपेक्षसे यदि त्वं शरणं कां वद देवतामुपेयाम् ॥ ७ ॥

चन्द्रिकामिव तुषारदीधितेरम्बुदस्य च यथा तडिल्लताम्।
मातराहुरनपायिनीं बुधास्त्वां निरन्तरमनङ्गवैरिणः ॥ ८ ॥

केतुः कृतान्तहतकस्य जगद्विजेतु-
हेतुर्भयस्य पलितं समुपाजगाम।
नेतुं भवाम्बुनिधिपारमनाश्रयं मां
सेतुर्भवेद् गिरिसुते करुणा तवैव ॥ ९ ॥

नगनन्दिनि तावकैर्गुणैर्ग्रथिता भक्तिपुरःसरं मया।
रुचिरा नवरत्नमालिका तव कण्ठाभरणत्वमाप्नुयात् ॥ १० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां नवरत्नमालास्तवः ॥

पादादिकेशान्तवर्णनस्तवः

यां कृत्वा वासवाद्याः प्रणमनसमये रत्नकोटीरकोटी-
सध्रीचीनां समर्था विबुधपरिवृढाः स्वस्वकार्ये भवन्ति।
या कस्तूरीतिबुद्धिं जनयति नियतं पामराणां नराणां-
भूयात्सा भूतिदात्री चरणकमलयोर्धूलिका कालिकायाः ॥ १ ॥
या लग्ना फालमूले करिकलभरदस्पर्धिनि स्वर्वधूना-
मेणाङ्कस्याङ्कलेखामधरयतितरामष्टमीसम्भवस्य ।
स्यन्दन्ते यत्प्रसादात्कविमुखकमलाद्वाङ्मरन्दस्य धाराः
सा धूली शूलिपत्न्याश्चरणकमलयोः पातु नः पापपङ्कात् ॥ २ ॥
भद्रा मुद्रा यदीया शिवहृदयगता वज्रपद्मादिरेखा-
लेखाभिर्भ्राजमाना परिहसति मुदा लाञ्छनं कैटभारेः।
साम्यं कार्श्यं मृणालं कलयति न मनाक्कोमलत्वे यदीयं
तन्नः पायादपायात्पदतलममलं सर्वदा शर्वपत्न्याः ॥ ३ ॥
सिद्धान्तं साङ्ख्यशास्त्रे प्रकृतिपुरुषयोः ख्यातमाख्यातुकामः
शेते यः प्रेतभावं गिरिदुहितुरुरीकृत्य पादाब्जमूले।
मीलन्नीलाम्बुजन्मप्रतिभटनयनोऽखर्वगर्वाभिषङ्गा-
दाकण्ठं कालकण्ठो ग्रसतु स निखिलं पापहालाहलं नः ॥ ४ ॥
रत्नप्रोताङ्गुलीयप्रकरकवचिता पद्मसंवर्ति काभिः
सन्नद्धा योद्धुमेषा किमिति वितनुते संशयं या जनानाम्।
सा प्रालेयाद्रिकन्याचरणयुगलकस्याङ्गुलिश्रेणिरस्मा-
न्नव्यादव्याजशोभा प्रणतिनुतिकृतां दीक्षिता भव्यदाने ॥ ५ ॥

लग्नं सीमन्तदेशेष्ववनतशिरसां स्वर्गसीमन्तिनीनां
स्फारं सिन्दूरशोभां कलयति पटलं यन्मयूखाङ्कुराणाम् ।
न्यक्कारं पद्मरागं नयति निजरुचा यत्तदस्मादृशानां
भक्तानां भूरि भद्रं वितरतु दशकं चण्डिकाया नखानाम् ॥ ६ ॥
सेवासन्नद्धदेवावलिमुकुट-शिखान्युप्तरत्नप्रभाभिः
किर्मीरं नीरजाभं विनतशिवजटाजूटचन्द्रार्धचुम्बि ।
सन्मार्गे दत्तचित्तं कमलभवकरोत्कीर्णदुर्वर्णपङ्क्ते-
रापन्नानां शरण्यं पदयुगमनिशं पातु नः कालिकायाः ॥ ७ ॥
शम्भोरम्भोजसाम्यं कृतककलिविधौ ताडने सन्दधानं
कोपाटोपात्प्रदत्तं महिषसुररिपोर्मूर्ध्नि दम्भोलिकल्पम् ।
तन्वानं ताण्डवान्ते निरवधिभुवनाभोगकम्पं नितान्तं
मुक्तीनां मातृगेहं कलयतु कुशलं शैलजायाः पदाग्रम् ॥ ८ ॥
मञ्जीरौ मञ्जुगुञ्जद्भ्रमरकलभकाक्षेपनिक्षिप्तचित्तौ
बिभ्राणं शाणलेखद्विगुणरुचिमणिस्तोमविन्यासकान्तौ ।
जङ्घानालाभिरामे चरणसरसिजे कर्णिकात्वं दधानं
कल्याणं सन्ततं नः प्रदिशतु घुटिकायुग्ममद्रेः सुतायाः ॥ ९ ॥
हैमं तूणीरयुग्मं पुरहरविजयाकाङ्क्षिणः पुष्पकेतो-
रालानं दुर्मदस्य प्रमथपरिवृढस्वान्तदन्तावलस्य ।
कान्तं वृत्तानुपूर्वं स्फटिकमणिशिलायष्टिशोभां दधानं
जङ्घायुग्मं शिवाया मम दुरितहतौ जाङ्घिकत्वं बिभर्तु ॥ १० ॥
आक्रामन्ती नखाग्राद् गरलमदभराद् घूर्णमाना सलीलं
दृष्टिः स्थित्वा मुहूर्तं त्यजति पशुपतेरध्वखेदं यदग्रे ।
लीलालावण्यलक्ष्म्याश्चिरतरमुपधानायमाने समाने
पातां ते सन्निपाताद्धिमगिरिदुहितुः सन्ततं जानुनी नः ॥ ११ ॥
रम्भादम्भापहारे विहितपरिकरं मत्तमातङ्गराज-
च्छुण्डादण्डाभिरामं त्रिभुवनभवनस्तम्भभावं दधानम् ।
रम्भादिस्वर्वधूटीकरपरिमलनारम्भसम्भावनीयं
चित्ते विद्योततां मे हरदघपटलीमूरुयुग्मं शिवायाः ॥ १२ ॥
यस्मिन्नावासभूते मणिमयरशनाकैतवान्मीनकेतो-
श्चन्द्रापीडस्य जेतुर्निनदति मधुरं डिण्डिमः सर्वकालम् ।
चञ्चच्चीनांशुपट्टद्युतिपटलमिषान्मालिका यत्र भाति
प्रालेयाद्रेः सुताया जघनमतिघनं सन्ततं तन्नमामि ॥ १३ ॥
यस्मिन्नेणाङ्कमौलेर्हिमगिरिकटकाकारधारिण्यभीक्ष्णं
स्वच्छन्दं मन्दमन्दं विचरति नयनापाङ्गभङ्गः कुरङ्गः ।

आयामं सन्निरोद्धुं कृतमिव रशनाबन्धनं यस्य सोऽयं
दुर्गायास्त्रायतां नः परिहसितसुधारश्मिबिम्बो नितम्बः ॥ १४ ॥
प्रत्यासन्नस्य दृष्ट्वा कुचकलशयुगस्योन्नतिं मत्सराग्नि-
ज्वालाजालावलीढः कलयति नितरां क्षीणतां यः क्रमेण ।
सानन्दं शून्यवादप्रतिनिधिपदवीमाददानाय तस्मै
मध्यायाद्रेः सुतायाः सततमिह नमोवाकमाकल्पयामः ॥ १५ ॥
धृत्वा रोमालिरज्जुं प्रथमरसपयःपूरितायां वतीर्णो
यस्यां नूनं विधत्ते रतिपतिरनिशं मङ्गलस्नानलीलाम् ।
केलिं यत्राऽऽतनोति प्रमथपतिमनोराजहंसश्च नित्यं
सा नस्तापं प्रणुद्याद् भवतपनभवं नाभिवापी शिवायाः ॥ १६ ॥
काञ्चीमध्येन्द्रनीलद्युतिनिकरमषीपूरिते नाभिपात्रे
विन्यस्ता शूलपाणेर्लिखितुमतनुना शासनादेशपत्रम् ।
नूनं विद्योतते या मरकतमणिभिर्लेखनीव प्रणीता
सा मा कामारित्न्याः समवतु सततं कोमला लोमराजिः ॥ १७ ॥
शेते कल्पान्तकाले परमविरलतामाददानेऽपि सर्वा
साभोगा राजिकावद्विधिहरहरिभिः साकमस्मिन् त्रिलोकी ।
इत्येवाख्यातुकामा द्युतिमति वलयो यत्र राजन्ति तिस्र-
स्तस्मिन् देव्या विधत्तां चिरतरमुदरे मानसं मे निवासम् ॥ १८ ॥
एषा पीयूषदिव्यद्रवभरितमहाशातकुम्भीयकुम्भी-
प्रत्यादेशात्तदीक्षा घुसृणमृगमदालेपविभ्राजमाना ।
उत्सङ्गासीनबालद्विपवदनकटस्पर्धयेव प्रवृद्धा
कात्यायन्या निदानं भवतु कुचतटी भूयसां श्रेयसां नः ॥ १९ ॥
जातः क्षीराम्बुराशेः शशधरकमलाकौस्तुभस्वर्वधूनां
सोदर्यो धार्यमाणः करकमलतले विष्णुना कम्बुराजः ।
लज्जां शोभावितानैरनुभवति चिरं निर्जितो येन तस्मिन्
कण्ठे शैलात्मजाया निवसतु मम धीः शम्भुहस्तोपगूढे ॥ २० ॥
युक्ता मुक्तालताभिश्छविपटलहृतध्वान्तपङ्क्तच्छटाभिः
संश्लेषे जातकम्पा पुरहरवलयीभूतसर्पाभिमर्शात् ।
बिभ्राणा सर्वकालस्फुटवदनसरोजन्मनालावभासं
पातात्पातादजस्रं हिमनगदुहितुः कन्धरा बन्धुरा नः ॥ २१ ॥
हस्ताग्रेणाभिमृष्टं तुहिनशिखरिणा वत्सलत्वात्सलीलं
चन्द्रापीडेन किञ्चिन्मुहुरधरसुधापानलोभादुदस्तम् ।
बिभ्राणं कम्बुकोटिप्रतिभटपदवीमास्पदं चारुतायाः
कल्याणानां कदम्बं वितरतु चिबुकं शैलराजात्मजायाः ॥ २२ ॥

बिम्बं माधुर्यहीनं कलयति जडतां विद्रुमोऽपि प्रकामं
म्लानिं बन्धूकपुष्पं व्रजति तदिह किं कल्प्यतां चोपमानम् ।
इत्थं साशङ्कवृत्तिर्भवति कविजनो वर्णने यस्य सिद्ध-
स्तन्नः पायादुमायाः शिवदशनपदैरङ्कितं दन्तवासः ॥ २३ ॥
वक्त्राम्भोजान्तराले विलसति रुचिरा केसरालिः किमेषा
व्योमभ्रान्त्या विशुद्धा वदनमुपगता किन्नु नक्षत्रमाला ।
एवं भ्रान्तिं सुराणामपि जनयति या भासमाना समाना
सा नः कुन्दप्रसूनद्युतिरवतु सदा दन्तपङ्क्तिः शिवायाः ॥ २४ ॥
दूरीकृत्याङ्कलेखां यदि भवति विधुः पार्वणः सर्वकालं
साधारण्यं यदीयं तदिह कथमपि प्राप्नुयाल्लेशमात्रम् ।
यल्लावण्यप्रवाहे शिवनयनयुगं विन्दते मीनमुद्रां
तन्नः संसारतापाद् वदनमनुपमं त्रायतामद्रिजायाः ॥ २५ ॥
श्रीकान्त ! स्वागतं ते कमलभव ! तपो वर्धते तावकीनं
स्वाराज्यं निःसपत्नं समवसि मघवन्नादितेयाः सुखं वः ।
इत्थं सम्मानपूर्वं त्रिदशसमुदयं बद्धहस्तं विलोक्य
प्रश्च्योतन्ती मुखेन्दोर्गिरिवरदुहितुर्वाक्सुधा तोषयेन्नः ॥ २६ ॥
दीनानां द्वाःस्थितानां प्रतिदिनममितस्वर्णमुद्रा ददानाः
सर्वैः सामुद्रिकानां बलवदभिमतैर्लक्षणैः सन्निरुद्धाः ।
छिन्नं मुण्डं कृपाणं वरमभयमपि प्रक्रमादादधाना-
श्चत्वारः शैलजाया विदधतु कुशलं पाणयः पल्लवाभाः ॥ २७ ॥
दैत्यस्त्रीगण्डलेखाघुसृणरसलिपिस्तेयशौण्डीर्यभाज-
स्त्रैलोक्यत्राणदक्षाः पुरहरविजये पाशभूताः स्मरस्य ।
केयूरैर्भासमानाः सुरतरुविटपस्पर्धिनः कोमलत्वे
संसाराम्भोनिधेर्नः क्षितिधरदुहितुर्बाहवः प्रोद्धरन्तु ॥ २८ ॥
यस्मिञ्छीतांशुमौलिः करिकलभरदस्पर्धिनि प्रेक्षमाणो
वक्त्राम्भोजं जटानां द्रढयति भुजगैर्विश्लथं जूटबन्धम् ।
धत्ते यत्कर्णपूरीकृतकमलगलत्केसरैः पिञ्जरत्वं
नित्यं हेरम्बमातुस्तदवतु रुचिरं गण्डयोर्मण्डलं नः ॥ २९ ॥
नैवेद्यीभूतमेतद् रतिमनसिजयोः शष्कुलीयुग्ममेवं
भ्रान्तिश्चित्ते जनानामुदयति नियतं दर्शनाद्यस्य सद्यः ।
यस्मिन् हिन्दोललीलामनुभवति नवं रत्नताटङ्कयुग्मं
देव्याः श्रोत्रद्वयं तद् व्यपनयतुतरामेनसां सञ्चयं नः ॥ ३० ॥
यस्यां भ्राजिष्णु मुक्ताफलमधरदलच्छायया शोणिमानं
सम्प्राप्तं कीरचञ्चूगतमनुकुरुते पक्वदाडिम्बबीजम् ।

यस्यां प्राणाभिधानो व्रजति पथिकतां सर्वकालं समीरः
कल्याणं सा विधत्तां मम दनुजनुषां नासिका शासिकायाः ॥ ३१ ॥
बिभ्राणा वत्सलत्वं गुहगजमुखयोर्दैत्यसङ्घे सरोषा
गङ्गायां साभ्यसूया तुहिनकरकलाशेखरे प्रेमपूर्णा।
भक्ते कारुण्ययुक्ता नमदमरगणे सौम्यतामादधाना
शोणा कोणान्तराले मधुजनितमदाद् दृष्टिरव्याच्छिवायाः ॥ ३२ ॥
दृष्ट्वा कान्तिं यदीयां पयसि शफरिका लीयते लज्जमाना
यद् दृप्तस्यातिमात्रं जनयति नियतं गञ्जनं खञ्जनस्य।
अन्तेवासं यदीयं भजति कुवलयं कर्णपूरत्वमेत्य
श्रीकण्ठस्य प्रियायास्तदवतु सततं लोचनानां त्रयं नः ॥ ३३ ॥
नासावंशात् किमेषा मरकतरुचिरा निर्गतापत्रपङ्क्तिः
शेते वा युग्ममारादसितभुजगयोः कुण्डलीकृत्य देहम्।
किं वा रोलम्बराजिर्नयनकमलयोरूर्ध्वमेषा प्रसक्ता
कुर्वाणा भ्रान्तिमित्थं हिमनगदुहितुर्भ्रूद्वयी नः पुनातु ॥ ३४ ॥
प्रालेयांशुप्रदीपे मुकुटतटलसत्पद्मरागादिनाना-
रत्नच्छायाविताने चिकुरजवनिकाभूषितप्रान्तदेशे।
रङ्गस्थाने ललाटे क्षितिधरदुहितुर्भक्तिसख्या समेता
चेतोवृत्तिर्नटी मे रुचिरतरमियं ताण्डवं सन्तनोतु ॥ ३५ ॥
श्रेणिं शोणाम्बुजानां दिनमणितनयावीचिजालान्तरस्थां
विद्युल्लेखां मनोज्ञां सजलजलधराभ्यन्तरे संस्थितां वा।
यस्मिन् विभ्राजमाना नियतमनुचरीकीर्तिसिन्दूरलेखा
देव्याः सीमन्तदेशः स भवतु सततं श्रेयसामास्पदं नः ॥ ३६ ॥
आयाता पातुमेषा वदनविधुसुधां किन्नु भोगीन्द्रकन्या
किंवा रोलम्बमाला मुखकमलरसास्वादबुद्ध्या समेता।
प्राप्ता ध्वान्तच्छटा वा वलयितुमखिलं वक्त्रपीयूषभानुं
शङ्कामित्थं ददाना समवतु दुहितुर्वेणिका मेनकायाः ॥ ३७ ॥
विष्वक्प्रत्युप्तनानाविधमणिकिरणव्यूहदम्भान्मघोनः
कोदण्डं चारुवर्णं चिकुरघनघटाभूषणं यत्तनोति।
आबाल्यात् सञ्चितानामघगणतमसां घस्मरं मद्विधानां
दुर्गायास्तत्किरीटं ज्वलदनलशिखाभास्वरं पालयेन्नः ॥ ३८ ॥
जीवातुः कैरवाणामुदयगिरिवनीनीपपुष्पं चकोरी-
नेत्रानन्दैकहेतुः कनकमयसुधापानपात्रं सुराणाम्।
स्वर्गङ्गाराजहंसो मदननरपतेर्विश्वजेतुः कृपाणः
सन्नद्धः स्कन्दमातुर्मणिमुकुटतटे पातु नो बालचन्द्रः ॥ ३९ ॥

ये ये ध्यायन्ति भक्त्या हिमनगदुहितुः प्रावृषेण्याम्बुवाह-
च्छायं कायं शरण्यं सकलतनुभृतां मङ्गलानां निकायम् ।
ये वा गायन्ति देव्याः परिचरणविधौ स्तोत्रमेतन्मदीयं
तेषां पुण्यं समर्थो भवति गणयितुं केवलं श्रीगणेशः ॥ ४० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां पादादिकेशान्तवर्णनस्तवः ॥

करुणास्तवः

न जानामि स्तोत्रं परमजटिले पूजनविधौ
न मन्त्रे तन्त्रे वा किमपि मम मातः परिचयः ।
त्रिधा सन्ध्योपास्तिं द्विजसमुचितां नाऽपि रचये
स्मरामि त्वत्पादाम्बुजयुगलमेव प्रतिदिनम् ॥ १ ॥
परस्त्रीकौलीने गुरुजनपरीवादसमये
मया वारं वारं प्रकृतिनिपुणत्वं प्रकटितम् ।
कृतं नीचैः सार्धं पललमदिरासेवनमहो
क्षमस्व त्वं मातः सकलमपि तद्वत्सलतया ॥ २ ॥
निधानं पूर्वेषां क्षितिगतमवाप्तुं व्यवसितं
विधानं यज्ञानामवमतिपदं चाऽपि गमितम् ।
पिधानं हस्ताभ्यां विहितमुपदेशे श्रवणयो-
रिदानीं ते मातः पदयुगमनायि स्मृतिपथम् ॥ ३ ॥
न गङ्गायां स्नातं विधिवदघसन्तानहतये
कृता भक्त्या नैव स्मरहरनगर्यां निवसतिः ।
षडङ्गा नाऽधीता श्रुतिरपि मया मूढमतिना
वयो नीतं सर्वं शिवशिव विलासैरनुचितैः ॥ ४ ॥
परिभ्रान्तं नारीवदनकमलालोकनधिया
विटैः साकं घण्टापथनगररथ्यापरिसरे ।
प्रसादो मूर्खाणां चरणपतनेनाऽपि जनितो
निगीर्णं ताम्बूलं बत यवनताम्बूलिककृतम् ॥ ५ ॥
स्थितं द्वारोपान्ते द्रविणमधिगन्तुं धनवतां
स्तुताः किं राजानो जठरभृतये चाटुवचनैः ।

प्रिया द्यूतोद्देशादजनि मम मातङ्गवसति-
र्निवासः पापानां कमिह वद यास्यामि शरणम् ॥ ६ ॥
(विशेषकम्)

जपापुष्पच्छाया नवनलिनदायादनयना
वसाना कौशेयं वसनमरुणं स्मेरवदना ।
सृणिं पाशं बाणान् धनुरपि च हस्तेषु दधती
कदा चन्द्रापीडा नयनपथमायास्यसि मम ॥ ७ ॥

मृषाजल्पे स्वल्पेतरपथिकवित्तापहरणे
दुराचारे पारेगिरमशुभगालीवितरणे ।
अहङ्कारे मारे कलहरचनायामपि मया
श्वपाकाः स्पर्धन्तां कथमिव वराका जडधियः ॥ ८ ॥

प्रयासेनाऽभ्यस्ता यवनभणितिः कुक्षिभृतये
विहाय स्वाचारं कृतमशुचिहूणानुकरणम् ।
कुतर्कोक्त्या जेतुं बुधजनसमाजं प्रयतितं
क्षमायाञ्चां कर्तुं तदपि न विलज्जे जडमतिः ॥ ९ ॥

यदा रामो रामाविति गुरुसकाशादपठिषं
तदा दर्पाटोपाद् बुधजनमवाजीगणमहम् ।
यदा मां जल्पाकं बलवदबभर्त्सद्गुरुजन-
स्तदा पश्चात्तापात्तव पदमुपाशिश्रियमिदम् ॥ १० ॥

अकार्षं केशानां युवतिरिव सीमन्तरचनां
प्रमोदादद्राक्षं नवमुकुरबिम्बे निजमुखम् ।
अगां नाट्यं द्रष्टुं खलसहचरैर्नाटकगृहं
परं ते नाऽस्मार्षं विजितकमलं पादयुगलम् ॥ ११ ॥

न साङ्ख्यं सङ्ख्यातं फणिपतिवचो नाऽध्यवचितं
न पीतं साहित्यं न परिकलितं जैमिनिमतम् ।
अनाघ्रातस्तर्को निगमशिखरं न श्रुतचरं
भवानि त्वां स्तोतुं कथमिव भवानि प्रभुरहम् ॥ १२ ॥

सुतं पांसुक्रीडामलिनमपि माता प्रियतया
कराभ्यामादत्ते निजवसनमालिन्यजनकम् ।
जगन्माता भूत्वा यदि मम समुद्धारणपरा
न शीघ्रं जायेथा अयि कथय किं वक्ष्यति जनः ॥ १३ ॥

गिरीशः कैलासे वसतु विजयासेवनपरः
श्रुतीनां व्यासङ्गात् क्षपयतु दिनान्यम्बुजभवः ।

सुखं पद्मानाथः स्वपितु कलशाम्भोधिजठरे
यदि त्वं जागर्षि त्रिभुवनपरित्राणकुशला ॥ १४ ॥
त्रिलोकीं कल्पादौ रचयति विरिञ्चात्मकतया
सलीलं तां धत्ते जलधितनयानायकमयी ।
क्षिणोति क्रोधात्तां त्रिपुरहररूपेण भवती
महाकल्पे बिन्दुप्रतिममणुरूपं कलयति ॥ १५ ॥
घृणा शङ्का लज्जा भयमथ जुगुप्सा नरपशुं
कुलं शीलं जातिर्निगडयति पाशाष्टकमिदम् ।
यथातन्त्रं भक्त्या तव चरणसेवापरवशः
स तस्मान्निर्मुक्तो व्रजति शिवसारूप्यसरणिम् ॥ १६ ॥
ध्रुवं ते लिप्सन्ते शशिशशकशृङ्गं जडधिय-
श्चिकीर्षन्ते व्योमप्रभवकुसुमानामवचयम् ।
निनीषन्ते वन्ध्यातनयमथ जामातृपदवीं
विवित्सन्ते मुक्तिं पदयुगमनादृत्य तव ये ॥ १७ ॥
भजन्त्येके विष्णुं कतिचन यजन्ते पुरभिदं
परे ज्योतिष्टोमप्रमुखमखजालं विदधते ।
विमुग्धास्ते हित्वा सकलफलदां कल्पलतिकां
निषेवन्ते मातः पनसबदरोदुम्बरतरून् ॥ १८ ॥
सहस्रं पद्यानां झटिति घटिकायां प्रकुरुते
गिरं द्राक्षापाकप्रतिकृतिधुरीणां निगदति ।
स षट्कं शास्त्राणां करबदरवत्पश्यति जनः
स्मरेद् यस्त्वां ब्रह्माऽच्युतमुकुटनीराजितपदाम् ॥ १९ ॥
स दृक्पातात्सर्पं सपदि हतदर्पं वितनुते
करस्पर्शादेव प्रशमयति शीतज्वरभरम् ।
प्रकृत्यन्धं कर्तुं प्रभवति नरं दिव्यनयनं
सकृत्त्वां ध्यायेद् यः सजलजलदश्यामलतनुम् ॥ २० ॥
स्वपँस्तिष्ठञ्जल्पन् पथिषु विचरन्नभ्यवहरन्
द्विवर्णं यो नाम स्मरति तव दुर्गेति मधुरम् ।
ध्रुवं तस्य भ्राम्यद् भ्रमरपटलीप्राङ्गणभुवं
गलद्दानासारैर्मदगजघटा पङ्क्लियति ॥ २१ ॥
समीहन्ते सेवां कतिचन नृणां लाघवकरीं
वणिग्वृत्तिं केचिद्दधति कृषिसक्ताः कतिपये ।
अहं तु त्वद्दास्येतरविधिपराचीनवदनो
जगज्जाने प्रातस्तुहिनकणिकाकल्पमखिलम् ॥ २२ ॥

त्वदीयं सौन्दर्यं प्रभवति न वक्तुं फणिपति-
र्न साक्षाद् वाग्देवी श्रवणसुभगालापकुशला ।
इतः किं वा ब्रूमः सकलयतिनाथः स्मररिपु-
र्यदेतेनाऽऽकृष्टो लुठति तव पादाम्बुजतले ॥ २३ ॥
समायातो द्रष्टुं तव वदनलावण्यमतुलं
शिवे राकाधीशः स्मयभरपराधीनहृदयः ।
अवेत्य स्वात्मानं विजितमुररीकृत्य लघुतां
चिरं दास्याकाङ्क्षी तव निटिलदेशे निवसति ॥ २४ ॥
पुरोधाः प्रत्यूषे कुशकिसलयाच्छादितकर-
श्चतुर्वक्त्रो नित्यं पठति मधुरं स्वस्तिवचनम् ।
व्ययायौ भाण्डारे गणयति नियुक्तः शिवसखो
महासेनः सेनापतिरसुरसेनां विजयते ॥ २५ ॥
सुधासूतिर्दीपाज्ज्वलयति निशीथे मणिमयान्
मधुर्मालाकारः स्फुटकुसुमहारं रचयति ।
प्रतीहारो जिष्णुर्भजति मिहिरो मागधपदं
समाधत्ते यादःपतिरजिरसम्मार्जनविधिम् ॥ २६ ॥
अमात्यो गोविन्दः श्रयति शितिकण्ठः सचिवतां
यमो न्यायाध्यक्षो जननि युवराजो गजमुखः ।
कृपाक्रीता दासा वयमथ सभापण्डितपदं
सुराचार्यो धत्ते जयति तव साम्राज्यमनघम् ॥ २७ ॥
श्रुतिस्त्वं मीमांसा त्वमसि भणितिस्त्वं फणिपतेः
स्वतन्त्रा तन्त्राणां त्वमसि सरणिस्त्वं स्मृतिरसि ।
त्वमुक्तिः काणादी कपिलमुनिवाक्यावलिरसि
प्रसिद्धा व्यासोक्तिस्त्वमसि कविता त्वं लिपिरसि ॥ २८ ॥
पशुत्वं मे नीपद्रुमविपिनदेशे तव वरं
न सा मुक्तिर्यस्यां भवति विरहस्त्वच्चरणयोः ।
वरं चाण्डालत्वं तव नवविधाराधनपरं
न विप्रत्वं यस्मिंस्तव चरणसेवाविमुखता ॥ २९ ॥
न लिप्से रम्भादिस्तनतटपरीरम्भसुभगं
पदं शौनासीरं मखशतविधानैकसुलभम् ।
न याचे सिद्धीनामणिममहिमाद्यष्टकमहं
तवोत्सङ्गे मातः शयनसुखमिच्छामि सततम् ॥ ३० ॥
समायान्तं दृष्ट्वा त्रिदशतटिनी मां निजतटं
महालोलोल्लोलैः प्रकटयति कम्पं भयवशा ।

अशक्तोऽहं गन्तुं स्मररिपुसमीपं वृषभया-
द्धरिर्निद्राधीनः कमिह शरणं यामि कथय ॥ ३१ ॥
निकायः पापानां मम समतिशेते हिमगिरिं
मदागःसङ्घातं गणयितुमशक्तो गणपतिः ।
तनुच्छायां लोकः परिहरति मे शङ्कितमतिः
क्व गच्छेयं कुर्वे किमिह शरणं न त्वदपरम् ॥ ३२ ॥
परित्यज्य क्षिप्रं नियतगृहकर्माणि जननी
रुदन्तं स्वं बालं मधुरवचनेनाऽनुनयति ।
चिरादाक्रोशन्तं भवफणिभिया सान्त्वयसि मां
गृहीत्वाऽङ्के प्रीत्या कथय न कथं विश्वजननि ॥ ३४ ॥
वियोगस्ते जातो विविधघटनाव्यापृततया
तथाप्यौदासीन्यं मयि न भवदीयं समुचितम् ।
प्रसक्तः क्रीडायां स्मरति निजमातुर्न पृथुकः
परं तस्याश्चित्तं स्मरणविमुखं किन्नु भवति ॥ ३४ ॥
जगन्मातः प्रातः कमलकमनीयं तव पदं
शिरोदेशे धृत्वा भवनिगडविच्छेदकुशलम् ।
रुदन्मन्दं मन्दं नयनसलिलप्लावितमुखः
कदा पाशान्मुक्तः क्षणमिव नयाम्यङ्ग दिवसान् ॥ ३५ ॥
शिरोदेशे वज्रं निपततु गिरिक्षोदनिपुणं
करालः कालाग्निर्दहतु मम गात्राणि नियतम् ।
मदीयं सर्वस्वं हतविधिवशाद् यातु विलयं
परं माभून्मातस्तव चरणपाथोजविरहः ॥ ३६ ॥
हरिस्त्वामाधत्ते हृदयकुहरे जेतुमखिलं
सुरारातिव्यूहं मदभरसमाक्रान्तभुवनम् ।
शिवोऽपि त्वां ध्यायन्ननवरतमद्रीशतनये
समादत्ते पीत्वा गरलमपि मृत्युञ्जयपदम् ॥ ३७ ॥
नमामः पादाब्जं तव सुरगणाधीशमुकुट-
स्फुरन्नानारत्नप्रकरकृतनीराजनविधि ।
यदीयामासाद्य प्रणतिसमये पांसुकणिकां
वशीकर्तुं कामः प्रभवति मुनीनामपि मनः ॥ ३८ ॥
तवाम्ब स्वर्योषाचिकुरनिकरन्यस्तबकुल-
प्रसूनप्रश्च्योतन्मसृणमधुधाराकलुषितम् ।
अमन्दं व्यालोलभ्रमरकलभालीमुखरितं
मदीयं कल्याणं दिशतु पदपीठं मणिमयम् ॥ ३९ ॥

कुपुत्राणामग्रेसरमविरतं पापजलधौ
निमज्जन्तं पात्रं करसरसिजालम्बनविधेः ।
यदि प्रक्रन्दन्तं जनमिममुपेक्षेत भवती
बरीभर्ति व्यर्थं ध्रुवमिह जगन्मातृपदवीम् ॥ ४० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां करुणास्तवः ॥

चित्रस्तवः

तरुणारुणकोटिसन्निभं वरुणाद्यैरमरैरुपासितम् ।
अरुणाधरपल्लवं भजे करुणाशालि कलत्रमैश्वरम् ॥ १ ॥
मधुरं तव कीर्तिगायनं मधुरम्भाफलतोऽपि चण्डिके ।
स धुरन्धर एव पापिनां विधुरं तेन यदीयमाननम् ॥ २ ॥
चरणं तव पङ्कजोपमं शरणं संसृतिसागरे मम ।
स्मरणं यदि तस्य नो भवेन्मरणं मे नियमेन जायताम् ॥ ३ ॥
गलितं मम गात्रमण्डलं पलितं न्यस्यति मस्तके पदम् ।
कलितं चरणाम्बुजं तव स्खलितं सर्वमपि क्षमस्व मे ॥ ४ ॥
जरसा परिपीडितो भृशं तरसा साधय मामकं वचः ।
नर सायुधपाणिकां शिवां स्मर सायुज्यपदस्य लब्धये ॥ ५ ॥
गरलं धनयौवनात्मकं तरलं ते कुरुते मनो यदि ।
सरलं कथयामि ते हितं स्मर लम्बालकशोभिनीमुमाम् ॥ ६ ॥
बलशासनशर्वपद्मभूजलशायिप्रमुखैरुपासिताम् ।
छलशाठ्यविवर्जितः शिवां कलशाभस्तनमण्डलां भज ॥ ७ ॥
नवनीतसमानमन्तरं तव नीलोत्पलदीर्घलोचने ।
अव नीचजनाग्रयायिनं भवनीराशयमध्यगं हि माम् ॥ ८ ॥
नरवाहनपूजितं करैः करवालादिधरं दयापरम् ।
नर वारिजलोचनं महः स्मर वामार्धहरं पिनाकिनः ॥ ९ ॥
अधुना कथयामि ते हितं मधुना तुल्यमुमायशः पिब ।
विधुनाति तदेनसां चयं विधुनाकेशपुरःसरैः स्तुतम् ॥ १० ॥
भवमानसराजहंसिके स्तवमालां रचयामि तावकीम् ।
अव मामवमाग्रगामिनं तव मातः पदपङ्कजाश्रितम् ॥ ११ ॥

नवनीरदकान्तिधारिणी स्तवनीया कमलासनादिभिः ।
अवनीधरकन्यका मयि प्लवनीतिं भवसागरे भजेत् ॥ १२ ॥
करतामरसाभिमर्षणाद् गरतापं स्वपतेर्जहार या ।
नरतामनुचिन्तयाऽम्बिकां वरताटङ्कविभूषितश्रुतिम् ॥ १३ ॥
समराहतदैत्यपुङ्गवां श्रमराभामगराजसम्भवाम् ।
अमराश्रितपादपङ्कजां नम राजीवविलोचनां सखे ॥ १४ ॥
नमनादिभिरम्बिकां भवश्रमनाशे निपुणां प्रतोषय ।
न मनागपि सम्भवेत्ततः शमनागारनिवासजं भयम् ॥ १५ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां चित्रस्तवः ॥

परिहासस्तवः

चिरतरमनुषक्तां स्वस्य गाम्भीर्यमुद्रां
क्षणमिह परिधूय प्राप्तवान् बालिशत्वम् ।
भगवति परिहासं कौतुकात् कर्तुकामः
कवयति तव मूढोऽप्येष पुत्रस्तृतीयः ॥ १ ॥
तातस्य ते जननि कश्चन गण्डशैलः
कैलास इत्यभिहितस्तुहिनाचलस्य ।
तत्राऽनिशं निवसतो न भवेत्पुरारेः
किं दुर्यशः श्वशुरगेहनिवासजन्यम् ॥ २ ॥
किं कम्बलादि परिशीलयतोऽपि लोके
नाऽऽलोक्यते गिरिजनस्य तुषारबाधा ।
दिग्वाससो विरलवस्त्रभृतां च मातः
का स्याद् दशा स्मररिपोरथवा गणानाम् ॥ ३ ॥
आच्छादिते हिमचयैः कृषिकर्मयोग्या
यस्मिन् गिरौ क्वचिदपि प्रथते न भूमिः ।
तत्र स्थितस्य वद कः स्वकुटुम्बपुष्टे-
र्भिक्षाटनात् पशुपतेरपरोऽस्त्युपायः ॥ ४ ॥
नेदीयसीं धनपतेरलकाभिधानां
रम्यां विलोक्य नगनन्दिनि राजधानीम् ।

वासं विचिन्त्य च निजं गिरिगह्वरेषु
भर्तुर्गणाः परिहसन्ति महेश्वरत्वम् ॥ ५ ॥
मित्रं जनस्य बहुधा समयानुरोधा-
ल्लोके तनोत्युपकृतिं धनधान्यदानैः ।
भर्तुः सखा तव पुनः कृपणः प्रसिद्धः
साहाय्यमम्ब वितरिष्यति किं कुबेरः ॥ ६ ॥
धत्तूरबिल्वकरवीरजपाकुरण्टै-
रुद्यानमम्ब युवयोर्निचितं विलोक्य ।
श्रीचन्द्रचूडमुपवीणयितुं समेताः
स्मेराननां दिविषदां गणिका भवन्ति ॥ ७ ॥
नन्दीश्वरेण कुसुमावचये नियुक्ता
मालूरकण्टकशिखाव्रणिताग्रहस्ताः ।
सीत्कारगर्भवदनाः प्रमथाः प्रभाते
निन्दन्ति शैलतनये निजभागधेयम् ॥ ८ ॥
माहेश्वरोपवनसम्भृतकेतकीना-
मुत्पाटने सरभसं प्रमथान् प्रवृत्तान् ।
दर्वीकरा निजसमाश्रयभङ्गभीताः
कृत्वा फणां महिषमर्दिनि तर्जयन्ते ॥ ९ ॥
हालाहलं लसति कण्ठगतं पुरारे
राशीविषाः पुनरमुष्य विभूषणानि ।
उद्यानभूरुपविषैर्घटिता तवाऽसौ
सन्दृश्यते विषमयः सकलः प्रपञ्चः ॥ १० ॥
एष प्रमात्वमधिगच्छति लोकवादः
प्रीतिर्यदन्धयति नेत्रयुगं जनस्य ।
शैलाधिराजतनये कथमन्यथा त्वं
भूताधिपं पशुपतिं ववृषे स्मरारिम् ॥ ११ ॥
सम्भाव्यते त्रिनयनस्य न रूपवत्ता
वित्तागमो यदि भवेन्न दिगम्बरत्वम् ।
अज्ञातजन्मनि कुतः कुलगौरवं स्यात्
को वा गुणस्त्रिपुरसुन्दरि चन्द्रचूडे ॥ १२ ॥
कन्याप्रदानमभिरूपतमाय नित्यं
पित्रा विधेयमिति शास्त्रमतं विलङ्घ्य ।
निःशङ्कमेव भवतीं ददतो हराय
जाड्यं मतेर्हिमगिरेरपि युक्तरूपम् ॥ १३ ॥

वस्त्राञ्चलस्य तव देवि विवाहकाले
ग्रन्थिं श्मशाननिलयस्य गजाजिनेन ।
आबध्नतः सपदि वृद्धपुरोहितस्य
हस्ताग्रयोर्द्विगुणवेपथुराविरासीत् ॥ १४ ॥

जन्यानुपागतवतः सह मातृकाभिः
भृङ्ग्यादिकान् समवलोकयतां पुरस्तात् ।
मार्तविवाहसमये तव सङ्गतानां
कोलाहलो भयवशादभवच्छिशूनाम् ॥ १५ ॥

ऊर्ध्वं विवाहविधितः सदनप्रवेशे
प्रस्थेनिधातुमगनन्दिनि धान्यजातम् ।
अन्विष्यतः शिवगणानभितो विलोक्य
मन्दं जहास मिलितस्तव बन्धुवर्गः ॥ १६ ॥

पीत्वा जगत्त्रयभयङ्करकालकूटं
धृत्वा च वासुकिमुखान् भुजगाञ्छरीरे ।
बालेन्दुमौलिरवितृप्त इवाऽधुनाऽपि
धत्तूरसेवनमगेन्द्रसुते करोति ॥ १७ ॥

यद्वाहनं बत जरद्गव एक एव
कृत्तिश्च यस्य वसनं भसितं विभूषा ।
श्रृङ्गग्रहेण तमिमं गिरिजे न जाने
वेदाः कथं त्रिजगदीश्वरमामनन्ति ॥ १८ ॥

येन प्रसह्य जगदन्तकरं करालं
लीलावशाद् गरलमद्रिसुते निपीतम् ।
क्षीराब्धिमन्थनसमुत्थितरत्नजाते
हा हन्त नैकमपि तस्य वशं बभूव ॥ १९ ॥

लोके जयन्तनलकूबरपूर्वकेषु
पुत्रेषु सत्सु धनधान्यसमृद्धिभाजाम् ।
को नाम भिक्षुकसुताय ददाति कन्या-
मद्यापि तेन तव देवि सुतः कुमारः ॥ २० ॥

गङ्गाऽपि देवि कृतभूरिजनार्तिभङ्गा
सङ्गादभूत्पुररिपोरनुभावहीना ।
नित्यं यतस्तदुदकेषु निमज्जतोऽपि
पङ्कं न नश्यति विधोर्गुरुतल्पगस्य ॥ २१ ॥

शैलात्मजे जगति हीनबलः सपत्नाद्
भीतः प्रभुं श्रयति कञ्चन रक्षणार्थम् ।

किं चन्दिरस्य फलमीश्वरसंश्रयेण
शान्ता यदस्य न मनागपि राहुबाधा ॥ २२ ॥

भस्मासुरान्निजवराधिगमेन हप्ता-
दात्मानमेव परिरक्षितुमम्बिके यः।
जङ्घाबलं वृषपतिः शरणं चकार
किं वर्णयामि वरदानविधिं तदीयम् ॥ २३ ॥

लङ्काधिपेन भुवनत्रयकण्टकेन
कैलासशैलशिखरे विधृते करेषु।
तत्रास देवि भवती गणनायकश्च
गण्डोपला इव गणाः सहसा निपेतुः ॥ २४ ॥

या त्वं सुधाकरमुखी परमाणुमध्या
भास्वद्रदा सकलयौवतमौलिमाला।
तस्याः सुतस्तव महेश्वरि वक्रतुण्डो
लम्बोदरः पुनरयं कथमेकदन्तः ॥ २५ ॥

विद्यामधीत्य सकलां प्रमथाधिनाथा-
दाराध्य भूरिकरुणां जगदम्बिके त्वाम्।
जातः स्वयं भृगुकुले बत जामदग्न्यो
राजन्यकं समवधीत् तव धर्मपुत्रः ॥ २६ ॥

पञ्चाननस्य तनयस्तुहिनांशुमौले-
र्जातः षडास्य इति युक्तमिदं विभाति।
चित्रं यदस्य भवसागरतारकस्य
पुत्रः पुनस्त्रिभुवनेश्वरि तारकारिः ॥ २७ ॥

शम्भुर्जिघत्सति हलाहलसेवनेन
नागाननः परिणमत्यधिमोदकाद्रि।
वक्त्राणि षड्वहति शक्तिधरस्त्वमेका
धन्याऽसि भोजयसि तान् स्वयमन्नपूर्णे ॥ २८ ॥

वृद्धोक्षमन्धकरिपुर्भवती मृगेन्द्रं
स्कन्दो मयूरमथ मूषकमेकदन्तः।
आरोहतीश्वरसखः पुरुषं कुबेरः
सर्वं शिवे ! तव कुटुम्बिजने विचित्रम् ॥ २९ ॥

विद्यास्तवैव सकलाः परिणामरूपा
वेदत्रयी तव विनिश्वसितं तथापि।

दोषान्वेषणतत्परान् प्रतिपदं रोषान्वितान् स्वामिनः
क्रूरान्निष्ठुरभाषिणः सविनयं दूरान्नमस्कुर्महे ॥ १८ ॥
नटा विटा वा गणिकाः खला वा कुर्वन्ति यस्यां नियताधिवासम् ।
न तां वयं राजसभां विशामो ग्राहावकीर्णामिव देवि सिन्धुम् ॥ १९ ॥
न सुधाभुजां बहुविधानुराधनं
वसुधाभुजां न गिरिजे मुधास्तुतिः ।
विलयं नयेत् तव दयैव केवलं
कुटिलाक्षराणि निटिलाङ्कितानि मे ॥ २० ॥
मातस्त्वदीयकरुणार्द्रकटाक्षपात-
व्याधूतमोहपटलः परिपूर्णकामः ।
पुत्रस्तवाऽहमवनीधरराजकन्ये
मन्ये तृणाय निखिलानपि भूमिपालान् ॥ २१ ॥
द्रष्टुं भूमिगतं हिरण्यकलशं न्यस्तं दृशोरञ्जनं
ताम्रं स्वर्णयितुं तुषाग्निषु मुषापाकोऽपि सम्पादितः ।
सङ्गः सम्पदवाप्तये पितृवने कापालिकानां कृतः
सर्वं व्यर्थमिदं भवेत्तव जगन्मातः प्रसादं विना ॥ २२ ॥
त्वं स्थूललक्ष्याऽपि नगेन्द्रकन्ये सूक्ष्मत्वमक्ष्णोरुररीकरोषि ।
नो चेत्कथं क्षुद्रतमो लभेत त्वदृष्टिपातं वद मादृशोऽपि ॥ २३ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायामौदार्यस्तवः ॥

क्षमापणस्तवः

मदागसां वर्धत एव राशिश्चाण्डालगेहेषु यथाऽस्थिकूटः ।
क्षमापणं तस्य विधातुकामस्त्वामर्थये किञ्चिदहं भवानि ॥ १ ॥
न पातकाद् यत्नशतेन मातर्निवर्तते मद्धृदयाभिलाषः ।
निवार्यमाणोऽपि बलाज्जनेन किं पांसुकेलिं विजहाति बालः ॥ २ ॥
न समाचरामि यदि पापसंहतिं
करुणा तवाऽम्ब विफलत्वमाप्नुयात् ।
यदि सम्भवं न लभते तमस्ततिः
क्व नु चन्द्रिका प्रकटयेत् स्वकौशलम् ॥ ३ ॥

नियतं क्षमाधरसुते त्वयि क्षमा
पदमादधाति यदि चित्रमत्र किम्।
प्रथते मतं जगति गौतमस्य यत्
समुपैति कार्यमिह कारणाद् गुणः ॥ ४ ॥

प्रत्यहं विहितवर्जनान्मम प्रत्यवायशतमम्ब जृम्भते।
तद्विपाकभयविक्लवान्तरस्त्वां विना कमपरं समाश्रये ॥ ५ ॥

क्षन्तुमर्हसि नितान्तवत्सला त्वं तु देवि मम मन्तुसन्ततिम्।
किं कुपुत्रचरितेन जायते मातृचित्तमपि रोषरूषितम् ॥ ६ ॥

जगदम्ब कथं क्षमा त्वदीया न सहस्राणि मदागसां सहेत।
नियतं कथयन्ति कोशकारा अपि सर्वंसहतां यतः क्षमायाः ॥ ७ ॥

क्षुद्रपातकशिलाविपाटनं कुर्वतां विविधतीर्थटङ्किकाः।
मादृशामघगिरीन् विदारयेत् केवलं तव शिवे क्षमाऽशनिः ॥ ८ ॥

त्वत्क्षमातरणिसंश्रयादहं सन्तरामि भवसागरं न चेत्।
शास्त्रवाक्यमगराजकन्यके न प्रमाणपदवीमवाप्नुयात् ॥ ९ ॥

प्रसभमुदयनाद्यैः कर्कशैस्तर्कवादैः
श्रुतिशतपरिपूतैः सर्वथा धिक्कृतोऽपि।
तव जननि कटाक्षक्षेपलब्धावकाशः
श्रयतु कलुषवृन्दं मामकं शून्यवादः ॥ १० ॥

श्रुतयोऽपि दिशन्ति निष्कृतिं श्रुतपूर्वे बत पातकव्रजे।
नहि निष्कृतिरम्ब मादृशामपराधेषु तव क्षमां विना ॥ ११ ॥

पापानां चेन्नाऽस्य दास्ये विपाकं मिथ्याभावं प्राप्नुयाच्छास्त्रवादः।
इत्येवं त्वं मास्म मंस्थाः, प्रसिद्धं पण्डापूर्वं किन्न मीमांसकेषु ॥ १२ ॥

कटुफलमनुभूय हन्त तेषामपि दुरितानि विहातुमक्षमं माम्।
त्वमपि न परिपासि चेद्विलुम्पेदयि शरणागतरक्षणप्रवादः ॥ १३ ॥

अभिनवनवनीतकोमलं ते हृदयमिति प्रथितं जनेषु मातः।
अहह तदपि मत्कृतापराधान् यदि न सहेत हतोऽस्मि मन्दभाग्यः ॥ १४ ॥

आर्तत्राणप्रथितकरुणा देवि मां सापराधं
पृष्ठे कृत्वा मधुरवचनैः शश्वदाश्वासयन्ती।
सन्नद्धस्य प्रकटदशनं चर्वितुं मामनाथं
गर्वं सर्वङ्कषमगसुते खर्वय स्वान्तकस्य ॥ १५ ॥

प्रभवन्ति गणं न पातकानां मम हन्तुं व्रतपूजनोपवासाः।
प्रबले वद किं ज्वरातिसारे विदधीरन्निह केवलाः कषायाः ॥ १६ ॥

भिषजोऽपि दिशन्ति वाग्भटाद्यास्तव नामस्मरणाज्ज्वरोपशान्तिम्।
कथमम्ब तव क्षमाभिधानं भवरोगं न रसायनं विहन्यात् ॥ १७ ॥

अक्षरत्रितयमेतदद्भुतं क्षम्यतामिति भवानि भावये।
यन्निशम्य विदधासि देहिनां निर्विशङ्कमपराधमर्षणम् ॥ १८ ॥

भजति न विनिवृत्तिं मानसं दुर्निवारं
क्षणमपि मम मातः सङ्क्रमाद् दुष्पथेषु।
भवति तदनुरोधादिन्द्रियाणां प्रवृत्तिः
शरणमचलकन्ये केवलं कल्पये त्वाम् ॥ १९ ॥

शुष्यत्कण्ठः करुणकरुणैरस्फुटैर्वाक्यजातै-
रश्रुक्लिन्नं मुखमवनतं लज्जया सन्दधानः।
भूयो भूयः सदयहृदयां प्राञ्जलिः प्रार्थये त्वां
क्षम्यन्तां मे हिमनगसुते कोटयः कल्मषाणाम् ॥ २० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां क्षमापणस्तवः ॥

कोपापनोदनस्तवः

आशैशवात्तव पदाम्बुजसक्तचित्तो
माहेश्वरः कुलपरम्परया महिष्ठः।
स्वप्नेऽपि दैवतमहं न परं स्मरामि
किं कारणं जननि कोपवशं गताऽसि ॥ १ ॥

श्रुत्वा विदग्धवदनात्तव कीर्तिगाथां
निःशङ्कमङ्कमहमाश्रितवाँस्त्वदीयम् ।
तं मां निरस्यसि बलादवधीर्य दूरं
किं कारणं जननि कोपवशं गताऽसि ॥ २ ॥

शुम्भादयो दितिसुतास्तव कोपवह्नौ
प्राप्ताः पतङ्गपदवीमुचितं तदेतत्।
पुत्रे पुनर्मयि निरागसि दीनदीने
किं कारणं जननि कोपमुपागताऽसि ॥ ३ ॥

माता त्वमेव जनको भगवान्महेशः
स्कन्दो गजेन्द्रवदनश्च सहोदरौ मे।
स्नेहोचिते मयि कनिष्ठतया सुतेषु
किं कारणं जननि कोपमुपागताऽसि ॥ ४ ॥

प्रायः श्रयन्ति विपथं तनयाः प्रभूणां
दोषो भवेत्तदिह कस्य न वक्तुमीशे ।
दुर्लालिते स्वयमहो मयि वत्सलत्वात्
किं कारणं जननि कोपमुपागताऽसि ॥ ५ ॥
हैय्यङ्गवीनमृदुलं हृदयं त्वदीयं
सद्यः कथं कठिनतां कलयेच्छिलायाः ।
दृष्टा न कण्टकततिः कुसुमे कदापि
किं कारणं जननि कोपमुपगताऽसि ॥ ६ ॥
पापाकरं न मकरं विजहाति सिन्धु-
र्व्याघ्रं नृशंसमटवी न निराकरोति ।
पृथ्वी विमुञ्चति खलं न विशृङ्खलं वा
किं कारणं जननि कोपवशं गताऽसि ॥ ७ ॥
किं चन्द्रिका सृजति वह्निकणप्रपञ्चं
कादम्बिनी वितनुते किमु रक्तवृष्टिम् ।
सूते च किं कमलिनी गरलं कदाचित्
किं कारणं जननि कोपवशं गताऽसि ॥ ८ ॥
बालो निदेशमवधूय हितं गुरूणां
भूयः स्वभावचपलः कुरुते प्रमादम् ।
तं बोधयन्ति गुरवो न परित्यजन्ति
किं कारणं जननि कोपवशं गताऽसि ॥ ९ ॥
स्नेहानुबिद्धहृदया गुरवः शिशूनां
नूनं महान्तमपराधमपि क्षमन्ते ।
वर्वर्त्सि तत्र करुणावरुणालयस्त्वं
किं कारणं जननि कोपवशं गताऽसि ॥ १० ॥
मान्या बुधेषु जननी जनिभूश्च पुंसां
स्वर्गादपि प्रणिगदन्ति गरीयसीति ।
श्रुत्वा तदाप्तवचनं समुपासरं त्वां
किं कारणं जननि कोपवशं गताऽसि ॥ ११ ॥
याता दिवं पितृपितामहमातुलाद्या
नीतोऽस्मि विस्मृतिपथं स्वजनैः समस्तैः ।
एका त्वमेव भुवने भवसि स्वकीया
किं कारणं जननि कोपवशं गताऽसि ॥ १२ ॥
क्रीडापरस्य मम शैशवमाशु यातं
हस्ताच्च्युतं सपदि यौवनमौक्तिकं च ।

दूतीव तिष्ठति जराऽन्तिकमन्तकस्य
किं कारणं जननि कोपवशं गताऽसि ॥ १३ ॥

विद्यां न वादिशमनीं विमलामवापं
निष्काञ्चनस्य मम नास्ति धनप्रसङ्गः ।
विद्याधनादिरहितस्य मदः कुतः स्यात्
किं कारणं जननि कोपवशं गताऽसि ॥ १४ ॥

वाक्पाटवादधिगतं विदुषां सभायां
नाऽऽभूषणं मणिमयं न हिरण्मयं वा ।
आसादितस्तव परं चरणावलम्बः
किं कारणं जननि कोपवशं गताऽसि ॥ १५ ॥

पुत्रद्वयं मम गुहो गणनायकश्च
योग्यं, सुतः पुनरयं विगुणो वराकः ।
एवं विचिन्त्य मयि किं भजसे विरागं
किं कारणं जननि कोपमुपागताऽसि ॥ १६ ॥

वैरस्यमेति जनको विकृते स्वपुत्रे
प्रीतिः सुतेषु गुणवत्सु पितुः प्रसिद्धा ।
माता परित्यजति नैव निजं कुपुत्रं
किं कारणं जननि कोपवशं गताऽसि ॥ १७ ॥

स्वे स्वे मते प्रतिनिविष्टधियो यथेष्टं
विद्वज्जना इह मिथो विवदन्तु नित्यम् ।
तत्त्वं परं तव पदाम्बुजतो न जाने
किं कारणं जननि कोपमुपागताऽसि ॥ १८ ॥

पूजाविधिं तव यथार्थतया न जाने
ध्यानेऽपि नो परिचयो न च कीर्तिगाने ।
आम्रेडयामि सततं तव नामधेयं
किं कारणं जननि कोपवशं गताऽसि ॥ १९ ॥

चित्तं शिरीषकुसुमादपि कोमलं ते
व्यत्यस्य हन्त मम भाग्यविपर्ययेण ।
वज्रादपि प्रकटयत्यतिनिष्ठुरत्वं
किं कारणं जननि कोपवशं गताऽसि ॥ २० ॥

मन्ये बिभर्ति तव पर्वतराजपुत्र्या
निःसंशयं कठिनतां हृदयं स्वभावात् ।
दृष्ट्वा विपन्नमपि मां दयसे न कस्मात्
किं कारणं जननि कोपवशं गताऽसि ॥ २१ ॥

आक्रन्दतोऽपि मम नैव शृणोषि वाचं
सम्मज्जतोऽपि न ददासि करावलम्बम् ।
पृच्छाम्यहं भुवनरक्षण-जागरूकां
किं कारणं जननि कोपवशं गताऽसि ॥ २२ ॥

दुष्टा दरिद्रमधमर्णमिवोत्तमर्णा
एते तुदन्ति मदमोहपुरःसरा माम् ।
आलोकयन्त्यपि कथं समुपेक्षसे त्वं
किं कारणं जननि कोपवशं गताऽसि ॥ २३ ॥

गर्ते पतन्तमवशं शिशुमन्यदीयं
शीघ्रं जनाः सकरुणा विनिवारयन्ति ।
नाऽवेक्षसे व्यसनगर्तगतं सुतं मां
किं कारणं जननि कोपवशं गताऽसि ॥ २४ ॥

उच्चावचानपि परिभ्रमता प्रदेशान्
प्राप्ता मया हतधिया न कपर्दिकाऽपि ।
मां देवि पालय, निभालय कूर्मदृष्ट्या
किं कारणं जननि कोपवशं गताऽसि ॥ २५ ॥

व्याधः पुरो धृतशरः परितो दवाग्नि-
र्यायान्मृगः क्व बत तत्सदृशीस्थितिर्मे ।
पार्श्वे पुरो रिपुजनाः शरणं त्वमेका
किं कारणं जननि कोपवशं गताऽसि ॥ २६ ॥

मिथ्यास्तुतिर्न विहिता वसुधाधिपानां
सम्भाविता न धनिका अपि चाटुवादैः ।
कालो ययौ मम तव स्तवकल्पनेन
किं कारणं जननि कोपवशं गताऽसि ॥ २७ ॥

सत्यं शपामि तव पादसरोरुहाभ्यां
स्वल्पोऽपि नास्ति मम दैवहतस्य दोषः ।
कर्णेजपस्य खलु कस्यचिदुक्तिभिस्त्वं
किं कारणं जननि कोपवशं गताऽसि ॥ २८ ॥

नाऽऽलोकसे सविनयं पुरतः स्थितं मां
नाऽऽभाषसे न कुशलं परिपृच्छसि त्वम् ।
विज्ञापयाम्यनुनयामि च साश्रुनेत्रः
किं कारणं जननि कोपवशं गताऽसि ॥ २९ ॥

कोपं जहीहि, विजहाहि तटस्थभावं
तन्द्रां परित्यज, निराकुरु दौर्मनस्यम्।
अङ्गीकुरुष्व करुणां, भज वत्सलत्वं
संरक्ष मां जगति भूरियशो लभस्व ॥ ३० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां कोपापनोदनस्तवः ॥

चरणारविन्दस्तवः

जयन्ति देवेन्द्र-ललाटलालिता हिमाद्रिकन्याचरणाब्जरेणवः।
महादरिद्रा अपि यत्प्रसादतो भवन्ति शीघ्रं विलसत्करेणवः ॥ १ ॥
जयन्ति दुर्गाचरणाब्जधूलयः प्रणम्रभक्तव्रजकल्पवल्लयः।
भवेद्ध्रुवं यत्कलनादिहापदां दिनोदयान्मिश्रतमिस्रवल्लयः ॥ २ ॥
जयन्ति सर्वार्तिनिवर्तनक्षमा नगात्मजापादसरोजपांसवः।
विधृत्य यान्मूर्धसु नाभिजन्मना वितन्यते भूमरुतोरपां सवः ॥ ३ ॥
जयत्यभीक्ष्णं शितिकण्ठवल्लभापदारविन्दद्वयसङ्गतं रजः।
बिभर्त्यहम्पूर्विकया सगौरवं यदुत्तमाङ्गे मघवा स्वभूरजः ॥ ४ ॥
जयन्ति चण्डीचरणावलग्नाः सरोजकिञ्जल्करुचः परागाः।
भवन्ति नूनं विषयैषिणोऽपि जना यदादानकृतोऽपरागाः ॥ ५ ॥
जयत्यमन्दामरवन्दनीयं पदारविन्दद्वयमम्बिकायाः।
भवन्ति सञ्चिन्त्य यदन्तकाले नराः स्मरारातिविडम्बिकायाः ॥ ६ ॥
जयत्यजस्रं तरुणारुणप्रभस्तुषारभूभृत्तनयाङ्घ्रिपल्लवः।
सदा यदाराधनशालिनां नृणां कदापि न स्यान्नियतं विपल्लवः ॥ ७ ॥
जयत्युमायाश्चरणः सदाश्रितः स्फुरत्प्रभाजालनिरस्तविद्रुमः।
वदान्यतायामुपयाति यत्तुलां न कामधेनुर्न च वासवद्रुमः ॥ ८ ॥
जयत्यशेषार्थिसमीहितप्रदं नगेन्द्रकन्यापदपङ्कजद्वयम्।
यदाश्रयप्राप्तिवशेन मन्महे महीमहेन्द्रानपि शष्पवद्वयम् ॥ ९ ॥
जयत्यहार्याधिपकन्यकापदं समुन्मिषच्चम्पकपुष्पकोमलम्।
यदाश्रयावाप्तिपरायणा जना भजन्ति कालत्रितयेऽपि नो मलम् ॥ १० ॥
जयत्युपेन्द्रद्रुहिणादिपूजितं पदं भवान्याः शरणास्पदं सताम्।
यदर्हतां पादयुगस्थितं रजो नयन्ति भूपा मुकुटावतंसताम् ॥ ११ ॥

जयत्यभीष्टार्थकरं नगात्मजापदद्वयं नूपुरनादभूषितम् ।
यदर्चनात्तत्परमानसं जनं बुधाः सुधाशं गणयन्ति भूषितम् ॥ १२ ॥
जयत्यमन्दं गिरिजापदद्वयं परिस्फुरत्पङ्कजकोशसुन्दरम् ।
नरस्य यद्ध्यानपरस्य विन्दते न धर्मराजादपि मानसं दरम् ॥ १३ ॥
जयत्यनूनद्युति चण्डिकापदं हठात्प्रदत्तं महिषस्य मूर्धनि ।
यदर्हणासक्तमतिर्महीपतिर्भवेद् द्विषन्मर्दनकृच्चमूर्धनी ॥ १४ ॥
जयत्युपास्यं महतां तपस्विनां वशंवदायाश्चरणं पिनाकिनः ।
यदर्चयन्ति प्रसरद्विभाभरैः किरीटरत्नैः शतशोऽपि नाकिनः ॥ १५ ॥
जयत्युदस्तं प्रणयापराधिनं शिवं प्रहर्तुं गिरिकन्यया पदम् ।
यदेकभक्त्या हृदये विचिन्तितं करोति दूरं सकलामयापदम् ॥ १६ ॥
जयत्यघघ्नं दुहितुः क्षमाभृतः परं विराजन्मणिहंसकं पदम् ।
नरो यदालम्ब्य तृणाय मन्यते परेतराजं भुवनप्रकम्पदम् ॥ १७ ॥
जयत्यशेषप्रणतार्तिभञ्जनं पदं भवान्याः शतपत्रगञ्जनम् ।
प्रदाय यज्ज्ञानमलं निरञ्जनं करोति शीघ्रं भवपारगं जनम् ॥ १८ ॥
जयत्युदञ्चन्नवपल्लवप्रभं प्रभञ्जनं दैत्यकदम्बसम्पदाम् ।
पदाम्बुजं शैलभुवः सुकोमलं मलं विधूनोति यदर्थिनामलम् ॥ १९ ॥
जयति शैलसुताचरणद्वयं स्तुतिपरैर्दिविषद्भिरुपासितम् ।
प्रणमतामनिशं तनुते यशो दशसु दिक्षु यदस्य कृपा सितम् ॥ २० ॥
जयति हैमवतीचरणद्वयी सरभसं प्रणमत्सुरमानवा ।
भवति भक्तिमतां यदुपाश्रयात् प्रतिदिनं सदनेषु रमा नवा ॥ २१ ॥
जयति भक्तहिता चरणद्वयी हिमगिरेर्दुहितुर्जितसारसा ।
वशमगात् सुरथस्य यदाश्रयात्परिचलच्चतुरब्धिरसा रसा ॥ २२ ॥
जयति शैलसुताचरणं दधत्पृथुनितम्बभरादलसंगतम् ।
सुरवराः प्रणमन्ति यदादरादनुरणन्मणिनूपुरसङ्गतम् ॥ २३ ॥
जयति चन्द्रशिखामणिवल्लभापदसरोरुहमाश्रितकामदम् ।
वितरणे विदधीत यदग्रतः सुरभिकल्पलतादिषु का मदम् ॥ २४ ॥
जयति चन्द्रकिरीटकुटुम्बिनीपदयुगं भवबन्धविनाशनम् ।
गिरिगुहासु तपस्यति यत्कृते मुनिजनो नियमेन विनाऽशनम् ॥ २५ ॥
जयति कामविरामकृतः प्रभोर्मृगदृशो जिततामरसं पदम् ।
यदवलम्बनगर्वभरान्नरस्तृणयति प्रचुरामरसम्पदम् ॥ २६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां चरणारविन्दस्तवः ॥

नमस्कारस्तवः

यामेधमानकरुणा मुरुनामधेयां
    द्यामेति वीतकलुषः पुरुषः प्रपन्नः ।
तामेकदन्तजननीं जनतापहन्त्रीं
    कामेश्वराङ्कनिलयां ललितां नमामः ॥ १ ॥

रम्भोर्वशीप्रमुखदेववधूविराजद्-
    दम्भोलिभृन्मुकुटचुम्बितपादपीठाम् ।
अम्भोजदीर्घनयनां भयनाशदक्षां
    शम्भोरुदारचरितां दयितां नमामः ॥ २ ॥

सन्द्रारवेण गगनं परिपूरयन्ती
    सन्द्राव्य या दितिसुतान्महिषं जघान ।
चन्द्रार्धचूडवनितां विनतावने तां
    तन्द्राविहीनहृदयां सदयां नमामः ॥ ३ ॥

नाकाधिपार्चितपदा भजतां जनानां
    या कामपि प्रतनुते धनधान्यवृद्धिम् ।
डाकार्णवादिविविधागमसंस्तुतां तां
    राकासुधाकरमुखीं गिरिजां नमामः ॥ ४ ॥

यामाश्रितेषु नहि दर्शयितुं क्षमन्ते
    कामादयोऽपि सहसा स्वबलावलेपम् ।
वामाङ्गमन्धकहरस्य विभूषयन्तीं
    तामात्मजां क्षितिधराधिपतेर्नमामः ॥ ५ ॥

वागाधिपत्यमधिगच्छति सम्पदश्च
    नागान् हयानपि नरो भुवि यत्प्रसादात् ।
यागादिकर्मफलदां जगदम्बिकां तां
    द्रागार्तभक्तजनदुःखहरां नमामः ॥ ६ ॥

दाधाघ्वदाबिति मुहुः पठनेन किं स्या-
    दाधातुमर्हति फलं किमु धातुपाठः ।
या धातृहस्तलिखितान् परिमृज्य वर्णान्
    बाधां निवारयति तामगजां नमामः ॥ ७ ॥

मायावशाद् रचयितुं भुवनत्रयं या
    नायासलेशमुपयाति निर्बर्हितुं वा ।
छायाप्रियानलकलानिधिलोचनां तां
    जायां हरस्य भवतापहरां नमामः ॥ ८ ॥

याचामहे कमपि नैव वयं यदन्यं
या चामरैः सुरवरैरुपवीज्यते च ।
वाचालिता दश दिशः स्तवनैर्यदीयै-
राचान्तदैत्यपृतनां युधि तां नमामः ॥ ९ ॥

व्यापारयन्ति बहु यद्गुणवर्णनाय
शापायुधा निजगिरं न च पारयन्ति ।
पापापनोदनिपुणां परमेश्वरीं तां
चापाशुगाभयकरां वरदां नमामः ॥ १० ॥

आशाधिपा विरचिताञ्जलयो यदाज्ञां
पाशायुधप्रभृतयः शिरसा वहन्ति ।
नाशाय सम्भवति या सुरविद्विषां तां
काशाभकीर्तिमगराजसुतां नमामः ॥ ११ ॥

सन्दानितं दृढतरं चरणे यदीये
मन्दादरं वितनुते विषयेषु चित्तम् ।
मन्दारवृक्षकुसुमाञ्चितकुन्तलां तां
वन्दारुभक्तजनकल्पलतां नमामः ॥ १२ ॥

लङ्कापतेः समिति यत्कृपयैव सैन्यं
कङ्कालशेषमकरोद् रघुवंशवीरः ।
अङ्काश्रयप्रणयिनीं पुरवैरिणस्तां
पङ्कात्मजन्म-दलदीर्घदृशं नमामः ॥ १३ ॥

त्वङ्कारगर्भवदनं सदनं मदस्य
कङ्कादिभक्ष्यमतनोन्महिषासुरं या ।
पङ्काश्मराशिषु पदस्मरणं च यस्या-
श्टङ्कात्मतां भजति तां नगजां नमामः ॥ १४ ॥

अङ्गारको व्रजति न प्रतिकूलभावं
भङ्गाय यत्पदजुषां न शनैश्चरोऽपि ।
अङ्गारकल्पभवदाहशमक्षमां तां
गङ्गाधरस्य गृहिणीं सततं नमामः ॥ १५ ॥

भृङ्गायते मुनिजनस्तुहिनक्षमाभृ-
च्छृङ्गाश्रयश्रणतामरसे यदीये ।
श्रृङ्गारकल्पलतिकां मदनद्विषस्तां
भृङ्गारशूलशरचापकरां नमामः ॥ १६ ॥

जातादराः सुकृतिनो यदुपासनायां
वाताभ्रविभ्रममिदं जगदामनन्ति ।

आताम्रनेत्रकमलां विमलाशयां तां
शातात्मभक्तविपदं त्रिपुरां नमामः ॥ १७ ॥
वान्तान्नवद्विषयभोगमपास्य दूरं
शान्ताशया मनसि यामनुचिन्तयन्ति ।
तां तालपत्रपरिकलिपतकर्णपूरां
कान्तां मृगाङ्कमुकुटस्य वयं नमामः ॥ १८ ॥
यन्तुः शताङ्ग इव सम्यगुपात्तरश्मे-
र्गन्तुं न वै यदवशं क्षमते प्रपञ्चः ।
तन्तुः पटादिव न या गिरिशाद् विभिन्ना
मन्तुं विमृष्यति च तां जननीं नमामः ॥ १९ ॥
सम्पादिताऽपि कमला बहुधा यदीयां
शम्पासमा भवति हन्त विनाऽनुकम्पाम् ।
कं पातकं हरति या न नृणां प्रसन्ना
कम्पार्तिदां महिषवर्म्मणि तां नमामः ॥ २० ॥
आराधनेन दृढभक्तियुतेन यस्या
दारात्मजान् गृहपशून् लभते मनुष्यः ।
कारागृहाद् भवति यत्स्मरणाद् विमुक्ति-
स्तारां स्थितां सकलमूर्धनि तां नमामः ॥ २१ ॥
धाराधरः सलिलवृष्टिमिवाऽप्रमेयां
स्फारां श्रियं दिशति यत्करुणाकटाक्षः ।
नारायणादृतपदां वरदायिनीं तां
वाराणसीपुरपतेर्महिलां नमामः ॥ २२ ॥
हालाहलं वहति कण्ठगतं महेशः
कालानलं च नयने यदनुग्रहेण ।
बालानुगुम्फितसुरद्रुमपुष्पमालां
बालां हि तां तुहिनसानुमतो नमामः ॥ २३ ॥
कम्बोर्गलः सदृशतामुपयाति यस्याः
शम्बोऽपि यत्पदनतं न विहन्तुमीष्टे ।
सम्बोध्य मातरिति भक्तिवशंवदां तां
लम्बोदरस्य जननीमसकृन्नमामः ॥ २४ ॥
या त्रायते जगदिदं दनुजान्निषूद्य
यात्रादिषु स्मृतिकृतां विधुनोति बाधाम् ।
मात्राऽपि नाऽन्यविबुधेषु यदूर्जसस्तां
धात्रार्चितां पुरभिदः प्रमदां नमामः ॥ २५ ॥

व्यासादयोऽपि कलयन्ति न यत्स्वरूपं
दासायते नरपतिर्यदुपासकस्य ।
नासाविभूषणधरां त्रिपुरेश्वरीं तां
हासावधीरिततुषारचयां नमामः ॥ २६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां नमस्कारस्तवः ॥

राशिस्तवः

तरुणारुणप्रभमचिन्त्यवैभवं करुणामयं कमलदीर्घलोचनम् ।
सृणिपाशचापशरहस्तमस्तु मे निगमस्तुतं किमपि वस्तु शर्मणे ॥ १ ॥
तव भवदयिते कृपाप्रसादाद् ध्रुवमवलङ्घ्य नरो भवाम्बुराशिम् ।
नवनवसुखसम्पदां निदानं शिवभवनं समुपैति वीतशङ्कः ॥ २ ॥
अयि मेषशिशुं वृको यथा ग्रसितुं मां शमनः समीहते ।
शरणं चरणाम्बुजद्वयं तदिदानीं कलयामि तावकम् ॥ ३ ॥
जगदम्ब वृषध्वजप्रिये वृषमुख्यामर-वृन्दवन्दिते ।
करुणामृतवर्षणं तव प्रशमं मे भवतापमानयेत् ॥ ४ ॥
मातस्त्वया विनिहते महिषाभिधाने
दैत्याधिपे रणमुखे निजविक्रमेण ।
संश्रित्य नन्दनवनं पुनरप्यभूवन्
क्रीडापराणि मिथुनानि सुधाशनानाम् ॥ ५ ॥
चित्तं निसर्गचपलं मम दुर्निवारं
हित्वा श्रुतिप्रणिहितां सरणिं वरेण्याम् ।
यद् बम्भ्रमीति विपथेषु किमाचरामि
किं कर्कटो जननि वक्रगतिं जहाति ॥ ६ ॥
कृपाकटाक्षस्तव सर्वकालं वर्वर्ति यद्रक्षणजागरूकः ।
विघ्ना न तं बाधितुमुत्सहन्ते दुर्गे शृगाला इव सिंहशावम् ॥ ७ ॥
अज्ञानदोषाभिभवादधन्या अन्यान्यदेवार्चनमाचरन्तु ।
वयं समासादिततत्त्वबोधा मन्यामहे केवलमद्रिकन्याम् ॥ ८ ॥
तव भक्तिपरायणः शिवे त्वयि विन्यस्तसमस्तनिर्भरः ।
अतुलां श्रियमुन्नतं पदं लभते मुक्तिसुखं च शाश्वतम् ॥ ९ ॥

शतवृश्चिकदंशवेदनानामनुभूतिं भजतो ममाऽन्तकाले ।
वदने विनिधेहि सानुकम्पं निजनामामृतभेषजं त्वमम्ब ॥ १० ॥
प्रहरति धनुषा पिनाकपाणिं शिरसि किराततनुं पृथातनूजे ।
अपि सकरुणमक्षि निक्षिपन्ती मयि न कथं सदयोदयोज्ज्वलासि ॥ ११ ॥

कामादयो गिरिसुते मकराः कराला-
स्तिष्ठन्ति मां निगलितुं कलितावधानाः ।
एतान्निहत्य यदि रक्षसि मामनाथं
स्यात् षड्गुणं तव यशो यशसो मुरारेः ॥ १२ ॥
किं वर्णयामि महिमानमहं त्वदीयं
यस्याः पदाम्बुजरजः कणिकाप्रसादात् ।
दानोल्लसद्-द्विरदकुम्भतटाधिरूढां
लक्ष्मीं जनः समधिगच्छति दुर्गतोऽपि ॥ १३ ॥

यं तृतीयनयनस्थवह्निना भस्मसादकृत भूतिभूषणः ।
सोऽपि जीवनमवापितस्त्वया विश्वजिज्जननि मीनकेतनः ॥ १४ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां राशिस्तवः ॥

रथोद्धतास्तवः

कः क्षमेत महिमानमूहितुं कस्तव स्तवविधौ च शक्नुयात् ।
अम्बुराशिगतरत्नसञ्चयं कल्पतां गणयितुं कथं नरः ॥ १ ॥
एतदर्भकनिसर्गचापलं धृष्टतेयमतिबालिशोचिता ।
यत्त्वदीयगुणवर्णनाविधौ मादृशस्य गिरिजे समुद्यमः ॥ २ ॥
नास्ति यत्र चतुरश्चतुर्मुखो यत्र मौनमयते सरस्वती ।
तत्र देवि तव कीर्तिवर्णने के वयं प्रकृतिमूढबुद्धयः ॥ ३ ॥
सम्प्रवर्तयति नस्तव स्तुतौ त्वत्कथामृतरसस्य माधुरी ।
ब्रह्मणां जगति सर्वविश्रुता प्रीतिरीतिरपि मिष्टवस्तुनि ॥ ४ ॥
विन्दते कुलवधूरिवाऽऽदरं स्तावकस्य कविता तवाऽम्बिके ।
वारयोषिदिव राजशंसिनां सम्प्रयाति कविता विगर्हणम् ॥ ५ ॥
शब्दशास्त्रविषयः परिश्रमस्तर्कशास्त्रविषयश्च निष्फलः ।
यत्त्वदीयमहिमानमम्बिके शास्त्रयुग्दृगपि नेक्षितुं क्षमः ॥ ६ ॥

विस्तरेण कृतिनः कवीश्वरास्त्वां स्तुवन्तु न तथा क्षमोऽस्म्यहम् ।
ब्रूहि देवि निजमातृशंसने कल्पते किमु सुतस्य भारती ॥ ७ ॥
त्वां वदन्तु कवयो विपश्चितः सर्वलोकमहितां महेश्वरीम् ।
तन्न देवि गणयामि चण्डिके मत्कृते भवसि मामिकाऽम्बिका ॥ ८ ॥
मां नितान्तमपराधसङ्कुलं मा कुरुष्व निजरोषभाजनम् ।
युज्यते प्रियजनोपरि ध्रुवं किं शिवे प्रियजनस्य कोपनम् ॥ ९ ॥
स्वर्गभोगरसिका वितन्वतां कर्मकाण्डजटिलां मखक्रियाम् ।
निःस्पृहा जननि संश्रयामहे केवलं तव पदाम्बुजद्वयम् ॥ १० ॥
अक्षरक्रमविवेकवर्जिता भुक्तिमुक्तिनिरता निरन्तरम् ।
तत्त्वबोधनिपुणा नगात्मजे भक्तिमेव तव कामयामहे ॥ ११ ॥
एकमेव तव रूपमम्बिके भिन्नभिन्नमिव भाति पश्यताम् ।
बिम्बितं मणिकृपाणदर्पणे भासते मुखमनेकधा यथा ॥ १२ ॥
स्वस्वशास्त्रविनिविष्टचेतसां जायतां जननि वादसङ्गरः ।
तत्त्वबोधहतसम्भ्रमा वयं त्वामनन्यशरणा उपास्महे ॥ १३ ॥
निष्प्रभत्वमुपयाति तत्क्षणं दाहशक्तिरहितो यथाऽनलः ।
शैलनन्दिनि तथा त्वया विना स्पन्दितुं परशिवोऽपि न क्षमः ॥ १४ ॥
चन्द्रिका तुहिनदीधितेर्यथा तोयदस्य च यथा क्षणप्रभा ।
शुम्भनाशिनि लतेव शाखिनो भासि भर्तुरनपायसङ्गता ॥ १५ ॥
कश्चिदध्वरविधौ प्रवर्ततां कश्चिदाचरतु दुष्करं तपः ।
मत्कृते सकलमेव निष्फलं यत्र नास्ति तव देवि चिन्तनम् ॥ १६ ॥
नास्ति मे किमपि पार्थिवैः फलं नास्ति राजपुरुषैः प्रयोजनम् ।
वाञ्छिताधिकवरप्रदायिनी संश्रिता त्रिभुवनेश्वरी मया ॥ १७ ॥
देशमद्रिवनदुर्गसङ्कुलं बम्भ्रमीतु धनलिप्सया जनः ।
विन्दते भवदुपासकः फलं यन्मनोरथशतैरगोचरम् ॥ १८ ॥
भालपट्टलिखितां स्वयम्भुवा दुर्लिपिं सकललोकदुस्त्यजाम् ।
हेलयैव परिमार्ष्टि सङ्गतस्त्वत्पदाम्बुजभवो रजःकणः ॥ १९ ॥
त्वां विहाय सकलार्थदायिनीं किन्नु दैवतशतैः प्रयोजनम् ।
को विधूय तपनीयमुद्रिकां क्षुद्रताम्रकपणान् समाहरेत् ॥ २० ॥
विष्णुरुद्रकमलासनादयो बालका इव वशंवदा अमी ।
त्वद्भ्रुवः समधिगम्य सूचनां स्वस्वकर्मसु यथेच्छमीशते ॥ २१ ॥
अद्वयं भवति सम्मतं मतं स्वीकरोति यदि तत्तव स्थितिम् ।
अन्यथा श्रुतिशतैः समर्थितं युक्तियुक्तमपि नाऽऽद्रियामहे ॥ २२ ॥
वर्णयन्ति तव रूपमद्भुतं यन्महेशनयनैकगोचरम् ।
विश्वमातरवलोकयाम्यहं तत्कथं पुनरनेन चक्षुषा ॥ २३ ॥

चौरवद्धृदयदेशमेत्य यः कर्म कारयति रौरवप्रदम् ।
तं निहंसि यदि शौरिवन्दिते काममम्ब तव गौरवं स्तुमः ॥ २४ ॥
तावकोक्तिरिति हेतुना श्रुतिर्या प्रमाणपदवीं प्रपद्यते ।
सा स्थितिं तव कथं नु बाधतां साम्प्रतं किमुपजीव्यबाधनम् ॥ २५ ॥
यत्समाधिविधिसम्भवं सुखं प्राप्नुवन्ति हठयोगसेविनः ।
त्वत्पदाम्बुरुहभक्तिजन्मनस्तत्सुखस्य नहि षोडशी कला ॥ २६ ॥
जायते न तव भक्तिशालिनामन्यदैवतमुपासितुं स्पृहा ।
स्वर्गसिन्धुसलिलावगाहिनां पल्वलोदकनिमज्जने यथा ॥ २७ ॥
चण्डिके तव पदाब्जसेविनामन्यदेवसमुपासनं वृथा ।
भाष्यमाकलयतां पतञ्जलेर्मुग्धबोधपरिशीलनं यथा ॥ २८ ॥
नास्ति देवि तव नामजापिनां पापिनां नरकपातजं भयम् ।
गच्छतां शिबिकया न सम्भवेत्कण्टकादिजनितं पदक्षतम् ॥ २९ ॥
बाधते न तव दास्यतत्परान् लेशतोऽपि भवभीतिरम्बिके ।
किं कदाचिदपि पथ्यमश्नतामुद्भवेदुदरशूलजा व्यथा ॥ ३० ॥
आचरन्ति सविधे महीभुजां यद् बुधा अपि विदूषका इव ।
एतदम्ब भवधन्वसम्भवद्रव्यलोभमृगतृष्णिकाफलम् ॥ ३१ ॥
यन्मुखे वसति सर्वकामदं नाम देवि तव धाम सम्पदाम् ।
न द्विषस्तमपकर्तुमीशते वैनतेयमिव कद्रुनन्दनाः ॥ ३२ ॥
कामकोपमदमोहमत्सराः पीडयन्ति न मनाक् तवाश्रितम् ।
शूरयामिकजनाभिरक्षितं ग्राममीश्वरि मलिम्लुचा इव ॥ ३३ ॥
दाक्षिणात्यसुलभं तव स्तवे दोषतां न मुखरत्वमेति नः ।
देवि जह्नुतनयामहोत्सवे निस्त्रपत्वमिव घट्टभोजिनाम् ॥ ३४ ॥
भूतले भरतभूमिरुत्तमा तत्र मुक्तिनगरी च काशिका ।
तत्र संस्फुरति दैवतद्वयं विश्वनाथसहिता त्वमन्नदा ॥ ३५ ॥
बिभ्रती नियतमन्नपूर्णतामन्नदाननिरताऽसि देहिनाम् ।
सङ्कटा दशभुजैरलङ्कृता हंसि देवि दशदिक्षु सङ्कटम् ॥ ३६ ॥
प्राणिनां जगति मुक्तिकामिनां स्थापितः कुशलकाम्यया त्वया ।
काशिकानगरदण्डधारणं स्वैरमावहति कालभैरवः ॥ ३७ ॥
नित्यमेव विपदामगोचरस्त्वत्प्रसादधनभाजनं जनः ।
किं पिनद्धकवचो रणाङ्गणे शत्रुमार्गणगणेन विध्यते ॥ ३८ ॥
यं कृपामृतरसार्द्रया दृशा त्वं कटाक्षयसि दीनवत्सला ।
तस्य देवि तुहिनाचलात्मजे जायते त्रिविधतापभञ्जनम् ॥ ३९ ॥
त्वं पिताऽसि जननी त्वमेव मे त्वं गुरुस्त्वमखिलाऽसि बन्धुता ।
स्वामिनी त्वमसि शम्भुभामिनि त्वं सखाऽसि कुलदेवता च मे ॥ ४० ॥

नास्ति देवि धनधान्यकामना नाऽपि विद्वदनुरञ्जनस्पृहा।
केवलं त्वयि विकल्पवर्जिता भक्तिरस्तु मम जन्मजन्मनि ॥ ४० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां रथोद्धतास्तवः ॥

पीठाधिदेवतास्तवः

बाला पाण्ड्यमहीपस्य हालास्यपुरवासिनी।
मीनाक्षी पातु नो दीनान् कीनाशभयनाशिनी ॥ १ ॥
कम्पातटकृतावासा शम्पाशतसमुज्ज्वला।
सम्पादयतु कामाक्षी सानुकम्पा मदीप्सितम् ॥ २ ॥
चन्द्रला चन्द्रलावण्यविजित्वरमुखद्युतिः।
सीमातिशायिकरुणा भीमातीरगताऽवतात् ॥ ३ ॥
कैलासमौलिसंस्पर्धिश्रीशैलस्थलसंस्थिताम् ।
भ्रमराहित्यसिद्ध्यर्थं भ्रमराम्बामुपास्महे ॥ ४ ॥
करवीरमहालक्ष्मीः साक्षिभूता चराचरे।
अक्षीणविभवं देयाद् दाक्षिण्यगुणशालिनी ॥ ५ ॥
तुलजा जलजाताक्षी नलजाम्बवदर्चिता।
नगेन्द्रकुलजाऽस्माकं मलजालमपाहरेत् ॥ ६ ॥
जितारिषड्वर्गनुता सितांशुमधुरानना।
स्थिता मातृपुरे भूयाद्धिताय मम रेणुका ॥ ७ ॥
सप्तशृङ्गगता देवी तप्तकाञ्चनभास्वरा।
क्लृप्तभक्तहिता रक्षेद् दृप्तदानवमर्दिनी ॥ ८ ॥
ग्रहादिपीडा यद्भक्ते न हानिभयकारिणी।
महालसां प्रपद्येतां महादलपुरस्थिताम् ॥ ९ ॥
योगेन यस्याः सेवाया भोगे न भवति स्पृहा।
योगेश्वरी सा वरदा रोगेतिव्यसनं हरेत् ॥ १० ॥
काली तालीवनश्यामा नालीकदललोचना।
प्रौढतापमपाकुर्याद् गौडदेशसमाश्रया ॥ ११ ॥
सन्नह्यमाना मुह्यन्ति शत्रवो यत्कृपालवात्।
दद्यात्सद्यः प्रसन्ना सा मह्यं गुह्येश्वरी शिवम् ॥ १२ ॥

कामरूपाश्रिता देवी नामरूपातिगामिनी ।
मामरुन्तुदपापौघात् कामाक्षाख्या समुद्धरेत् ॥ १३ ॥
नन्दगोपसमुद्भूता विन्ध्यपर्वतवासिनी ।
नन्दयेदिष्टदानेन वन्दमानममुं जनम् ॥ १४ ॥
गुर्वीं दधाना कलशीमुर्वीधरतनूद्भवा ।
दर्वीकराऽन्नपूर्णा मे खर्वीकुर्वीत दुर्गतिम् ॥ १५ ॥
पुष्पमालादिसम्भारैः स्वर्बालाभिरुपासिता ।
ज्वालामुखी सकरुणा भवजालाद् विमोचयेत् ॥ १६ ॥
जम्भारातिशिरोरत्नसम्भावितपदाम्बुजाम् ।
अम्बामहं विना दम्भं भावये हृदयान्तरे ॥ १७ ॥
पारदा भवपाथोधेः सर्वशास्त्रविशारदा ।
नारदादिसमाराध्या पातु काश्मीरशारदा ॥ १८ ॥
दुष्करारधना नित्यं पुष्करावासमाश्रिता ।
प्रायस्त्रिविधतापेभ्यो गायत्री परिपालयेत् ॥ १९ ॥
साकं स्त्रीभिर्भजन्ते यां नाकं हित्वा सुधाशनाः ।
शाकम्भरी सा पापानां विपाकं मम नाशयेत् ॥ २० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां पीठाधिदेवतास्तवः ॥

ऐश्वर्यस्तवः

यद्भ्रूवल्लीवलनविवशः कृत्स्नमेतं प्रपञ्चं
चञ्चाकल्पो रचयति यथापूर्वकल्पं विधाता ।
मञ्चाकारं दधति पुरुषाः सन्ततं पञ्च यस्या-
स्तां त्रैलोक्यप्रथितविभवामम्बिकामाश्रयामः ॥ १ ॥
तिष्ठन् बद्धाञ्जलिरनुनयोद्भासमानः सभायां
दृक्पातं ते कुवलयरुचामास्पदं लिप्समानः ।
सामोदान्तःकरणकमलो देवि दामोदरोऽसौ
धत्ते मालामिव सुमसयीमुत्तमाङ्गे तवाऽऽज्ञाम् ॥ २ ॥
त्वामाराध्य त्रिपुरसहितां भैरवीं सैरिभघ्नीं
धृत्वा रूपं त्रिभुवनमनोमोहनं शार्ङ्गधन्वा ।

साहङ्कारं मधुरवचनारम्भणैर्दम्भयित्वा
निन्ये भस्मासुरमपि जगद्घस्मरं भस्मभावम् ॥ ३ ॥
लक्ष्मीमुच्चैःश्रवसममृतं कौस्तुभं वा ग्रहीतुं
सिन्धोस्तीरे समभवदहम्पूर्विका निर्जराणाम् ।
ज्वालाजालग्लपितभुवनं जग्रसे कालकूटं
त्वत्सौभाग्यप्रगुणमहिमा केवलं कालकण्ठः ॥ ४ ॥
झञ्झावाता विदधति जगज्जर्जरं तर्जयन्तो
वृष्टिं सृष्टिप्रलयकुशलाः कुर्वते कालमेघाः ।
संवर्ताग्निर्ज्वलति च यदा ताण्डवे शूलपाणे-
र्निष्प्रत्यूहा जयति गिरिजे तावकी मूर्तिरेका ॥ ५ ॥
प्रादुर्भावं कलयति यदा हन्त कल्पान्तकाले
चित्ताकाशे तव नगसुते सञ्जिहीर्षा जनानाम् ।
रुद्रो निद्रां व्रजति भजते ध्वंसनं हंसवाहः
सौरिः शौरिं वशयति तदा वासुकिश्चासुहीनः ॥ ६ ॥
कालः कालायसमुखरुचिः खण्डितौजा बिडौजा
भास्वान् ध्वस्ताखिलघृणिगणः कम्पिताङ्गो नभस्वान् ।
जातो यस्मिन्नवति भुवनं व्यस्तचेताः प्रचेताः
शुम्भं दृप्तं व्यधित भवती तं शिवे दीर्घसुप्तम् ॥ ७ ॥
नर्चः शक्तास्तव नवविधौ न क्षमन्ते यजूंषि
व्यापारोऽपि प्रसरति न वा वामदेव्यादिसाम्नाम् ।
छन्दः सर्वं किमिह बहुना स्पन्दने न प्रगल्भं
स्पष्टं नाऽष्टादशपरिमितं कल्पते वा पुराणम् ॥ ८ ॥
मीमांसाख्यं यदिह विदितं द्वादशाध्याययुक्तं
शास्त्रं दाक्षायणि निरसने नास्तिकानां प्रवृत्तम् ।
वेदोक्तानां तदपि निगदत्कर्मणां धर्मभावं
सञ्जानीते सकलफलदं त्वत्सपर्याविधानम् ॥ ९ ॥
ज्योतिष्टोमप्रभृतिषु जना ये मखेषु प्रसक्ता
भक्तास्तेऽपि क्षितिधरसुते त्वत्पदाब्जानुरक्ताः ।
न्यायादक्ताधिकरणकृतात् सन्निवेशः क्रतूनां
त्वत्पूजायां ध्रुवमुपनिषद्वाक्यशेषाच्छ्रुतीनाम् ॥ १० ॥
राज्यं स्वर्गस्त्रिदशनगरी राजधानी मनोज्ञा
मन्त्री वाचस्पतिरुपवनं नन्दनं चन्दनाढ्यम् ।
वज्रं यस्य प्रहरणमनादृत्य माल्यं त्वदीयं
स स्वस्थानाद्बलरिपुरपि भ्रंशमभ्याससाद ॥ ११ ॥

साङ्गो वेदः कपिलरचितं साङ्ख्यशास्त्रं पुराणं
नव्यन्यायः फणिपतिमतं गौतमं जैमिनीयम् ।
द्वैताद्वैतं परमगहनश्चागमः सर्वमेतत्
स्वच्छन्दं ते जननि विबुधा जल्पितं कल्पयन्ति ॥ १२ ॥
योगाचारो विलयमयते नास्ति नास्तिक्यशङ्का
भ्रष्टं सौत्रान्तिकमपि कथा का तु वैभाषिकस्य ।
नाशं नागार्जुनमतमगादर्हता नार्ऽर्हतानाना-
मागोपालं तव विजयते निस्तुलो भक्तिवादः ॥ १३ ॥
दण्डश्चक्रं सलिलमनलः कुम्भकारः कपालं
तत्संयोगः खलु तदितरे प्रागभावादयोऽपि ।
इत्थं सर्वः सपदि मिलितः कारणानां कलापः
कर्तुं मातः प्रभवति घटं न त्वदिच्छाविहीनः ॥ १४ ॥
तत्त्वज्ञानं कतिचिदगदन् साधनं देवि मुक्ते-
रन्ये यज्ञादिकमभिदधुर्वैदिकं कर्मजातम् ।
केचित्काशीमरणमवदन् स्नानमन्ये प्रयागे
निःसन्देहं तव मुनिजना भक्तिमुद्घोषयन्ति ॥ १५ ॥
धन्याः केचिद्धिमगिरिगुहागह्वरं संश्रयन्तः
प्रह्वीभावं तव चरणयोर्मुक्तसङ्गं वहन्तः ।
ध्यानाभ्यासस्तिमितनयना दुस्तरप्रस्तरेषु
त्वङ्गद्गङ्गाजलकलकलध्वानमाकर्णयन्ति ॥ १६ ॥
गङ्गातीरे वरतरुतले निश्चलं सन्निविष्टा
इष्टानिष्टाकलनविगमादन्तरङ्गप्रहृष्टाः ।
शिष्टाचारप्रवणहृदया भक्तिलाभेन तुष्टा
दुष्टानाढ्यान् हिमनगसुते मत्स्यवत्तुच्छयन्ति ॥ १७ ॥
सुप्तो नक्तं मृदुलशयने सल्लकीपल्लवानां
मातः प्रातर्मधुकरवधूगुञ्जनैर्भिन्ननिद्रः ।
क्रीडासक्तैस्तरुणचमरैश्चामरैर्वीज्यमानः
स्वःसाम्राज्यं तृणयति भवद्भक्तिसाम्राज्यधन्यः ॥ १८ ॥
नित्यं रात्रौ शमयति तमः शीतभानुः प्रदीप-
स्तृष्णाखेदं हरति सलिलं झर्झरन्निर्झराणाम् ।
वन्यां वृत्तिं विदधति फलैर्यस्य वृक्षाः सपक्षा
दुर्गाभक्तिप्रचुरविभवः पार्थिवैः किं स कुर्यात् ॥ १९ ॥
शान्तस्वान्ताः कृतवसतयः क्ष्माभृतः कन्दरायां
त्वत्पादाब्जप्रणिहितधियः सर्वतो बद्धसख्याः ।

श्यामाकानां सरसकवलैस्तर्पयन्तः कुरङ्गा-
नुत्सङ्गस्थाश्चटुलवचनैः सारिकाः पाठयन्ति ॥ २० ॥
कोशो वृक्षाः फलभरनता, मन्त्रदायी विवेको
राष्ट्रं विश्वं, जननि सुहृदः प्राणिनः सर्व एव।
दुर्गः श्रद्धा, बलमगसुते तावकीनः प्रसाद-
स्त्वद्भक्तानां जयति भुवने राज्यमव्याजरम्यम् ॥ २१ ॥
पुण्यारण्ये नियतवसतेः पर्णशाला हि सौधः
कीरा धीरा वनमुपवनं मर्कटाः पीठमर्दाः।
क्रीडावापी शिखरितटिनी नर्तका नीलकण्ठा-
स्त्वद्भक्तस्य प्रणतवरदे गायनाश्चान्यपुष्टाः ॥ २२ ॥
छायावृक्षानलसलुलिताः कासरा आश्रयन्ते
शङ्काहीनं चरति चपलं रङ्कुयूथं कुशेषु।
त्वद्भृत्यानामुटजनिकटे निर्भयं सञ्चरन्तो
झम्पामुच्चैस्तरुषु कपयः साधु सम्पादयन्ति ॥ २३ ॥
लीलासक्तान् सरसिजवने पश्यतां राजहंसान्
नीवाराणां क्षितितलगतानुञ्छतां बीजपुञ्जान्।
कर्कन्धूनां वनभुवि फलं चिन्वतां भाग्यभाजां
ध्यानासक्त्या तव गिरिसुते वासरा वा सरन्ति ॥ २४ ॥
क्षौद्रं राजादनफलभरं पर्णपात्रे गृहीत्वा
कक्षे कृष्णाजिनमभिनवं पर्णशालामुपेतान्।
भक्ताः केचित्तव वनचरान्नित्यकर्मावसाने
नामग्राहं कुशलवचनस्वागतैर्मानयन्ति ॥ २५ ॥
सेवावृत्तिं तव विदधतां पुण्यभाजां नराणां
गेहे लक्ष्मीर्निवसति चिरं शार्ङ्गिणो वक्षसीव।
पुत्रैः पौत्रैः सुहृदनुचरैर्भ्रातृभिश्चान्वितानां
कीर्तिस्तेषां भ्रमति भुवने ज्योत्स्नया स्पर्धमाना ॥ २६ ॥
सालङ्कारा गुणगणवती संस्कृता दोषहीना
तेषां वाणी विलसति मुखे मन्दिरे कामिनी च।
आन्वीक्षिक्यां भरतमुनिना निर्मिते नाट्यशास्त्रे
मीमांसायां प्रचरति मतिर्ज्यौतिषे पाणिनीये ॥ २७ ॥
वाचोयुक्त्या सदसि विदुषां वादयुद्धप्रसङ्गे
मूकीकर्तुं प्रभवति हठाद् वादिवृन्दं स एकः।
साधिक्षेपं नयति नृपतिं दासतां दृष्टिपातात्-
पांसुस्तोकं तिलकयति यस्त्वत्पदाम्भोजलग्नम् ॥ २८ ॥

माद्यद्दन्तावलमदजलैः पङ्किलो द्वारदेश-
　स्तेषां हेषा भवति महती वाजिनां चाऽजिरेषु ।
यातायातं भजति शिबिकास्यन्दनानां कदम्बं
　येषामम्ब स्फुरति हृदये तावकी भक्तिरेषा ॥ २९ ॥
कामो नामस्मरणविषये धर्मलोपे प्रकोपो
　लोभो विद्यार्जनपरिकरे साधुसङ्गेषु मोहः ।
सेवावेशात्तव मदभरो मत्सरो दुर्गुणानां
　त्वद्भक्तानां षडपि रिपवः सौहृदं धारयन्ति ॥ ३० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायामैश्वर्यस्तवः ॥

कलहस्तवः

भ्रमरायितमानसोऽपि ते चरणाब्जे समुपेक्षितस्त्वया ।
कलहं बलहन्तृपूजिते तदहं सम्प्रति कर्तुमुद्यतः ॥ १ ॥
अयि ते दयिते पिनाकिनः स्तुतिगाथां रचयन्ति नाकिनः ।
वितथा हि तथाऽपि सा भवेत्प्रणतं मां समुपेक्षसे यदि ॥ २ ॥
विकलं कलयन्ति मां भृशं रिपवः कामपुरःसरा अमी ।
जडतामवलम्बसे कथं जनकात् किं गुण एष शिक्षितः ॥ ३ ॥
विफलं त्वदुपासनं मया गिरिकन्ये किमकारि शैशवात् ।
रिपुभिः परिवेष्टितस्य मे क्षणमात्रं दयसे न यत्पुनः ॥ ४ ॥
करुणामृतवृष्टिकारिका प्रथसे त्वं तत एव कालिका ।
कथयन्ति मनीषिणः सदा नगकन्ये रलयोरभिन्नताम् ॥ ५ ॥
जगदम्ब विलम्बसे कथं न ममाऽऽक्रन्दितमाशृणोषि किम् ।
प्रकृतिस्त्वमहो पुरातनी बधिरत्वं तव किं न युज्यते ॥ ६ ॥
करुणारसमेदुरां दृशं भवतप्ते मयि किं न मुञ्चसि ।
अधुना स्मृतिमेतदागमद् गिरिजे पुष्पवदीक्षणाऽसि यत् ॥ ७ ॥
भवधन्वपरिभ्रमाकुलं सदयं मामवलोकय क्षणम् ।
नगजाऽसि कथं गजोचितां प्रतिगृह्णासि निमीलिकामिमाम् ॥ ८ ॥
निजभक्तजनाधमर्णतां कलयन्ती चिरमद्रिनन्दिनि ।
अभिधानमिदं च बिभ्रती त्वमपर्णेति कथं न लज्जसे ॥ ९ ॥
मयि कृत्रिमपुत्रभावनां विदधाना यदि नाऽनुकम्पसे ।
शरजन्मगजाननावपि प्रथितौ कृत्रिमपुत्रकौ न किम् ॥ १० ॥

उपयास्यति नाऽन्यदेवतां ननु माहेश्वर एष जन्मतः ।
इति देवि विधेहि निश्चयं क्व नु मीनः सरसीं विना व्रजेत् ॥ ११ ॥
म्रियते जलदालिवञ्चितस्तृषितश्चातकपोतको यदि ।
अपि विष्णुपदे प्रतिष्ठिता न भवेत् सा किमकीर्तिभाजनम् ॥ १२ ॥
उचिता समदृष्टिता ध्रुवं तव पुत्रत्रितये महेश्वरि ।
अथवा कथमेवमर्थये प्रथिता ते विषमाक्षता न किम् ॥ १३ ॥
तव कर्तुमकर्तुमन्यथा यदि कर्तुं प्रभुता निगद्यते ।
परिवर्तयितुं समाऽम्बिके दुरदृष्टं न कथं प्रवर्तसे ॥ १४ ॥
जगतां त्रितये त्वमीशिषे तव विद्यासु समासु नैपुणम् ।
अहमम्ब कथं तवोदरादुदभूवं जडधीरकिञ्चनः ॥ १५ ॥
समुपैति जरा निशाचरी क्रमशो ह्रासमटाट्यते बलम् ।
उपसर्प जवेन किं फलं चलिते वारिणि सेतुबन्धनात् ॥ १६ ॥
अपदानकथा वृथा भवेद् रिपुषट्कं न निहंसि चेन्मम ।
विबुधा निगदन्ति शाब्दतः प्रबलामिन्द्रियसम्भवां धियम् ॥ १७ ॥
दिवि सन्तु सुराः सहस्रशः परमेतैर्मम किं प्रयोजनम् ।
मिलितं शतमप्यचक्षुषां प्रभवेत् किं वद देवि वीक्षितुम् ॥ १८ ॥
निगदन्तु महेशि तावकीं श्रुतयः कण्ठरवैः स्वतन्त्रताम् ।
दृढगुम्फितभक्तिशृङ्खलाप्रतिबद्धा क्व नु देवि यास्यसि ॥ १९ ॥
नितरामवधीरितो मया कुपितोऽयं विमुखीभविष्यति ।
इति चेतसि मास्म मन्यथा न हि बालो विजहाति मातरम् ॥ २० ॥
नगराजसुते वदान्यता तव भर्तुर्भुवनेषु विश्रुता ।
त्वयि किं कृपणत्वमीदृशं मम दुर्भाग्यवशादुपागमत् ॥ २१ ॥
अपि दुष्कृतिभाजनं जनं त्वमिमं नैव विहातुमर्हसि ।
नगजे जगदेकभीषणं सुरसिन्धुर्मकरं किमुज्झति ॥ २२ ॥
जगदीश्वरि दीनवत्सले कठिनत्वं मयि किं तवोचितम् ।
प्रसृता दशदिक्षु चन्द्रिका न हि चाण्डालगृहेऽनलायते ॥ २३ ॥
उररीकुरु वा जहीहि वा मयि कोपं भज वा प्रसीद वा ।
जननि प्रलयेऽप्युपस्थिते न विमुञ्चामि पदाम्बुजं तव ॥ २४ ॥
परुषा सरुषा मया कृता वचनानां रचना शिवप्रिये ।
इयमम्ब विधाय कौतुकं हृदयं भूरिदयं धिनोतु ते ॥ २५ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां कलहस्तवः ॥

कीर्तिस्तवः

यशस्त्वदीयं नगराजकन्ये प्रशस्यमानं कविभिः समस्तैः ।
विशस्य बाधां भवबन्धजन्यां न कस्य लोके मुदमादधाति ॥ १ ॥
विजरीहरीति गगने यशस्तव प्रसरीसरीति निखिले महीतले ।
विसरीसृजीति फणिनां महोत्सवं न चरीकरीति गिरिजे किमद्भुतम् ॥ २ ॥
विसृमरैस्तव देवि यशोभरैर्धवलिते ललिते सुरवर्त्मनि ।
अनधिगम्य चिरादपि चन्द्रिकां समुपयाति चकोरकुलं श्रमम् ॥ ३ ॥
कीर्तिप्रकाशैस्तव दीप्यमानैर्दिनायितायां बहुधा निशायाम् ।
अलब्धचन्द्रोदयबुद्धिरेति न चक्रवाकी प्रियविप्रयोगम् ॥ ४ ॥
त्वद्यशःसमुदयैर्भुवनेऽस्मिन् प्रापिते धवलिमानमशेषे ।
क्षीरनीरगतभेदविलोपाद् राजहंसबकयोर्न विशेषः ॥ ५ ॥

कैलासशैलशिखरे सुरसुन्दरीभिः
प्रारब्ध एव तव कीर्तिकथाविताने ।
सञ्जायते भयवशादसुराङ्गनानां
शैलात्मजे सपदि मङ्गलसूत्रभङ्गः ॥ ६ ॥

ध्रुवमिदं नितरामसमञ्जसं तदपि सम्प्रति वक्तुमुपक्रमे ।
क्षितितले यशसा तव दीपिते जननि नश्यति तस्करजीविका ॥ ७ ॥
अयि दिक्षु विदिक्षु विस्तृता गिरिकन्ये तव कीर्तिकौमुदी ।
सदनेषु सुधाशनद्विषां तनुते सन्तमसं तदद्भुतम् ॥ ८ ॥
एतदत्र विदधाति विस्मयं शैलनन्दिनि विपश्चितामपि ।
एकमेव तव यद्यशो भजेदर्जुनत्वमथ पाण्डुतामपि ॥ ९ ॥
नभस्तले त्वद्यशसि प्रसक्ते मन्दारवृन्दप्रसवायमाने ।
खपुष्पशब्दस्य मुहुःश्रुतस्य गृह्णन्ति शक्तिं शिशवः सुराणाम् ॥ १० ॥

क्षीराब्धिवीचिधवलैस्तव कीर्तिजालै-
रामूलचूलमभितः परिलिप्तदेहः ।
हंसायितोऽपि जरठः करटो वराकः
काकारवेण हरति भ्रममद्रिकन्ये ॥ ११ ॥

तव समुज्ज्वलकीर्तिपरिच्छदैः कवलिते सकले ग्रहमण्डले ।
भवति कैरवपङ्कजमीलनैर्मिहिरचन्द्रमसोरुदयप्रमा ॥ १२ ॥
तव यशःस्तवनं नवनिर्मितं परिणतं गिरिजे कवनात्मना ।
अवनिभृत्कुहरे मधुरस्वरैः परिपठन्ति हि किन्नरयोषितः ॥ १३ ॥
कुन्दपुष्पति दिगङ्गनाजिरे सानुषु क्षितिभृतां हिमायते ।
स्वर्गसिन्धुसलिलेषु हंसति व्योमकेशदयिते भवद्यशः ॥ १४ ॥

प्रस्तुतं सदसि जम्भभेदिनो नारदेन तव कीर्तिवर्णनम् ।
वस्तुजातमखिलं दिवौकसां वस्तुतो नयति सस्तुवर्णताम् ॥ १५ ॥
शर्मदं सपदि धर्मगामिनां कम्पदं त्रिदशवैरिसम्पदाम् ।
कर्णयुग्मपुटकेन वर्णनं पीयते तव जनैर्न हीयते ॥ १६ ॥
वसति यद्वदने तव कीर्तनं त्रसति तस्य भृशं यमकिङ्करः ।
श्वसति भूरिधनेऽपि शिवप्रिये हसति तुच्छतया स पुरन्दरम् ॥ १७ ॥

आपूर्णकर्णविवरास्तव कीर्तिघोषै-
र्मूकीभवन्ति वसुधाधिपशंसनेषु ।
मातः प्रशस्तिसमये तव वावदूका
निन्दास्तुतिश्रुतिविधौ बधिरीभवन्ति ॥ १८ ॥

जिह्वासहस्रयुगलं प्रथते यदीयं
यो भाष्यमातनुत पाणिनिसूत्रजाले ।
शेषोऽप्यशेषगुणवर्णनकर्मणस्ते
शक्तो भवेत्स न भवेदिति मे विकल्पः ॥ १९ ॥

निर्माति यस्तव महेशि यशःप्रबन्धं
बन्धं निरस्य निखिलं लभते स मुक्तिम् ।
यो वर्णयेत् तव यशः सरसैर्वचोभि-
र्धत्ते शयः सपदि तस्य तु राजमुद्राम् ॥ २० ॥

न यमुना न मनागपि नर्मदा न सरयूर्न तथा सुरनिम्नगा ।
तव कथामृतसिन्धुरनारतं हरति देवि यथा कलिकल्मषम् ॥ २१ ॥
तव यशःपटलेन महीयसा विशदतां गमिते भुवनत्रये ।
वितनुते बदराण्यपि मौक्तिकैः सह वणिक् तुलयञ्जनवञ्चनाम् ॥ २२ ॥
दिशि दिशि प्रसरन्ति निरर्गलं तव यशःप्रकराः परिपाण्डुराः ।
कलियुगानुगमादिव चण्डिके भजति वर्णविलोपमिदं जगत् ॥ २३ ॥
कुवलयं कुमुदं कमलं तथा निजकृतौ पृथगेव निबध्नताम् ।
अभवदत्र भवद्यशसाऽञ्चिते जगति कोशकृतां विफलः श्रमः ॥ २४ ॥
लोपिते तव यशोभरैर्गले श्यामलिम्नि गिरिराजकन्यके ।
नीलकण्ठ इति नाम केवलं रूढमात्रमभवन्महेश्वरे ॥ २५ ॥
सन्ततं नदति यस्य मन्दिरे शैलपुत्रि तव कीर्तिडिण्डिमः ।
अन्तकोऽपि हतको न शक्नुयाद् गन्तुमप्रतिहतस्तदन्तिकम् ॥ २६ ॥
यद्गृहेषु तव कीर्तियोषितः श्रूयते कनकनूपुरध्वनिः ।
पूरणं भवति तत्र सम्पदां दूर एव च ततो विपत्तयः ॥ २७ ॥
मेनात्मजे तव यशःपटहारवेण नित्यं चतुर्दशजगत्सु समाश्रितेषु ।
वर्वर्त्यनादिनिधनं विभु शब्दरूपं ब्रह्मेति शाब्दिकमतं द्रढिमानमेति ॥ २८ ॥

द्योतिते तव निरन्तरं यशश्चन्द्रिकाभिरभितो जगत्त्रये।
रुद्धराजपथनिर्गमागमा यान्ति खेदमभिसारिकाः शिवे ॥ २९ ॥

सर्वे गजाः सुरगजाः सरितो द्युनद्यः
शैलास्तुषारनिलयाः फणिनोऽप्यनन्ताः।
एकात्मतां जगति ते यशसा प्रयाते
द्वैतभ्रमो गलति शैलसुते जनानाम् ॥ ३० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां कीर्तिस्तवः ॥

भक्तिस्तवः

भवमरुभ्रमणश्रमनाशिनी प्रबलमोहतमोपहतिक्षमा।
भवतु मे भवभामिनि भूयसी प्रतिभवं तव भक्तिरभङ्गुरा ॥ १ ॥
न वसुधाधिपसौधनिवासजं न वसुधान्यमतङ्गजसम्भवम्।
नवसुधारसपानभवं न वा सुखमियात्तव भक्तिसुखांशताम् ॥ २ ॥
जपतपःक्रतुयोगपुरःसरा जननि यद्यपि पद्धतयः शतम्।
तदपि भक्तिरियं तव चण्डिके भवति मुक्तिपुरीनृपवीथिका ॥ ३ ॥
मधुलिहं नलिनीव विकस्वरा दिविषदां तटिनीव तृषाकुलम्।
कुमुदमण्डलमिन्दुरुचिर्यथा जलमुचां पटलीव शिखावलम् ॥ ४ ॥
सहृदयं कवितेव, पिनाकिनं विकचधत्तुरपुष्पततिर्यथा।
हिमहतं हसनीव समुज्ज्वला द्विजगणं नितरामिव दक्षिणा ॥ ५ ॥
परभृतं सहकारलता यथा बटुकवृन्दमिव प्रतिपत्तिथिः।
मदयति स्मरशासनवल्लभे सुकृतिनं तव भक्तिरलं नरम् ॥ ६ ॥ विशेषकम्
इदमहो शतजन्मतपःफलं परिणतिः पितृपुण्यकृतेरियम्।
इयमखण्डितभाग्यपरम्परा जननि यत्तव भक्तिरवाप्यते ॥ ७ ॥
हरिहयप्रमुखा हरिदीश्वरा हरिहरद्रुहिणाग्रसराः सुराः।
ग्रहवरा हरिदश्वपुरोगमा गिरिसुते तव भक्तिवशंवदाः ॥ ८ ॥
मुनिजनास्तव दर्शनकाम्यया विदधतां निजनेत्रनिमीलनम्।
जननि मादृगदृष्टसविग्रहा त्वमिह नः पुरतः परिदृश्यसे ॥ ९ ॥
किमु फलं विविधैर्नियमव्रतैः किमथवा क्रतुभिर्बहुदक्षिणैः।
बुधजना दृढभक्तिपुरःसरं नगसुताचरणाब्जमुपासताम् ॥ १० ॥

तनुमतां तव भक्तिमुपेयुषां चिरमनर्जिततत्त्वधियामपि ।
समुपगच्छति साञ्जलि सम्मुखं त्रिपुरसुन्दरि मुक्तिचतुष्टयम् ॥ ११ ॥
अभिरुचिर्भुवनेश्वरि देहिनां भवति या विषयेषु सुखार्थिनाम् ।
तव पदाब्जयुगे यदि सा भवेत् करतले ननु शाश्वतिकं सुखम् ॥ १२ ॥
सकलभक्तमनोरथदायिनीं सकरुणामपहाय महेश्वरीम् ।
विषहते कथमेष जनो जडः क्षितिभुजां भवनेषु विमाननाम् ॥ १३ ॥
धनवतां मदघूर्णितचक्षुषां सदसि नृत्यसि किं द्रविणेच्छया ।
तव न सा तुहिनाचलसम्भवा प्रणतकल्पलता श्रुतिमागमत् ॥ १४ ॥
स्रवदमन्दमरन्दसमन्वितैः कुवलयैः कमलैः कुमुदैरपि ।
विहितनामसहस्रजपः पुमान् गिरिसुतां वरिवस्यति भाग्यवान् ॥ १५ ॥
स तव भक्तियुतः श्वपचोऽपि मे वितनुते जगदीश्वरि सम्मदम् ।
त्वयि सदैव पराङ्मुखमानसो द्विजवरो न पुनः श्रुतिपारगः ॥ १६ ॥
गुणवती मृदुमञ्जुलभाषिणी सुगृहिणी पतिभक्तिपरायणा ।
सविनयास्तनयाश्च गुणोज्ज्वलाः करुणया तव लभ्यमिदं नृणाम् ॥ १७ ॥
सुरनदीपुलिने सिकतामये परिचलत्कलहंसकुलाकुले ।
मृदुसमीरसमीरणशीतले विकसदम्बुजपुञ्जसुगन्धिते ॥ १८ ॥
समुपविश्य सुखेन कुशासने तव पदाम्बुजचिन्तनतत्परः ।
मृगकुलैः सकुतूहलमीक्षितः क्षणमिव क्षपयामि कदा दिनम् ॥ १९ ॥ युगलम्
विगलदश्रुपरिप्लुतलोचनाः प्रतिकलं पुलकाङ्कितविग्रहाः ।
तव कथामृतपानविघूर्णिताः कतिचिदत्र भवन्ति नरोत्तमाः ॥ २० ॥
नगसुते तव नामनवासवं परिपिबन् गणयामि न वासवम् ।
त्वमचिरादपहंसि नतापदस्तव जनस्य च कोऽपि न तापदः ॥ २१ ॥
नरपतिं स्तुवतां धनलिप्सया विफलतामुपयाति सरस्वती ।
त्रिभुवनेश्वरि भस्मचये यथा प्रणिहिता घृतगर्भहविस्ततिः ॥ २२ ॥
क्षितिभृतां परिपन्थिगणाद् भयं धनवतां महतामपि तस्करात् ।
तव कृपाकवचाद् गतसाध्वसो जगति भक्तजनः सुखमेधते ॥ २३ ॥
तव पदाब्जनिवेशितमानसा न गिरिजे गणयन्ति विपन्नगान् ।
मणिमहौषधिमन्त्रसमन्विताः कुशलगारुडिका इव पन्नगान् ॥ २४ ॥
मयि निधेहि दयार्द्रतमां दृशं जडमतिं परिपालय मादृशम् ।
तव कृपातरणेरवलम्बनाद् भवतु गोष्पदवद् भवसागरः ॥ २५ ॥
हतधियः कवयन्तु परःशता धनमदान्धवृथास्तुतिपाठकाः ।
कविवरस्य महेश्वरि कस्यचिद् रसवती भणितिस्तव शंसने ॥ २६ ॥
निजकुलव्रतपालनशालिना धृतिमता शिवभक्तिजुषा मया ।
इतरनामकथाऽपि विवर्ज्यते स्मरहरापचिताविव केतकी ॥ २७ ॥

तनुभृतां जनयन्ति यदाभयं भुजगपाशधरा यमकिङ्कराः ।
जगति किं शरणं सुलभं तदा गिरिसुताचरणस्मरणं विना ॥ २८ ॥
नमति यस्तुहिनाचलनन्दिनीं नृपतयः प्रणमन्ति तमादरात् ।
स्तुतिभिरर्चति यः शिववल्लभां व्रजति स स्तुतिभाजनतां स्वयम् ॥ २९ ॥
जननमृत्युजरामयनाशनं निगदितं मुनिभिः सनकादिभिः ।
सुमधुरं शिवनाममयं जना अविरतं रसयन्तु रसायनम् ॥ ३० ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां भक्तिस्तवः ॥

कटाक्षस्तवः

सव्यापसव्यनयनोत्पललब्धजन्मा
हव्याशहेतिसदृशः कलुषेन्धनेषु ।
अव्याजसुन्दररुचिस्तुहिनाद्रिकन्ये
भव्याय नो भवतु ते करुणाकटाक्षः ॥ १ ॥
क्रव्यादभूतगणभीतिविनाशदक्षो
द्रव्यात्मजादिसकलेप्सितकल्पवृक्षः ।
नव्याम्बुजन्मदलदीर्घविलोचनाया
अव्याज्जगज्जननि नस्तव दृष्टिपातः ॥ २ ॥
कर्णान्तगामि तव लोचनयुग्ममेतद्-
युक्तं तदत्र बिभृयादभितोऽर्जुनत्वम् ।
एतत्तु नो मनसि विस्मयमातनोति
मध्ये दधाति जगदीश्वरि कृष्णरूपम् ॥ ३ ॥
चित्रं किमत्र यदि कार्यवशाद् बिभर्षि
रूपाणि भिन्नसमयेषु पृथग्विधानि ।
भक्तव्रजेषु धनदस्तव शङ्करोऽपि
वर्वर्ति शर्वदयिते युगपत्कटाक्षः ॥ ४ ॥
क्षोणीभृतामधिवसन्ति गुहागृहाणि
यत्प्राप्तये मुनिजना वनमाश्रयन्ति ।
सोऽयं स्वभक्तसुलभस्तव कृष्णशारः
शैलात्मजे जयति नित्यमपाङ्गभङ्गः ॥ ५ ॥

भक्तावलोकविकसन्नयनोत्पलान्त-
निर्यद्द्विरेफपटलच्छविमादधानः ।
अभ्यर्हितः सुमनसां निपतेत् समन्ता-
दस्माद्दृशेषु तव देवि कृपाकटाक्षः ॥ ६ ॥
सद्यो विधूय विपदः श्रियमादधाति
पापं निरस्य भवतापमपाकरोति ।
नित्यं प्रपन्नजनरक्षणयत्नशीलो
जेजीयते तव शिवे करुणावलोकः ॥ ७ ॥
कर्णावतंसपदवीं समवाप्य यत्ना-
दन्तेवसत्कुवलयं तव लोचनस्य ।
सादृश्यलेशमधिगन्तुमकल्पमानं
व्रीडावशाच्चिरमधोमुखमेतदास्ते ॥ ८ ॥
प्रभ्रंशितो निजपदान्मुनिनाऽतिकोपा-
दस्तप्रभः कृपणवद् विचरन् वनेषु ।
यत्प्राप्तवान् पुनरपि त्रिदिवाधिपत्यं
वास्तोष्पतिः स तव देवि दृशः प्रसादः ॥ ९ ॥
प्राभातिकीमुपहसन् द्युतिमुत्पलानां
बम्भ्रम्यमाणमधुसूदनराजिरम्यः ।
मातर्वसन्ततिलकीकृतपादपांशो-
रस्माञ्जवात् तव भवादवतात् कटाक्षः ॥ १० ॥
उद्यन्नवाम्बुदरुचिः करुणामृतस्य
वृष्टिं नतेषु कुरुते तव दृष्टिरेषा ।
पीत्वा हलाहलमपि प्रमथाधिनाथो
नाऽऽयासलेशमवहद् यदनुग्रहेण ॥ ११ ॥
निःशङ्कमद्रितनये नयनं त्वदीयं
नीलोत्पलेन सदृशं कवयो वदन्तु ।
गुञ्जाफलेन तुलयन्ति जनाः सुवर्णं
प्रायो गतानुगतिकः प्रथते हि लोकः ॥ १२ ॥
लोकत्रयेऽपि मणिमन्त्रमहौषधीनां
यः सामवायिकतया विदितः प्रभावः ।
ब्रूमो वयं त्रिपुरसुन्दरि साभिमान-
मास्ते ततः शतगुणस्तव दृष्टिकोणे ॥ १३ ॥
दग्धोऽपि भूतपतिना नयनानलेन
पुष्पायुधः खलु यया पुनरुन्मिमेष ।

अस्मासु तीव्रभवदावसमाकुलेषु
तामम्ब निक्षिपतरां स्वदृशं दयार्द्राम् ॥ १४ ॥
वर्षागमेषु सहसा भृशमुद्भवन्ति
वृष्ट्या यथा क्षितितले नवकन्दलानि ।
क्षिप्रं तथा प्रणमतां तव दृष्टिपाता-
दाविर्भवन्ति भवनेष्वपि मङ्गलानि ॥ १५ ॥
आकर्णयं गुरुमुखाद् बहुशः प्रवादं
कूर्मी दृशा निजशिशून् परिपुष्यतीति ।
दृष्टिं विचिन्त्य सकलार्थकरीं त्वदीयां
तथ्यं वचस्तदिति सम्प्रति निश्चिनोमि ॥ १६ ॥
सञ्जीवनं भवनवज्वरपीडिताना-
माश्वासनं यमभटैरतिभीषितानाम् ।
सम्भेदनं सुकृतिनां भवबन्धनाना-
मालोकनं जयति ते नयनोत्पलानाम् ॥ १७ ॥
लक्ष्मीं ददाति कुरुते यशसोऽभिवृद्धिं
साम्राज्यमर्पयति मुक्तिपदं प्रदत्ते ।
कर्णान्तिकं नियतवासमुपागतायाः
स्थाने दृशो निरवधिस्तव दातृभावः ॥ १८ ॥
आयाति तस्य सदनं द्विरदाधिरूढा
मञ्जीरनादमुखरा सुरराजलक्ष्मीः ।
यस्मिन्नपाङ्गवलितानि तवाऽद्रिकन्ये
कारुण्यपूरकलितानि सकृत्पतन्ति ॥ १९ ॥
को मद्विना त्रिभुवने शरणागतानां
बाधाशतं परिहरेदिति चिन्तयित्वा ।
नित्यं वनीपकगवेषणजागरूका
मन्ये निमेषरहिता तव दृष्टिरेषा ॥ २० ॥
कल्लोललोलयमुनासलिलावभासा
हासावधीरितमहेन्द्रमणिप्रकाशाः ।
वेल्लत्तमालतरुपल्लववल्लरीणां
प्रत्यर्थिनस्तव कटाक्षचया जयन्ति ॥ २१ ॥
उत्फुल्लपङ्कजसहोदरनेत्रकोण-
द्रोणीमुखेन रभसाद् बहिरुल्लसन्तः ।
अन्तःस्थितस्य करुणावरुणालयस्य
पूरोत्करा इव विभान्ति भवत्कटाक्षाः ॥ २२ ॥

भ्रान्त्वा चिराय भवधन्वनि दूरदूरं
क्लान्तं श्रमाद् विचलितं मृगतृष्णया माम् ।
दृष्ट्या सुधारसमुचा शिशिरीकुरुष्व
नेत्रं महेशि तव चन्द्रमसं वदन्ति ॥ २३ ॥
कालाञ्जनं विनिहितं तव नेत्रपद्मे
दुर्गे स्वयं निरुपमां सुषमां दधाति ।
किं निर्झरो वितनुयात् सुरनिम्नगाया
नूनं स एव च ततो महिमानमेति ॥ २४ ॥
युक्तं तदत्र तव चण्डि मलीमसोऽपि
सर्वं मलं हरति भक्तिमतां कटाक्षः ।
शल्येन शल्यहरणं क्रियते जनेन
लोके विषेण च विषं प्रशमं प्रयाति ॥ २५ ॥
श्रुत्वा पुरा बटुमुखाद् गिरिशापवादं
क्रोधारुणीकृतदृशा स्फुरिताधरोष्ठ्या ।
क्षिप्तस्त्वया गिरिसुते जयतादजस्रं
भ्रूभङ्गसङ्गजटिलः कुटिलः कटाक्षः ॥ २६ ॥
आलोक्य मूर्धनि धृतां त्रिपुरान्तकेन
गर्वोद्धतां स्मितमुखीममरस्रवन्तीम् ।
ईर्ष्यावशादरुणितोऽप्यसितः स्वभावा-
न्मुक्तस्त्वया जयति चित्ररुचिः कटाक्षः ॥ २७ ॥
मातः किरातवपुषा परमेश्वरेण
पार्थस्य शैलशिखरे समरप्रसङ्गे ।
साचिस्मितं सकरुणं सभयं सलीलं
न्यस्तस्त्वया विजयतामुभयोः कटाक्षः ॥ २८ ॥
शृङ्गारसारमधुरा प्रणयान्महेशे
वृद्धाङ्गनादिपरिहासवशात् सलज्जा ।
धूमाकुला पितृवियोगधिया सबाष्पा
जीयाद् विवाहसमये तव दृष्टिभङ्गिः ॥ २९ ॥
सम्प्रेषितं मदभरादसुराधिपेन
या धूम्रनेत्रमकरोद् भसितावशेषम् ।
याऽस्थापयच्च सुरथं जगदाधिपत्ये
सा दृष्टिरस्तु गिरिजे मम मङ्गलाय ॥ ३० ॥
नेत्राञ्चलः करुणया मसृणस्त्वदीयो
यस्मिञ्जने पतति जन्मसहस्रलभ्यः ।

सम्पद्यते भवनसीम्नि जानुदघ्नी
ग्रीष्मेऽपि तस्य मणिकाञ्चनरूप्यवृष्टिः ॥ ३१ ॥
कालान्तरेण वितरन्ति फलं जनानां
मन्त्रादयश्चिरतरं समुपास्यमानाः ।
सद्यः फलेग्रहिरयं त्वदपाङ्गभङ्गो
यत्प्राप्तिमात्रमनुधावति राजलक्ष्मीः ॥ ३२ ॥
नाडिन्धमो बलवतामपि निःसपत्नं
कालः कलिर्वहति शासनमद्य लोके ।
अस्मिन् विना तव कटाक्षलवप्रसादं
कः श्रेयसामधिगमे प्रभवेदुपायः ॥ ३३ ॥
स्तन्यं पिबन्तु कतिचित्तव देविधन्या-
स्ताम्बूलदानमपरे कृतिनो लभन्ताम् ।
अस्माकमत्र गुणलेशविवर्जितानां
लाभः परस्तव शिवे नयनाब्जकोणः ॥ ३४ ॥
हैयङ्गवीनमृदुलं हृदयं यदाहुः
सन्तस्तव स्थिरधियो न तदर्थहीनम् ।
नो चेत्कथं प्रणततापवशात् त्वदक्ष्णोः
पीयूषसारमसृणः प्रसरेत् कटाक्षः ॥ ३५ ॥
किं जल्पितेन बहुधा परिकल्पितेन
प्रत्यक्षमत्र पुरतः स्फुरति प्रमाणम् ।
यन्मादृशः कवयितुं क्षमते विमूढः
सर्वं तदम्ब फलितं तव वीक्षितस्य ॥ ३६ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां कटाक्षस्तवः ॥

शरणागतिस्तवः

मणिनूपुराभरणमादिकारणं सुखसम्पदां, त्रिविधतापवारणम् ।
धरणीधरेन्द्रदुहितुर्निरन्तरं शरणं वृणोमि चरणाम्बुजद्वयम् ॥ १ ॥
अमितौजसा प्रणमता बिडौजसा निजमौलिरत्नकिरणैः करम्बितम् ।
यदि न श्रयामि गिरिजापदाम्बुजं क्व लभेय हेयकलुषौघशोधनम् ॥ २ ॥

प्रणमत्-प्रभूतदिविषद्-वधूटिका-चिकुरप्रसूनमकरन्दमेदुरे ।
भवभीतभक्तजनमानसं सदा भ्रमरायतां गिरिसुतापदाम्बुजे ॥ ३ ॥
यमदूतहूतिपरिभूतमानसः पुरुहूतमुख्यविबुधैरुपेक्षितः ।
निजपापतापपरिपाकविक्लवः कमुपाश्रयेत् त्रिभुवनेश्वरीं विना ॥ ४ ॥
विषयोपभोगमृगतृष्णिका ध्रुवं मधुरा मुखेऽपि विधुरायते फले ।
न धराधरेन्द्रतनयां विना नृणामपरं हिताय वितते धरातले ॥ ५ ॥
प्रतिभावतां गुणयुताऽपि भारती नगकन्यकास्तुतिपराङ्मुखीकृता ।
प्रतिभाति नैव शतपत्रनिर्मिता श्वगले बलेन निहितेव मालिका ॥ ६ ॥
शरदभ्रविभ्रमधरा धराधिया नियतं वृथैव कलयन्तु गर्जितम् ।
असकृत्कृपामृतसुवृष्टिकारिणी क्लमहारिणी जयति कालिका परम् ॥ ७ ॥
महिषासुरं त्रिदशवृन्ददुर्जयं समरे निहत्य भुजविक्रमोर्जिता ।
निरुपप्लवं व्यधित या जगत्त्रयं शरणार्थिनां गिरिसुतैव सा गतिः ॥ ८ ॥
निगमत्रयीवनविहारसारिका प्रणमज्जनार्तिपरिहारकारिका ।
अविचिन्तनीयघटनापटीयसी दयिता शिवस्य दयतां ममाऽनिशम् ॥ ९ ॥
महिमानमेति वचसामगोचरं सकलानुपर्युपरि या च वर्तते ।
प्रतिभूश्चिरन्तनसुखापवर्गयोर्मम मानसे वसतु सा नगात्मजा ॥ १० ॥
नलिनीदलस्थजलसन्निभं वपुश्चपलाविलासचपलाश्च सम्पदः ।
क्षणिकं सुखं तदपि दुःखमिश्रितं न समाश्रयस्त्रिभुवनेश्वरीं विना ॥ ११ ॥
यदनुग्रहादमृततां व्रजेद् विषं गरलायते यदननुग्रहात् सुधा ।
मुनयोऽपि यां न परिबोद्धुमीशते जगदीश्वरीं शरणयामि तामहम् ॥ १२ ॥
यदिदं चकास्ति भुवने महस्त्रयं तपनक्षपाकरधनञ्जयात्मकम् ।
तदुपैति यन्नयनरूपभागितां गिरिकन्यका शरणमस्तु सा मम ॥ १३ ॥
व्यवहारजातमिह विष्टपत्रये यदुपज्ञमेव कथयन्ति सूरयः ।
दधते प्रमाणपदवीं यदुक्तयो मयि सा हिमाचलसुताऽनुकम्पताम् ॥ १४ ॥
वितथा तथागतमतप्रणालिका न कथाऽपि साङ्ख्यमतवादिनां हिता ।
अलमन्यशास्त्रपरिशीलनैरपि श्रयतां परं गिरिसुतामिदं मनः ॥ १५ ॥
गणयन्तु जैमिनिमतावलम्बिनः सवनादिसम्भवमपूर्वसञ्चयम् ।
दृढभक्तिसक्तिहतसर्वसंशयाः शिवशक्तिरूपयुगमाश्रयामहे ॥ १६ ॥
श्रुतिवाक्यजातकथितार्थनिर्णये विवदन्तु नित्यमिह साम्प्रदायिकाः ।
अनया किमन्धकनिहन्तृवल्लभाचरणाब्जसक्तमनसां वितण्डया ॥ १७ ॥
अभवत् कदाचिदतिलोलचेतसामवतप्रदेशनकुलस्थितं हि नः ।
अधुना धुनाति न विकल्पमारुतः स्थिरभक्ति शैलतनयापदे मनः ॥ १८ ॥
धनलोभ तुभ्यमविवेककारिणे विनयान्मया विरचितोऽयमञ्जलिः ।
समुपेयुषां शरणमद्रिकन्यकां न मनाग्धनार्जनमुपासितुं स्पृहा ॥ १९ ॥

यदपाङ्गभङ्गिरचनावशंवदो भगवान् स्वयं परशिवोऽपि चेष्टते ।
करुणामयीं त्रिभुवनैकनायिकामवलम्ब्य तां विगतशङ्क मास्महे ॥ २० ॥
मथनोत्थितं सकललोकभीषणं प्रसभं निपीय गरलं हलाहलम् ।
न मनागपि क्षतिमवाप धूर्जटिस्तदिदं शिवास्फुटकटाक्षजृम्भितम् ॥ २१ ॥
न सभासु चित्तमधुना विपश्चितां रमते न वा मम वसुन्धराभुजाम् ।
न कवित्वदर्पमपि कर्तुमीहते निभृतं परं श्रयति सर्वमङ्गलाम् ॥ २२ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां शरणागतिस्तवः ॥

उदयस्तवः

समुदेति यथा नभस्तले तिमिरं दूरमपास्य चन्द्रिका ।
उदयोऽस्तु तथा तवाऽम्बिके मम चित्ते हतमोहकल्मषे ॥ १ ॥
उदयोऽस्तु पितामहस्तुते सुखसंविष्टविभुप्रबोधिनि ।
उदयोऽस्त्वविचिन्त्यवैभवे हरिमाये मधुकैटभार्दिनि ॥ २ ॥
उदयोऽस्तु महेन्द्रवन्दिते स्फुरदष्टादशबाहुशालिनि ।
उदयोऽस्तु जगत्त्रयार्दिनं महिषं हन्तुमुपात्तविग्रहे ॥ ३ ॥
उदयोऽस्तु हिमाचलस्थिते प्रणमन्निर्जरवृन्दवर्णिते ।
उदयोऽस्तु कृपात्तवाक्सुधाहृतदुःखे शिवदूति चण्डिके ॥ ४ ॥
उदयोऽस्तु सरोषहुङ्कृतिद्रुतभस्मीकृतधूम्रलोचने ।
उदयोऽस्तु महाट्टहासिके बलवद्दैत्यविमर्दतत्परे ॥ ५ ॥
उदयोऽस्तु सलीलमाहवे सहसा भक्षितरक्तबीजके ।
उदयोऽस्तु महापराक्रमे हतचण्डे कृतमुण्डखण्डने ॥ ६ ॥
उदयोऽस्तु निशुम्भमर्दिनि प्रसभप्रोद्धृतशुम्भकण्टके ।
उदयोऽस्तु समाधिपूजिते सुरथक्ष्मापतितापहारिणि ॥ ७ ॥
उदयोऽस्तु कपालिवल्लभे करुणाशालिनि खड्गधारिणि ।
उदयोऽस्तु गदाधरार्चिते गिरिकन्ये गजराजगामिनि ॥ ८ ॥
उदयोऽस्तु घनाघनस्वने घटितस्वात्मजनाघनाशने ।
उदयोऽस्तु चराचरात्मिके छलशाठ्यादिविकारहारिणि ॥ ९ ॥
उदयोऽस्तु जगत्त्रयेश्वरि ज्वलदष्टापददीप्तिशोभिते ।
उदयोऽस्तु क्षणद्विभूषणे भवझञ्झानिलभीति-वारिणि ॥ १० ॥

उदयोऽस्तु टणद्धनुर्गुणे ठयुगभ्राजितमन्त्रपल्लवे ।
उदयोऽस्तु सुकीर्तिडिण्डिमे स्फुटढक्कारवभग्नशात्रवे ॥ ११ ॥
उदयोऽस्तु तडिल्लताप्रभे तनुमध्ये तरुणेन्दुमण्डिते ।
उदयोऽस्तु दयापयोनिधे दलदिन्दीवरदीर्घलोचने ॥ १२ ॥
उदयोऽस्तु धनाधिपस्तुते धृतविश्वे धरणीधरात्मजे ।
उदयोऽस्तु नृमुण्डभूषिते नददम्भोदगभीर-निस्वने ॥ १३ ॥
उदयोऽस्तु पुराणपण्डिते प्रियभक्ते पुरुहूतपूजिते ।
उदयोऽस्तु फलप्रदार्चने फणिपाशे फणिभूषणप्रिये ॥ १४ ॥
उदयोऽस्तु बृहद्यशोगणे बलिमाये बिसतन्तुकोमले ।
उदयोऽस्तु भवार्तिभञ्जनि भ्रमराम्बेश्वरि भक्तवत्सले ॥ १५ ॥
उदयोऽस्तु महालसाभिधे मृदुचित्ते मलयध्वजात्मजे ।
उदयोऽस्तु मयूरवाहने मधुरावासिनि मीनलोचने ॥ १६ ॥
उदयोऽस्तु यशोदयाधृते निजगर्भे यदुराजनन्दिनि ।
उदयोऽस्तु रवीन्दुलोचने रघुनाथार्चितपादपङ्कजे ॥ १७ ॥
उदयोऽस्तु लसन्मुखाम्बुजे ललिते लोहितलुब्धमानसे ।
उदयोऽस्तु विकारवर्जिते वरदे वैष्णवि विन्ध्यवासिनि ॥ १८ ॥
उदयोऽस्तु शताक्षि शारदे शरचापाङ्कुशपाशधारिणि ।
उदयोऽस्तु शशाङ्कशेखरे शरदिन्दुप्रतिमानने शिवे ॥ १९ ॥
उदयोऽस्तु षडाननाम्बिके षडभिज्ञे षडशीतिपीठगे ।
उदयोऽस्तु सदाशिवप्रिये समदृष्टे सकलार्थदायिनि ॥ २० ॥
उदयोऽस्तु समस्तवाङ्मय-प्रतिपाद्ये सुरसिद्धसंश्रिते ।
उदयोऽस्तु हयाननार्चिते हरिमध्ये हतदुष्टदानवे ॥ २१ ॥
उदयोऽस्तु वरे क्षमावतामुदयोऽस्तु क्षितिपालदेवते ।
उदयोऽस्त्वनुदायिनि ज्ञतामुदयोऽस्तु ज्ञपितात्मगौरवे ॥ २२ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायामुदयस्तवः ॥

निवेदनस्तवः

भ्रामं भ्रामं विषयविपिने निर्विण्णं मे हृदयमनिशम् ।
कुर्वीतोर्वीधरपतिसुते त्वत्पादाब्जे भ्रमरललितम् ॥ १ ॥

सायं प्रातर्हिमनगसुते गायन् प्रायस्तव गुणकथाः ।
नेष्याम्यायुः सफलमखिलं मातर्नातः परमभिलषे ॥ २ ॥
हीनं बन्धुस्वजनगुरुभिर्लीनं भक्त्या तव पदयुगे ।
मीनं तोयाद् बहिरिवगतं दीनं मां मा त्यज गिरिसुते ॥ ३ ॥
कालः कालाम्बुदघनरुचिर्बालादित्यप्रतिमनयनः ।
पाशं हस्ते जननि कलयन् नाशं कर्तुं ध्रुवमुपगतः ॥ ४ ॥
ज्वालाजालं भवदवभवं धत्ते हालाहलविषमताम् ।
कस्त्वामेकां पृथगगपतेर्बालां सद्यस्तदुपशमयेत् ॥ ५ ॥
वाताघातादिव किसलयं जातातङ्कं दलति हृदयम् ।
याता मातापितृसहचरास्त्रातारं कं जगति कलये ॥ ६ ॥
आबाल्यान्नः प्रकृतिचपलं चित्तं नित्यं भ्रमदपि भृशम् ।
शम्भोरम्भोरुहदलदृशं भार्यामार्यां श्रयति भवतीम् ॥ ७ ॥
मालां व्यालाधिपविरचितां भाले कालानलमपि तथा ।
बिभ्राणो यत्क्षरति न शिवस्तन्मूलं ते जननि महिमा ॥ ८ ॥
भानुः सानुग्रह इह भवेत् सिन्धुर्बिन्दोरतति समताम् ।
शैत्यं तस्मै दिशति दहनो यस्ते वस्ते प्रणतिकवचम् ॥ ९ ॥
श्यामा रामा रमयति लवं पीडां व्रीडां जनयति भृशम् ।
कामी वामस्तुदति नितरां व्यामोहं मे हर धरसुते ॥ १० ॥
वर्षाकालं सघनचपलं दृष्ट्वा चेतो भवति चपलम् ।
कारुण्यार्द्रां जननि च पलं दृष्टिं दीने वितर चपलम् ॥ ११ ॥
ग्रीष्मो भीष्मस्तपति बहुलं तृष्णा मुष्णाति च मम धृतिम् ।
संसाराख्यां मरुभुवमिमां प्राप्तो नाऽऽप्तं जनमुपलभे ॥ १२ ॥
नद्यः सद्यः शरदि सुतराः पद्या रुध्यान्न पथिकगतिम् ।
संसाराख्यं तदपि निबिडं कान्तारं नः प्रथयति भयम् ॥ १३ ॥
हेमन्तोऽपि क्षितिपरिसरं रुन्धन् सर्वं तुहिनपटलैः ।
भ्रान्तिं चित्ते दधदनुपदं संक्षोभं नः सपदि तनुते ॥ १४ ॥
कुन्दं विन्दत्यधिकसुषमां मन्दज्योत्स्नः स्फुरति न शशी ।
शीर्णं पर्णं गलति शिशिरे निर्वेदं मे भजति हृदयम् ॥ १५ ॥
मन्दं मन्दं वहति पवनो गन्धस्यन्दी मलयनिलयः ।
माकन्दाग्रे भवति कलिका दृष्ट्वा हृष्टं परभृतकुलम् ॥ १६ ॥
श्वेतच्छत्रं मदननृपतेरिन्दोर्बिम्बं लसति गगने ।
कन्दर्पस्य प्रियतमसखः कन्दर्पं नो मधुरुपनयेत् ॥ १७ ॥
रम्यो हर्म्यस्तुहिनधवलः पार्श्वे तस्य प्रमदविपिनम् ।
क्रीडावापी कमलमुकुलैः पूर्णा तूर्णं सुखयति मनः ॥ १८ ॥

श्रद्धाबद्धाञ्जलिरविरतं द्वारे तिष्ठत्यनुचरगणः।
आरुह्याश्वद्विरदशिबिका यातायातं विदधति जनाः॥ १९॥
पुत्रा विद्याविनयमहिताः पौत्रा अङ्काश्रयमुपगताः।
जाया छायावदनुसरति प्रौढः कोशः कनकबहुलः॥ २०॥
गावः श्यावाः शबलधवला द्रोणक्षीराः सुरभिसदृशः।
आजानेयाः पवनजवना वाहा गेहाजिरमधिगताः॥ २१॥
काल्यं शाल्योदनदधिघृतं माल्यं बाल्यात्प्रभृति सुलभम्।
द्राक्षारामाः फलभरनताः साक्षाद् दिव्यद्रवरसमुचः॥ २२॥
एवं सर्वं यदपि गिरिजे भाग्यायत्तं भजति विभवम्।
गाढोद्वेगश्चिरपरिचयाद् धीरस्तस्माद् विरजति जनः॥ २३॥
अभ्यस्यादौ निगममखिलं ज्ञात्वाऽप्यर्थं निजगुरुमुखात्।
स्वर्गप्राप्त्यै जननि घटते ज्योतिष्टोमप्रभृतिषु बुधः॥ २४॥
सूत्रं दाक्षीतनयगदितं वाक्यं कात्यायनविरचितम्।
भाष्यं पातञ्जलमपि पठन् धत्ते वैयाकरणपदवीम्॥ २५॥
नव्यं न्यायं परमगहनं प्रत्नं यत्नादपि च पठिता।
शास्त्रार्थेष्वप्रतिहतमतिः ख्यातिं वाचस्पतिरिति गतः॥ २६॥
जैमिन्युक्तेः शबरविवृतिं तन्त्रं कौमारिलमनुपमम्।
ज्ञात्वा प्राभाकरमपि मतं मीमांसायां भवति निपुणः॥ २७॥
शुद्धाद्वैतं श्रुतिमनुसृतं द्वैतं मध्वादिभिरभिहितम्।
कामं रामानुजमपि वचो बोद्धुं सम्यक्प्रभवति सुधीः॥ २८॥
साङ्ख्यं योगं सुगतसरणिं स्तोकं लोकायतमपि विदन्।
भ्रान्तो नानाविधमतवशान्निःसन्देहो न भवति नरः॥ २९॥
मन्ये भिन्ना अपि नगसुते सर्वास्तत्तन्मतसरणयः।
विन्दन्त्यन्ते तव पदयुगं स्रोतस्वत्यो जलनिधिमिव॥ ३०॥
वाराणस्यां विहितवसतिर्गङ्गास्नानादपहृतरजाः।
ध्यायन् विश्वेश्वरमनुदिनं शैवं रूपं भजति मनुजः॥ ३१॥
गाढासक्तिस्तव चरणयोर्भक्तिः पूर्वैर्मुनिभिरुदिता।
मातश्चित्रं किमिह जगतामस्माकं सा त्वयि यदि भवेत्॥ ३२॥
केचित् सिद्धिं द्रविणमपरे हृद्यां विद्यामथ कतिपये।
अन्ये कीर्तिं कतिचिदमलां याचन्ते त्वां भुवनजननि॥ ३३॥
अस्माकं तु स्वकुलविहितं शैवं मार्गं दृढमुपजुषाम्।
निष्प्रत्यूहं तव गिरिसुते भक्तेर्नान्यत्फलमभिमतम्॥ ३४॥
काकोलूकं तुरगमहिषं धेनुव्याघ्रं भुजगनकुलम्।
त्वद्भक्तानां सविधमगजे हित्वा वैरं विहरति सुखम्॥ ३५॥

उद्गायन्तस्तव गुणकथा बाष्पोत्पीडस्थगितनयनाः ।
धन्याः कुर्वन्त्युपवनगताः पूजापुष्पावचयरचनाम् ॥ ३६ ॥
योगक्षेमं वहसि जगतामापन्नानां भवसि शरणम् ।
काले काले भुवनमवितुं नानारूपैस्त्वमवतरसि ॥ ३७ ॥
एकैव त्वं जगति कुशला स्रष्टुं हन्तुं त्रिभुवनमिदम् ।
माया ब्रह्म प्रकृतिपुरुषौ विद्याऽविद्या त्वमसि सकलम् ॥ ३८ ॥
साङ्ख्यामूलप्रकृतिमतुलां शक्तिं शैवाः स्मरविजयिनः ।
मायां केचित् समभिदधते को जानीयात्तदिह भवतीम् ॥ ३९ ॥
ज्ञातुं तत्त्वं तव यदि शिवे कल्पन्ते न प्रवरमुनयः ।
मादृक्षाणां तदनुभवितुं मुग्धा बुद्धिः प्रसरतु कथम् ॥ ४० ॥
मूलाधारात् त्वरितमुदिता भित्वा सर्वं किल कुलपथम् ।
फुल्लाम्भोजे दशशतदले पत्या सार्धं विहरसि सुखम् ॥ ४१ ॥
ध्यानाभ्यासे विनिहितधियः प्रादुर्भूतां हृदयकमले ।
धन्याः केचित् सपदि भवतीं साक्षात्कुर्वन्त्यचलतनये ॥ ४२ ॥
अस्माकं तु प्रकृतितरलं स्थैर्ये धैर्यं श्रयति न मनः ।
तत्पश्यामः कथमुपहितां हृत्पद्मे त्वां विफलनयनाः ॥ ४३ ॥
आयुर्दीपं प्रतिदिनमयं कालो वायुर्लंघयति मम ।
दत्त्वा स्नेहं प्रचुरमचिरात् त्रातुं मातस्तव समुचितम् ॥ ४४ ॥
सानुप्रासप्रथितकरुणां शर्वाणि त्वामहमनुनये ।
चक्षुर्ग्राह्यं मम सकरणं रूपं किञ्चित् प्रकटय निजम् ॥ ४५ ॥
संसारार्तिप्रशमनकरं पश्यन् रूपं तव निरुपमम् ।
आमूलाग्रं पुलकिततनुर्मामज्जीमि प्रमदजलधौ ॥ ४६ ॥
तारां ताराधिपतिवदनां कालीं तालीवनघनरुचिम् ।
गौरीं शौरिप्रभृतिमहितां वन्दे मन्देतरगुणगणाम् ॥ ४७ ॥
दक्षा रक्षाविधिषु नमतां स्वक्षा यक्षाधिपबहुमता ।
दुर्गा दुर्गध्वनिशरणदा पायाज्जाया त्रिपुरजयिनः ॥ ४८ ॥
अम्बां शम्बायुधपरिणुतां रम्भासम्भावितपदयुगाम् ।
न त्वा नत्वा कथमिव भजेद् भद्रं रुद्रप्रियसखि नरः ॥ ४९ ॥
आस्तां तावद् बहुभिरुदितैर्याचे किञ्चिन्मुकुलितकरः ।
मा भूत् तत्तज्जनिषु जननि त्वत्पादाब्जस्मरणविरहः ॥ ५० ॥
अस्माकं कुलदेवताऽसि गिरिजे पूर्वैश्चिरादर्चिता
कस्याप्यन्यसुधाशनस्य न वयं सेवासु हेवाकिनः ।
हित्वा स्वर्गतरङ्गिणीं तनुमतां पापापनोदक्षमां
प्राज्ञः खल्वपि बल्वजैः परिवृतं किं पल्वलं गाहते ॥ ५१ ॥

मुञ्जक्षोणिपतिर्ययौ निजयशःपुञ्जं निधाय क्षिता-
वोजश्च स्मृतिशेषमात्रमभवद् भोजस्य दानार्जितम् ।
कालश्चर्वति सर्वमेव न चिराद् व्यालो यथा दर्दुरं
नाऽलं पालयितुं सुरस्त्वदितरो बालेन्दुमौलिप्रिये ॥ ५२ ॥
मायामानुषविग्रहो जगति यश्छायापतेर्वंशजः
कामारातिधनुर्विकृष्य जगृहे वामाधरां जानकीम् ।
मातः सोऽपि दशाननं दलयितुं जातः पुरा निष्प्रभ-
स्त्वामाराध्य जघान तं रणमुखे रामाभिधानो हरिः ॥ ५३ ॥
पित्रा पर्वतपुत्रि दैत्यपतिना वित्रासितं भूरिश-
स्त्रातुं प्रादुरभून्नृसिंहवपुषा कायाधवं माधवः ।
सारासारविशारदा तदनुजा नारायणी विश्रुता
कस्मादेवमुपेक्षसे पदनतानस्मान् कृपाकाङ्क्षिणः ॥ ५४ ॥
कारागारभयापहां वसुमतीभारावतारक्षमां
हारालङ्कृतकन्धरां स्मितमुखीं नारायणेनाऽऽहृताम् ।
पारावारपयोविहाररसिकां धाराधरश्यामलां
तारानायकशेखरस्य भवतीं दारानुदारां भजे ॥ ५५ ॥
कक्षातीतकृपारसां प्रणमतामक्षान्तिविद्राविणी-
मक्षाक्रीडनतत्परां शशिभृता, लक्षाधिकार्थप्रदाम् ।
यक्षाधीशशिरोमणिद्युतिभरप्रक्षालिताङ्घ्रिद्वयां
दक्षां त्वां शरणागतार्तिहरणे दक्षात्मजामाश्रये ॥ ५६ ॥
अङ्कापेतशशाङ्कशङ्कितमुखीं पङ्कात्मजन्मेक्षणां
हुङ्कारक्षपितासुरां मणिमयालङ्कारझङ्कारिणीम् ।
अङ्कासीनगजास्यहास्यमुदितां सङ्काशमानप्रभां
शङ्काहीनपराक्रमामनुभजे त्वां कालकण्ठप्रियाम् ॥ ५७ ॥
नीपारामपरिस्फुरन्मणिमयद्वीपाधिवासप्रियां
सूपापूपसमन्वितैः सकुसुमैर्धूपादिभिः पूजिताम् ।
भूपालाञ्चितपादपङ्कजयुगां रूपाधिकां, निर्जरैः
सूपास्यां भवतीं श्रये भवमहाकूपारपारप्रदाम् ॥ ५८ ॥
दातारो भुवि सन्ति सन्तु विपदस्त्राता भवेत्तेषु कः
ख्याता रक्षणकर्मणि क्षितिभुजो याता विनाशं स्वयम् ।
ताताद्याः स्वहितैकसाधनपरा वाताभ्रकल्पं जग-
ज्जाता नन्दगृहेषु विन्ध्यनिलये माता त्वमेवाऽसि नः ॥ ५९ ॥
नानायोनिषु सम्भवो यदि भवेत् का नाम तत्र क्षति-
र्हानादानपटुत्वमस्ति सुलभं ज्ञानात् समेषां यतः ।

मानातीतदयावशेन तव चेन्मानव्यलाभो मम
ध्यानालम्बनमस्तु ते गुणकथागानादरे वा रतिः ॥ ६० ॥
स्तेनाः षड्रिपवस्तुदन्ति नितरां श्येनाः शकुन्तान् यथा
के नासीरवदाविरस्ति पलितं फेनावदातप्रभम् ।
सेना सूर्यसुतस्य तिष्ठति पुरस्त्वेनां नियन्तुं क्षमां
मेनाकुक्षिभवां स्मरामि भवतीमेणाङ्कमौलिप्रियाम् ॥ ६१ ॥
जृम्भारम्भविडम्बिवक्त्रकुहरोऽहम्भावसम्भावितो
नव्याम्भोदरुचिः कुसुम्भनयनो मां भाययत्यन्तकः ।
डिम्भं शुम्भनिशुम्भदम्भदमनि स्तम्भायमानं भयात्
त्वं भूमीधरसार्वभौमतनये शम्भुप्रिये रक्ष माम् ॥ ६२ ॥
जम्भारातिपुरःसरैः सुरवरैः सम्भाविताङ्घ्रिद्वयां
स्तम्बाडम्बरपातकाद्रिपरिषच्छम्बायिताराधनाम् ।
त्वां बालारुणभासुरां भवमहाजम्बालसम्बाधिनी-
मम्बां बालमृगाङ्ककल्पितशिखालम्बामहं भावये ॥ ६३ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां निवेदनस्तवः ॥

आशंसास्तवः

मम चित्तमधुव्रतः समस्तं विषयं चम्पकपादपं विभाव्य ।
गिरिराजसुते पदाब्जयुग्मं भवदीयं परिषेवतामजस्रम् ॥ १ ॥
तव कीर्तिसुधारसानुपाने भवतु श्रोत्रयुगं समुत्सुकं मे ।
नियतं तव दर्शनार्थमम्ब त्वरया मातृगृहं सुतेव यायाम् ॥ २ ॥
नवरात्रमहोत्सवे विदध्यां सजपं सप्तशतीस्तवस्य पाठम् ।
करवीरजपालवङ्गपुष्पैस्तव पूजां रचयेयमादरेण ॥ ३ ॥
न धने न जने न कामिनीषु क्षणमात्रं रमतां मनो मदीयम् ।
करुणावरुणालयं त्वदीयं चरणाब्जं शरणं करोतु भक्त्या ॥ ४ ॥
मदमीलितचक्षुषां प्रशंसां धनिनां चाटुशतेन मा स्म कार्षम् ।
कवनं स्तवनात्मकं तवाऽम्ब स्रवतान्मद्वदनात् प्रसादपूर्णम् ॥ ५ ॥
त्वयि भक्तिरहर्निशं मदीया भवतादव्यभिचारिणी प्रकामम् ।
दुरिताचरणोन्मुखी प्रवृत्तिर्मम चित्तस्य कदापि देवि माभूत् ॥ ६ ॥

शरणागतवत्सला च नित्यं मम तिष्ठेर्जगदम्ब पृष्ठतस्त्वम् ।
करुणापरिपूरितं कटाक्षं मयि दीनावनदीक्षितं विमुञ्च ॥ ७ ॥
वदने मम नामधेयमास्तां तव दिव्यद्रवमाधुरीधुरीणम् ।
कृपया तव मोहवीचिजालं भवपाथोनिधिमाशु निस्तरेयम् ॥ ८ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायामाशंसास्तवः ॥

परिवारस्तवः

भ्रुकुटिविकटवक्त्रान् स्फारहुङ्कारघोरान्
कलितभुजगपाशान् दक्षिणाशाविभागे ।
तपनतनयदूतान् वीक्षमाणो जनोऽयं
रचयति परिवारप्रार्थनामार्तचेताः ॥ १ ॥
एहि शङ्कर दयापयोनिधे रक्षणाय मम दक्षजापते ।
श्वेतभूपमिव शर्व चर्वितुं मामयं रविसुतः कृतोद्यमः ॥ २ ॥
प्राददाद् यदुपमन्यवे भवान् दग्धपञ्चशर दुग्धसागरम् ।
तद्विमृश्य चरितं तव प्रभो को न वा भवति मुग्धमानसः ॥ ३ ॥
किं भवोरगविषोत्थितां रुजं शैलजाधव वदामि मामिकाम् ।
केवलं गदितुमेतदुत्सहे कालकूटजनितां स्मराऽऽत्मनः ॥ ४ ॥
यत्प्रयाति भुवनत्रये प्रथामाशुतोष इति नाम तावकम् ।
यौगिकत्वमपहाय रूढतां तद्भजेद् यदि न मे प्रसीदसि ॥ ५ ॥
त्वं कपर्द्यपि विभो महेश्वरः शूलभागपि विकारवर्जितः ।
भिक्षुकोऽपि सकलार्थदायकः कस्य नो भवसि विस्मयावहः ॥ ६ ॥
दण्डभृन्महिषकण्ठघण्टिकाः सन्निधौ शिव झणज्झणन्ति मे ।
यद्रवश्रवणकातरं मनः पङ्कजन्म मरुतेव कम्पते ॥ ७ ॥
कीर्तयन्ति चरितं तवाऽद्भुतं भूतिभूषित तथा कथाविदः ।
धैर्यवृत्तिरुपयाति सत्वरं स्थैर्यमत्र मम हृत्पथे यथा ॥ ८ ॥
चन्द्रशेखर मृकण्डुसम्भवस्तापसो जयति ते कृपास्पदम् ।
यत्स्मृतिर्मनसि, जीवितं नृणां सन्ददाति शतवर्षसम्मितम् ॥ ९ ॥
संस्थितां निजकरे सुधान्वितां किञ्चिदेव कलशीमवाञ्चय ।
विश्वनाथ तृषितस्य मे मुखे पञ्चषाः परिपतन्तु बिन्दवः ॥ १० ॥

यद्यदत्र श्रुतिशास्त्रसम्मतं विद्यते जगति कर्म शर्मदम्।
तस्य तस्य फलदायितां ध्रुवं वर्णयन्ति मुनयस्त्वदाश्रिताम् ॥ ११ ॥
धूर्जटे न सदसद्विवेकजं दोषमेति तव दानशौण्डता।
व्याघ्रगोगजनरेषु भिद्यते वारिणः किमिह तृप्तिकारिता ॥ १२ ॥
चन्द्रचूड निजभक्तिभाजने किं वदामि करुणार्द्रतां तव।
रक्षितुं बलिसुतं यदाकुलं त्वं चकर्थ हरिणाऽपि विग्रहम् ॥ १३ ॥
यद् विजित्य भुवनत्रयीमगाच्चक्रवर्तिपदवीं दशाननः।
त्वत्पदाम्बुजनिविष्टचेतसस्तस्य तत्पशुपते किमद्भुतम् ॥ १४ ॥
त्वां किराततनुमर्जुनः क्रुधा कार्मुकेण यदताडयद् रणे।
तद् बभूव तव तुष्टिकारणं बिल्वपल्लवसमर्पणादपि ॥ १५ ॥
त्वामुपास्य भगवन् भगीरथः स्वर्गसिन्धुमवतार्य यत्नतः।
तज्जलाञ्जलिनिवापकल्पनादात्मनः पितृऋणादमुच्यत ॥ १६ ॥
भूषणीकृतमहाभुजङ्गमश्चन्दनक्षितिरुहोऽसि जङ्गमः।
संश्रयस्तव नगेश जायतां शीघ्रमेव मम तापशान्तये ॥ १७ ॥
मन्दधीरपि सतीर्थ्यमण्डले ढौकितोऽपि परिहासपात्रताम्।
त्वत्प्रसादमधिगम्य पाणिनिः शाब्दिकप्रवरतामशिश्रियत् ॥ १८ ॥
अस्तु देव बहुजल्पकल्पना प्रस्तुतं किमपि वक्तुमुत्सहे।
त्वां विहाय हरिणाङ्कशेखरं नाऽन्यमत्र शरणं वृणीमहे ॥ १९ ॥

श्रीकार्तिकेय सुरकिन्नरगेयकीर्ते
त्वामप्रमेय भुजविक्रममर्थयेऽहम्।
कातर्यभाजि मयि षड्रिपुभिः परीते
आर्तनिपातय चिरं करुणावलोकम् ॥ २० ॥

लब्ध्वा वरं कमलसम्भवतः प्रमत्तो
मत्तो न कोऽपि बलवानिति मन्यमानः।
योऽपीडयत् त्रिभुवनं गुह तारकाख्यः
सोऽपि त्वया भुजबलादसुरो विजघ्ने ॥ २१ ॥

किं वा ब्रवीमि यदिह त्वयि विद्यमाने
सेनाधिपे दिविषदां तनये शिवस्य।
कामादयो भ्रमवशादपथे प्रविष्टं
ग्रामीणकं वनचरा इव मां तुदन्ति ॥ २२ ॥

उद्गीयते प्रतिदिशं वनदेवताभिः
क्रौञ्चाद्रिभेदजनिता तव कीर्तिगाथा।
सद्यो विभिद्य रिपुषट्कमिदं ममाऽपि
तां कृत्तिकातनय सार्थकतां नयस्व ॥ २३ ॥

स्वामिन्नतिक्रमितुमर्हसि निर्विशङ्कं
तातं महेश्वरमपि त्वमुदारतायाम् ।
सञ्जायते जगति शास्त्रविदां जनानां
पुत्रात् पराभवपदं स्पृहणीयमेव ॥ २४ ॥
सौभ्रात्रमत्र परिदर्शय मय्यनाथे
नाधेय तारकनिदन वा किमन्यत् ।
प्रायः प्रमाविषयतां भजते यदेतद्
धत्ते कुमारहृदयं नवनीतभावम् ॥ २५ ॥
स्तम्बेरमास्य भ्रमणं वितन्वन् संसारधन्वाध्वनि जातखेदः ।
हतो दुराशामृगतृष्णयाऽपि समाश्रये सम्भृतपुष्करं त्वाम् ॥ २६ ॥
न्यस्यन्ति ये मूर्धनि तावकीने दूर्वाङ्कुरान् काँश्चन भक्तिपूर्वम् ।
हेरम्ब विन्यस्यसि मूर्ध्नि तेषां नृपोचितं रत्नमयं किरीटम् ॥ २७ ॥
निरस्तशुभ्रांशुसमस्तबिम्बो विभाति हस्ते नवमोदकस्ते ।
धृतः करे भक्तजनाय दातुं कारुण्ययोगादिव पुण्यराशिः ॥ २८ ॥
विलीयते त्वज्जठरे विशाले कल्पान्तकाले सकलः प्रपञ्चः ।
यथा प्रचण्डे शितिकण्ठसूनो कूष्माण्डके तिष्ठति बीजपुञ्जः ॥ २९ ॥
पूजाविधौ ये गणराज तुभ्यं सनारिकेलं गुडमर्पयन्ति ।
तेषां त्वमेकान्तपरायणानां विघ्नेषु दत्से लगुडप्रहारम् ॥ ३० ॥
माहेश्वराणामथ वैष्णवानां सहस्ररश्मेः समुपासिनां वा ।
कार्येषु सर्वेष्वपि निर्विकल्पं भवत्सपर्याविषयैकमत्यम् ॥ ३१ ॥
निवेश्य वात्सल्यवशान्निजाङ्के सहोदरं मां जगदेकबन्धो ।
संसारसन्तापमपाकुरु त्वं गणेश कर्णव्यजनानिलेन ॥ ३२ ॥
हट्टेषु रथ्यासु चतुष्पथेषु पुरेषु दुर्गेषु वनस्थलीषु ।
ब्रह्माण्डभाण्डं परितो विभिन्दन् संश्रूयते वै तव कीर्तिघोषः ॥ ३३ ॥
सिन्दूरपुञ्जारुणमञ्जुभासं लम्बोदरं संश्रितमन्दहासम् ।
ये त्वामजस्रं हृदि वासयन्ति दासन्ति तेषां शतशः क्षितीशाः ॥ ३४ ॥
स भाजनं देव समस्तसम्पदां सभाजनं राजसभासु विन्दति ।
विभाति तस्य प्रतिभाऽतिनिर्मला पदाम्बुजं यस्तव चिन्तयेत्सदा ॥ ३५ ॥
यः प्रपद्य शितिकण्ठशिष्यतामाससाद युधि दुर्लभं यशः ।
तं द्विजातिकुलभूषणं वयं रेणुकातनयमाश्रयामहे ॥ ३६ ॥
वर्णयामि किमहं महाद्भुतं जामदग्न्य भवतः पराक्रमम् ।
विद्विषां रुधिरवारिणा रणे यश्चकार पितृतर्पणक्रियाम् ॥ ३७ ॥
कश्यपाय निजविक्रमार्जितां सम्प्रदाय भुवमर्जुनीमिव ।
भार्गव स्फुटमदर्शयद् भवान् निःस्पृहत्वगुणमग्रजन्मनाम् ॥ ३८ ॥

ब्राह्मणेषु तव लोकविश्रुतं पक्षपातमवगम्य निस्तुलम् ।
याचितुं तव समीपमागमद् दुर्बलोऽपि नितरामयं द्विजः ॥ ३९ ॥
यः सहस्रभुजदण्डमण्डितो नर्मदामपि रुरोध केलिषु ।
सोऽपि भूमिमधिशायितः क्षणादर्जुनस्तव कुठारधारया ॥ ४० ॥
सर्वतः प्रसृमरा धरातले विप्रवर्य तव कीर्तिकौमुदी ।
क्षत्रपङ्कजवनेषु तत्क्षणं सन्दधे चिरतरं निमीलनम् ॥ ४१ ॥
भूतले वसतिरर्थिसात्कृते नोचितेति मनसा विभावयन् ।
मार्गणेन चलदूर्मिसङ्कुलं दूरमब्धिमुदसारयद् भवान् ॥ ४२ ॥
यत् त्वमावहसि धर्मपुत्रतां शैलराजदुहितुर्भृगूत्तम ।
तद् विपत्तिशतपीडिते मयि भ्रातृभावमपि धर्तुमर्हसि ॥ ४३ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां परिवारस्तवः ॥

निद्रास्तवः

नक्षत्रदीपनिकरं गगने शरावे
संस्थाप्य शीतमहसो गृहमागतस्य ।
नीराजनां वितनुते दयिता त्रियामा
निद्रां विधेहि गिरिजे मणिमञ्चके त्वम् ॥ १ ॥
अर्कात्मकं तव निमीलति सव्यनेत्रं
वामं निशाकरमयं लभते विकासम् ।
मध्यस्थतां भजति वह्निमयं तृतीयं
निद्रा तथापि हृदये पदमादधातु ॥ २ ॥
हस्ते करोति रजनीमुदयाद्रिवेदी-
मारुह्य शीतकिरणः कमनीयकान्तिः ।
ताराक्षतानवकिरन्त्यपसार्य दूरं
सप्तर्षयो जवनिकां तिमिराभिधानाम् ॥ ३ ॥
मातस्त्वदीयवदनेन हृतां स्वकीयां
सम्प्राप्तुमिच्छति पुनः सुषमां सुधांशुः ।
आयान्ति गूढपुरुषा इव भीतभीता
वातायनेन सदने तव तन्मयूखाः ॥ ४ ॥

सङ्कोचमेति कमलं गृहदीर्घिकायां
प्राप्तुं तुलां तव निमीलितलोचनस्य ।
म्लानिं स्वबन्धुजनितां परिशङ्क्य तस्य
मुग्धं मुदा हसति कैरवचक्रवालम् ॥ ५ ॥

दीपं निधेहि चपले तपनीयपीठे
ताम्बूलभाजनमुदञ्चय चञ्चलाक्षि ।
निद्रातुरं गजमुखं सखि शाययेति
संश्रूयते कलकलस्तव सेविकानाम् ॥ ६ ॥

आदातुमिच्छति करे मुकुरभ्रमेण
मुग्धा वधूः स्फटिकभूमिगतं शशाङ्कम् ।
मत्वा क्षितौ निपतितं नवनीतगोलं
बद्धस्पृहो भवति तं गिलितुं बिडालः ॥ ७ ॥

राकापतिः पवनदूतमुखान्निशम्य-
स्तेयापराधमलिनां मलिनाशयानाम् ।
बन्दीकरोति कुपितः कमलाभिधाने
कारागृहे जननि तानखिलानिदानीम् ॥ ८ ॥

रक्तोत्पलं मुकुलितं दयितभ्रमेण
संश्लिष्य मोदमधिगच्छति चक्रवाकी ।
आलोक्यते प्रणयिनां हृदयप्रवृत्तिः
प्रायो विवेकविधुरा नगराजकन्ये ॥ ९ ॥

ध्वान्तच्छटां जवनिकामपनीय तारा-
पुष्पाञ्जलिं गिरिसुते पुरतो विकीर्य ।
रङ्गस्थले नभसि साम्प्रतमाविरस्ति
ज्योत्स्नानटीसहकृतो विधुसूत्रधारः ॥ १० ॥

तारागणः सुविमले गगनप्रदेशे
शीतांशुमण्डलमयं परिवेष्टमानः ।
आभाति नीलमणिनिर्मितवर्धमाने
शाल्योदनः सघृतपिण्ड इवाऽवकीर्णः ॥ ११ ॥

मन्दाकिनी समवगाहनतत्परस्य
शीतद्युतेर्मदकलस्य मरालयूनः ।
कीर्णानि विष्वगनिलेन तनूरुहाणि
नक्षत्रसंहतिमिषेण समुल्लसन्ति ॥ १२ ॥

नेदं नभः सरसगोमयलिप्तमेतद्
गेहाङ्गणं, न विधुरेष सुवर्णकुम्भः ।

नाऽसौ निशा कुलवधूरियमृक्षपङ्क्ति-
नोंवा तया विलिखिता किल रङ्गवल्ली ॥ १३ ॥
पुष्ट्या नितान्तहरिमाणमुपागतायां
विस्तारभाजि गगनामरवाटिकायाम् ।
फुल्लान्युडूनि कुसुमानि विभान्ति तेषां
पुञ्जस्तु मञ्जुलरुचिः कुमुदैकबन्धुः ॥ १४ ॥
लीनं दिवाकरभयाद् गिरिगह्वरेषु
निर्गत्य सम्प्रति तमः क्षितिमावृणोति ।
क्षीराम्बुधौ सुखमुपेयुषि योगनिद्रां
नारायणे त्रिजगतीमिव दैत्यचक्रम् ॥ १५ ॥
यत्किञ्चिदस्ति भुवने वररत्नजातं
तस्य ध्रुवं भगवदर्पणमेव योग्यम् ।
एवं विचिन्त्य जलधेस्तुहिनांशुरत्नं
प्राप्तं समर्पयति विष्णुपदे निशीथः ॥ १६ ॥
यः पार्वणं तुदति मां पिशुनस्तदीयां
सञ्ज्ञामिदं कलयतीति तमो जिघांसुः ।
दीप्तांशुभल्लपटलीं गगनद्विपेन्द्रा-
रूढोऽभिवर्षति नगेन्द्रसुते मृगाङ्कः ॥ १७ ॥
दृष्ट्वा सुधांशुमुदितं तृषिताश्चकोराः
सौत्रामणीमभिपतन्ति दिशं जवेन ।
तूर्यस्वनस्य मधुरं विरुतं तदीयं
दोषातनस्य भजते निखिलामभिख्याम् ॥ १८ ॥
उन्मज्ज्य पूर्वजलधेः कुरुते द्विजेशो
निर्नीरितं निजमयूखजटाकलापम् ।
यस्मात् समुत्थितमिदं जलबिन्दुजालं
तारामिषेण गगने प्रतिभाति देवि ॥ १९ ॥
ध्वान्तच्छटां प्रसृमरां परितो विलोक्य
श्रुत्वा गभीरमधुरं पटहस्य घोषम् ।
उत्कण्ठितो घनधिया निजबर्हभारं
छेकः शिखावलगणस्तरलीकरोति ॥ २० ॥
प्रज्वालिताः परिजनैस्तव रत्नदीपा
निष्कासयन्ति तिमिरं शयनालयस्थम् ।
बद्धाञ्जलिः कविजनः स्तुतिमातनोति
निद्रां विधेहि गिरिजे मणिमञ्चके त्वम् ॥ २१ ॥

प्रेमाम्बुपूरपरिपूरितनेत्रयुग्मो
विज्ञापयामि विनयावनतोत्तमाङ्गः ।
सेवापरं जनमिमं हृदये स्मरन्ती
निद्रां विधेहि गिरिजे मणिमञ्चके त्वम् ॥ २२ ॥

रजनिशकुनिकाया व्योमनीडस्थमण्डं
कुसुमशरनृपालस्यातपत्रं मनोज्ञम् ।
इदमपगतनिद्रं स्वर्णदीपुण्डरीकं
विलसति विधुबिम्बं देवि निद्रां विधेहि ॥ २३ ॥

तूष्णींभावं भजति मुखरा सारिका तावकीना
निद्रालोलाः कमलमुकुलं चञ्चरीकाः श्रयन्ति ।
मन्दं मन्दं गगनपदवीं लङ्घते शीतभानु-
स्तल्पेऽनल्पे कनकघटिते देवि निद्रां विधेहि ॥ २४ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां स्तवमञ्जूषायां निद्रास्तवः ॥

परिपूर्तिस्तवः

आशैशवाद् गिरिसुता चरणारविन्दं
प्राग्जन्मपुण्यपरिपाकवशात् प्रपन्नः ।
माहेश्वरागमविशुद्धसतिर्व्यतानी-
न्मञ्जूषिकामिह वसन्तकविः स्तवानाम् ॥ १ ॥

भक्तिप्रकर्षपरिपूतधियो भजन्ते
ये पाटवं न परदोषगवेषणायाम् ।
ये वा परस्य गुणलेशमपि स्तुवन्ति
ते मत्कृतिं सहृदयाः परिशीलयन्तु ॥ २ ॥

वाग्देवीकरुणाकटाक्षवलनात् संसिद्धसारस्वताः
सारासारवचोविचारचतुरा हंसन्ति निर्मत्सराः ।
साहङ्कारतया वृथा कलकलैः कुर्वन्ति कर्णज्वरं
छिद्रान्वेषणतत्परा हतधियः काका वराका इव ॥ ३ ॥

योऽसौ स्कन्दद्विपवदनवत् स्नेहपात्रं भवान्याः
कामारातेर्निरवधिकृपाशेवधेर्गर्भदासः ।
मञ्जूषेयं स्तवनमणिभिः पूरिता तत्प्रणीता
सद्भाग्यानां जनयतु नृणां भक्तिसम्पत्तिलाभम् ॥ ४ ॥

निर्मात्सर्या यदि कृतिमिमामाद्रियन्ते मदीयां
दोषारोपप्रवणमनसां दूषणैः को विषादः ।
प्रालेयांशौ द्रवति नितरामुद्गते चन्द्रकान्तः
किं पाषाणे प्रकृतिकठिने स्यन्दनं क्वापि दृष्टम् ॥ ५ ॥
राजद्वारे सदसि विदुषां मण्डले वा कवीनां
सम्मानार्थं व्यरचि न मया नूनमेष प्रबन्धः ।
श्लाघन्तां वा विदधतु जना दूषणं वा यथेच्छं
प्रीता स्तुत्या नियतमनया जायतां शैलकन्या ॥ ६ ॥
निःशङ्कं कवयन्तु केचन नराभासान् स्तुवन्तो हठात्
सद्यः क्षुद्रजनैकहृद्यमपरे सन्दर्भमातन्वताम् ।
धन्यः कोऽपि कविः स एव हिमवत्कन्याकटाक्षच्छटा-
विस्फूर्जत्प्रतिभाङ्कुरो भगवतीं तामेव यः शंसति ॥ ७ ॥
धर्माचार्यजगद्धरप्रभृतिभिर्माहेश्वरैः प्राक्तनैः
क्षुण्णां पुण्यतमामवाप्य सरणिं भक्त्या प्रणीता मया ।
पुत्रस्नेहवशात् स्वयं गिरिजया कर्णावतंसीकृता
जीयात्प्राज्ञमनोविनोदनिपुणा स्तोत्रावलीयं चिरम् ॥ ८ ॥
मृद्वीकामधरीकरोति तनुते मध्वीरसं नीरसं
न्यक्कारं सहकारमाशु नयति ब्रूते सितां निर्जिताम् ।
आज्यं प्राज्यगुणं करोति विकलं शैलाधिराजात्मजा-
कीर्त्याऽऽम्रेडनतत्परा स्तुतिरियं वर्वर्ति सर्वङ्कषा ॥ ९ ॥
दुर्गायशः सुरभितां कृतिभिः परेषां
मा नाम मत्कृतिमिमां तुलयन्तु मान्याः ।
देवार्चनाय कलिता कलिका लतायाः
किं स्यात्कदापि पिशुनैर्लशुनैः समाना ॥ १० ॥
सद्भक्तिसारभरिता प्रमिताक्षराऽपि
मञ्जूषिका वितनुयाद् विदुषां प्रमोदम् ।
स्वल्पाऽपि भृङ्गनिवहं बकुलद्रुमस्य
किं मञ्जरी रसझरी न जरीहरीति ॥ ११ ॥
श्रीशैवागमतत्त्वबोधनिपुणा नन्दन्तु माहेश्वराः
शास्त्राभ्यासपरायणा बुधजना विन्दन्तु सम्भावनाम् ।
मिथ्याज्ञानतमोविमोहदमने रत्नप्रदीपायितं
द्वन्द्वं श्रीशिवशक्तिरूपमनिशं विद्योततां मानसे ॥ १२ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायां परिपूर्तिस्तवः ॥

उपसंहारस्तवः

स्तवमञ्जूषिकामेतां वसन्तकविनिर्मिताम् ।
उद्घाट्य प्रतिगृह्णन्तु बुधा भक्तिसुधारसम् ॥ १ ॥
आस्वाद्य स्तवमञ्जूषागतं भक्तिरसायनम् ।
भवरोगाज्जना मुक्ता जीवन्तु शरदः शतम् ॥ २ ॥
यः स्वप्नेऽपि न मन्यते भगवतः शम्भोः परं दैवतं
यः पुत्रो धरणीधरेन्द्रदुहितुः प्रेष्ठः कनिष्ठः स्मृतः ।
भ्रातृस्नेहमुरीकरोति सततं यस्मिन् गणाधीश्वर-
स्तस्येयं कृतिरुज्ज्वला वितनुतां निर्मत्सराणां मुदम् ॥ ३ ॥
सर्वे रसा दधति नीरसतां यदग्रे
निःसंशयं जयति भक्तिरसः स एकः ।
तं मुक्तहस्तमिह पाययितुं समस्ता-
नेतां प्रपां स्तुतिमयीमकरोद् वसन्तः ॥ ४ ॥
दैवादिमामुपगता भवतापजन्यां
धन्याः सुखेन शमयन्तु निजामुदन्याम् ।
अन्ये पुनर्मृगजले दृशमादधाना
भ्राम्यन्तु हन्त विपथेषु नरा वराकाः ॥ ५ ॥
ये शैवतत्त्वमवगत्य गुरुप्रसादात्
प्रालेयशैलतनयां हृदि भावयन्ति ।
तेषामपेततमसां दृढभक्तिभाजां
स्वर्गापवर्गपदवी न दवीयसी स्यात् ॥ ६ ॥
किं वेदपाठेन किमध्वरैर्वा किमङ्ग गङ्गाजलमज्जनेन ।
निःशेषबन्धच्छिदुरो न यावत् सञ्जायते शाम्भवतत्त्वबोधः ॥ ७ ॥
साङ्ख्यं न सङ्ख्यानमुपैति यस्या योगो न योगं लभते तुलायाम् ।
न वेद वेदान्तमतं यदन्तं विजृम्भतां सा शिवभक्तिरेव ॥ ८ ॥
कणायते सुवर्णाद्रिर्दोषस्तस्य गुणायते ।
तृणायते जगत् तस्य यस्य भक्तिर्धनायते ॥ ९ ॥
विजयते तरुणेन्दुशिखामणिर्विजयते तुहिनाचलकन्यका ।
विजयते सरणिः श्रुतिसम्मता विजयते शिवभक्तिरचञ्चला ॥ १० ॥
निर्वेदं गमिताऽसि मज्जनवशाद् यच्छब्दशास्त्रार्णवे
यत् त्वं कर्कशतर्कवर्त्मनि चिरं सञ्चारणात्क्लेशिता ।
तत्सर्वं परिहर्तुमात्मकलुषं नीताऽसि भीतात्मना
मातर्भारति शैलराजतनयां स्तुत्वा परं गौरवम् ॥ ११ ॥

वित्तं पित्तवदुज्झितं बुधजने मानोऽपि नाऽपेक्षितो
नानादेशपरिभ्रमादपि दृढं वैमुख्यमालम्बितम् ।
क्रीडाकौतुकशालिनां न सुहृदां गोष्ठी चिरं सेविता
मातर्भारति सेवया तव परं नीतं मया जीवितम् ॥ १२ ॥

मातर्भारति सारभूतमखिलं संश्रूयतां मद्वचः
खेदं मा स्म गमः कदापि हृदये तुच्छात्मनां कुत्सनैः ।
दृष्ट्वा देवि तव क्ष्माधरसुतास्तोत्रक्रियाकौशलं
कुर्वीरन्निह साधुवादमुखराः सन्तः शिरःकम्पनम् ॥ १३ ॥

ज्योतिष्टोममुखैर्मखैर्मुकुलिता दृष्टिर्न धूमाकुला
प्राणायामपरायणेन न मया श्वासावरोधः कृतः ।
तीर्थानामवगाहनं न विहितं, साटोपमाढौक्यते
शुद्धाम्नायपुरस्कृतः पशुपतेः सद्भक्तिघण्टापथः ॥ १४ ॥

स्वर्गो माऽस्तु कुमारिलप्रभृतिभिर्मीमांसकैरादृतो
मुक्तिर्मा स्म भवद् गदाधरमुखैरङ्गीकृता तार्किकैः ।
नेच्छामो मधुसूदनाद्यभिमतं ब्रह्मैक्यमप्यात्मना-
मास्तां सा शिवभक्तिरेव मुनिभिः सर्वोपरिस्थापिता ॥ १५ ॥

एषा वसन्तकविना रचिता नवीना
वर्वर्ति शैलदुहितुः स्तुतिकीर्तिगाथा ।
एकैक पद्यमिह भक्तिरसानुविद्धं
संसारतापपरिपाकमपाकरोति ॥ १६ ॥

वैदर्भरीतिघटितां स्तवरत्नयुक्तां
मञ्जूषिकां सुकृतिनामभिलाषभूमिम् ।
शैलाधिराजतनयाचरणारविन्दे
बद्धाञ्जलिः सविनयं विनिवेदयामि ॥ १७ ॥

मञ्जूषया मत्कृतया स्तवानां प्रीतिं प्रयायादनया नितान्तम् ।
महादलग्रामकृताधिवासा महालसाख्या कुलदेवता नः ॥ १८ ॥

॥ इति परममाहेश्वरेण शेवडेकुलसम्भवेन वसन्तकविना विरचितायां
स्तवमञ्जूषायामुपसंहारस्तवः ॥

श्लोकानुक्रमणिका

(अ)	पृ०	श्लो०
अकार्षं केशानां युवतिः	३९	११
अक्षरक्रमविवेकवर्जिता	६३	११
अक्षरत्रितयमेतदद्भुतं	५२	१८
अङ्कापेतशशाङ्कशङ्कित	८७	५७
अङ्गदं तव सुवर्णनिर्मितं	२८	१२
अङ्गारको व्रजति न	५९	१५
अचलनन्दिनि बल्लवयोषितां	१०	१६
अज्ञानदोषाभिभवाद	६१	८
अज्ञानवद्विलयमेति	१४	२
अद्वयं भवति सम्मतं	६३	२२
अधिगतपरभागा मण्डलं	२९	१५
अधुना कथयामि ते	४३	१०
अनन्तरोगोपहतं कलेवरं	२४	२९
अन्याय्यमत्र भुवने नितरां	७	२७
अपदानकथा वृथा भवेद्	७१	१७
अपि दुष्कृतिभाजनं	७१	२२
अभवत्कदाचिदतिलोल	८१	१८
अमितौजसा प्रणमता	८०	२
अभिनवगजकृत्तिकां	३०	३
अभिनवनवनीतकोमलं	५१	१४
अभिरुचिर्भुवनेश्वरि	७५	१२
अभ्यर्दितोऽपि जगतां रवि	६	१७
अभ्यस्यादौ निगममखिलं	८५	२४
अभ्यासतोऽपि बहवः	८	३६
अमरमुकुटीमाणिक्यानां	१३	१९
अमात्यो गोविन्दः श्रयति	४१	२७
अम्बां शम्बायुधपरिणुतां	८६	४९
अम्भःप्रपूर्णान् कलधौत	२५	१
अयि ते दयिते पिनाकिनः	७०	२
अयि दिक्षु विदिक्षु	७२	८
अयि मेषशिशुं	६१	३
अयि सभाजयितुं रविमुद्गतं	१०	१०
अये येनाऽऽकृष्टं भगवति	१७	३
अर्कात्मकं तव निमीलति	९२	२
अर्थं न मुञ्चति पदानि	६	२०
अवतंसितां बकुलमञ्जरीं	२९	२१

	पृ०	श्लो०
अविरतमिह लब्ध्वा हस्तयोः	२८	१७
अशिशिरकरः प्रत्यायातः	१२	११
अस्तु देव बहुजल्पकल्पना	९०	१९
अस्माकं कुलदेवताऽसि	८६	५१
अस्माकं तु प्रकृतितरलं	८६	४३
अस्माकं तु स्वकुलविहितं	८५	३४
अहमलङ्कृतिरीतिगुणादिषु	४	३४
अहिमकिरणे सीताजानौ	१३	२०
(आ)		
आकर्णयं गुरुमुखाद्	७८	१६
आकर्षणं प्रकुरुते सुर	१९	१३
आक्रन्दतोऽपि मम नैव	५५	२२
आक्रामन्ती नखाग्राद्	३४	११
आगोपालं परिचितयशाः	१	११
आचरन्ति सविधे	६४	३१
आचान्तमाध्वीकरसावलेपा	९	३९
आच्छादिते हिमचयैः	४४	४
आदातुमिच्छति करे	९३	७
आदाय लोहनलिकां	१५	१०
आदित्यमुन्नमितकन्धर	१५	९
आपूर्णकर्णविवरास्तव	७३	१८
आप्लाव्यमानाः सलिलैः	२६	१२
आबालवृद्धं प्रथते पृथिव्यां	२६	९
आबाल्यान्नः प्रकृतिचपलं	८४	७
आम्नायाध्ययनं शुक	२३	१६
आयाता पातुमेषा वदन	३७	३७
आयाति तस्य सदनं	७८	१९
आयुर्दीपं प्रतिदिनमयं	८६	४४
आराधनेन दृढभक्ति	६०	२१
आर्तत्राणप्रथितकरुणा	५१	१५
आलोक्य मूर्धनि धृतां	७९	२७
आवर्जयेत् सहृदयान्	९	४४
आशाधिपा विरचिता	५९	११
आशैशवात्तव पदाम्बुज	५२	१
आशैशवाद् गिरिसुता	९५	१
आसञ्जितं तव विभास्वर	२८	६
आसन् गमागमनशून्य	१५	८

आसादयेद् यज्जलमज्जनेन २६ ६
आस्तां तावद्वहुभिरुदितैः ८६ ५०
आस्तां प्रातिस्विकगुणकथा ४८ ८
आस्वाद्य स्तवमन्जूषा ९७ २

(इ)

इदमहो शतजन्मतपःफलं ७४ ७

(उ)

उचिता समदृष्टिता ७१ १३
उच्चावचानपि परिभ्रमता ५५ २५
उडुचिपिटकान् विक्रेतुं यः १३ १६
उडुशकुनयः सुप्तं दृष्ट्वा १२ १०
उत्क्षिप्य बाहुयुगलीमिद २४ ३२
उत्तंसयन्तु कृतिनो नगराज ८ ३१
उत्फुल्लपङ्कजवनान् १५ १२
उत्फुल्लपङ्कजसहोदर ७८ २२
उदयशिखरं पाथोजिन्याः ११ १
उदयोऽस्तु कपालिवल्लभे ८२ ८
उदयोऽस्तु घनाघनस्वने ८२ ९
उदयोऽस्तु जगत्त्रयेश्वरि ८२ १०
उदयोऽस्तु टणद्धनुर्गुणे ८३ ११
उदयोऽस्तु तडिल्लताप्रभे ८३ १२
उदयोऽस्तु धनाधिपस्तुते ८३ १३
उदयोऽस्तु निशुम्भमर्दिनि ८२ ७
उदयोऽस्तु पितामहस्तुते ८२ २
उदयोऽस्तु पुराणपण्डिते ८३ १४
उदयोऽस्तु बृहद्यशोगणे ८३ १५
उदयोऽस्तु महालसाभिधे ८३ १६
उदयोऽस्तु महेन्द्रवन्दिते ८२ ३
उदयोऽस्तु यशोदयाधृते ८३ १७
उदयोऽस्तु लसन्मुखाम्बुजे ८३ १८
उदयोऽस्तु वरे क्षमावता ८३ २२
उदयोऽस्तु शताक्षि शारदे ८३ १९
उदयोऽस्तु षडाननाम्बिके ८३ २०
उदयोऽस्तु समस्तवाङ्मय ८३ २१
उदयोऽस्तु सरोषहुङ्कृति ८२ ५
उदयोऽस्तु सलीलमाहवे ८२ ६
उदयोऽस्तु हिमाचलस्थिते ८२ ४
उद्गायन्तस्तव गुणकथा ८६ ३६
उद्गीयते प्रतिदिशं ९० २३
उद्यन्नवाम्बुदरुचिः ७७ ११
उन्मज्ज्य पूर्वजलधेः ९४ १९
उन्मिषत्कमलपत्रजित्वरं १ ८
उपयास्यति नाऽन्यदेवतां ७१ ११
उपवने नववंशलतादले १० ६
उमारूपं धृत्वा हिमनग १७ ८
उररीकुरु वा जहीहि ७१ २४

(ऊ)

ऊर्ध्वं विवाहविधितः ४६ १६
ऊरुद्वयं तव विलोक्य ३० १३

(ए)

एकमेव तव रूपम् ६३ १२
एकैव त्वं जगति कुशला ८६ ३८
एतदत्र विदधाति ७२ ९
एतदर्भकनिसर्गचापलं ६२ २
एवं सर्वे यदपि गिरिजे ८५ २३
एष प्रमात्वमधिगच्छति ४५ ११
एषा पीयूषदिव्यद्रव ३५ १९
एषा वसन्तकविना रचिता ९८ १६
एहि शङ्कर दया ८९ २

(क)

कक्षातीतकृपारसां प्रणमता ८७ ५६
कक्षापुटेषु परिगृह्य मृगा १६ १६
कटुफलमनुभूय हन्त ५१ १३
कणायते सुवर्णाद्रिः ९७ ९
कतिचिदत्र हरिं ३० ११
कनकरत्नमया घृतदीपका ११ १९
कन्यागते देवगुरौ विशन्ति २६ १६
कन्याप्रदानमभिरूप ४५ १३
कम्पातटकृतावासा ६५ २
कम्बोर्गलः सदृशताम् ६० २४
करतामरसाभिमर्षणाद् ४४ १३
करवीरमहालक्ष्मीः ६५ ५
करुणामृतवृष्टिकारिका ७० ५
करुणारसमेदुरां दृशं ७० ७
करेण शम्भोः शिरसि स्थितायाः १ ५
कर्णान्तगामि तव लोचन ७६ ३
कर्णावतंसपदवीं समवाप्य ७७ ८
कलिता नवरत्ननिर्मिताः २८ १०
कल्लोललोलयमुना ७८ २१
कवयः प्रवयन्तु वाग्वितानं ३ २६
कश्चिदध्वरविधौ ६३ १६
कः क्षमेत महिमानम् ६२ १

काकोलूकं तुरगमहिषं	८५	३५
काञ्चीमध्येन्द्रनीलद्युति	३५	१७
कात्यायनीस्तवमयो रस	८	३४
कादम्बिनी काचन मेचकाभा	१	६
कादम्बिन्या तुलयति	४८	३
का देवि हानिरियता यदि	४	३२
कामकोपमदमोह	६४	३३
कामये न धनधान्यसम्पदं	३०	४
कामरूपाश्रिता देवी	६६	१३
कामादयो गिरिसुते	६२	१२
कामादयो रिपुजना विनिहन्तु	२४	२८
कामो नामस्मरणविषये	७०	३०
कारागारभयापहां वसुमती	८७	५५
कालः कालाम्बुदघनरुचि	८४	४
कालः कालायसमुखरुचिः	६७	७
कालाञ्जनं विनिहतं	७९	२४
कालान्तरेण वितरन्ति	८०	३२
काली तालीवनश्यामा	६५	११
काल्यं शाल्योदनदधिघृतं	८५	२२
काश्मीरजस्य प्रथितो जगत्यां	२७	३३
कश्यपाय निजविक्रमार्जितां	९१	३८
किं कम्बलादिपरिशील	४४	३
किं चन्द्रिका सृजति	५३	८
किं जल्पितेन बहुधा	८०	३६
किं भवोरगविषोत्थितां	८९	४
किं यौवनेन किमहो पुरुषा	२	२१
किं वर्णयामि महिमान	६२	१३
किं वा ब्रवीमि यदिह	९०	२२
किं वेदपाठेन किमध्वरैर्वा	९७	७
किं हीयते यदि नरान्	७	२८
किमपि मेचकलोहितपाण्डुरं	१०	३
किमु फलं विविधैः	७४	१०
कीर्तयन्ति चरितं तवाद्भुतं	८९	८
कीर्तिप्रकाशैस्तव दीप्यमानैः	७२	४
कुन्दं विन्दत्यधिकसुषमां	८४	१५
कुन्दपुष्पति दिगङ्गनाजिरे	७२	१४
कुपुत्राणामग्रेसरमविरतं	४३	४०
कुल्याजलैर्व्रीहियवादिकानां	२७	३४
कुवलयं कुमुदं कमलं	७३	२४
कुवलयनयनां कृपाणहस्तां	२२	८
कृत्वा तटे सान्ध्यविधिं प्रभाते	२७	२७
कृपाकटाक्षस्तव सर्वकालं	६१	७
कृपाकटाक्षस्य तवाऽद्भुतस्य	३१	१८
केचित्प्रयान्ति मुदमक्षर	५	७
केचिद् सिद्धिं द्रविणमपरे	८५	३३
केतुः कृतान्तहतकस्य	३३	९
कैलाशमौलिसंस्पर्धि	६५	४
कैलाशशैलशिखरे	७२	६
कोपं जहीहि विजहाहि	५६	३०
को मद्विना त्रिभुवने	७८	२०
कोशाभ्यासं मम विजहतो	३	२५
कोशो वृक्षाः फलभरनता	६९	२१
क्रव्यादभूतगणभीति	७६	२
क्रीडापरस्य मम	५३	१३
क्षन्तुमर्हसि नितान्तवत्सला	५१	६
क्षितिभृतां परिपन्थि	७५	२३
क्षीराब्धिवीचिधवलैः	७२	११
क्षुद्रद्रुमाणां मलयाद्रिवाटी	३२	२
क्षुद्रपातकशिलाविपाटनं	५१	८
क्षुद्राः जनाः कतिपये न	७	२३
क्षोणीभृतामधिवसन्ति	७६	५
क्षौद्रं राजादनफलभरं	६९	२५
(ग)		
गङ्गाऽपि देवि कृतभूरि	४६	२१
गङ्गातीरे वरतरुतले	६८	१७
गणयन्तु जैमिनिमताव	८१	१६
गरलं धनयौवनात्मकं	४३	६
गर्ते पतन्तमवशं शिशु	५५	२४
गलितं मम गात्रमण्डलं	४३	४
गाढासक्तिस्तव चरणयोः	८५	३२
गावः श्यावाः शबलधवला	८५	२१
गिरीशः कैलाशे वसतु	३९	१४
गिलति रभसादस्तक्ष्माभृद्	१२	६
गुणवती मृदुमन्जुल	७५	१७
गुम्फितं रुचिरकृष्णमणीभिः	२९	१७
गुर्वीं दधाना कलशी	६६	१५
गौडी प्रौढिं मयि न भजते	३	२४
गौरीति शैलतनयेति	२१	२
ग्रहादिपीडा यद्भक्तें	६५	९
ग्रीष्मो भीष्मस्तपति बहुलं	८४	१२
(घ)		
घृणा शङ्का लज्जा	४०	१६
(च)		
चटचटरवैर्वैतानाग्नौ हुताः	१३	१७

चण्डिके तव पदाब्ज	६४	२८
चण्डी नः परिपातु विश्व	२४	३५
चण्डी भवानी गिरिराजकन्या	२३	२२
चन्द्रचूड निजभक्तिभाजने	९०	१३
चन्द्रमौलिदयिते मदम्बिके	२	१६
चन्द्रला चन्द्रलावण्य	६५	३
चन्द्रशेखर मृकण्डुसम्भव	८९	९
चन्द्रिका तुहिनदीधितेः	६३	१५
चन्द्रिकामिव तुषारदीधितेः	३२	८
चरणं तव पङ्कजोपमं	४३	३
चापबाणसृणिपाशधारिणी	१	७
चिकुरपाशविधुन्तुदपीडनाद्	२९	२५
चित्तं निसर्गचपलं	६१	६
चित्तं शिरीषकुसुमादपि	५४	२०
चित्रं किमत्र यदि	७६	४
चित्रं नरः स्पर्शमणिं	२४	३०
चित्रा चरित्रसरणिस्तव	३०	१४
चिन्तयामि हृदि सर्वमङ्गलां	२२	७
चिरतरमनुषक्तां स्वस्य	४४	१
चेतो निशामय वदामि	१९	७
चेतोहरापि कविसूक्तिसुधा	९	४५
चौरवद्धृदयदेशमेत्य	६४	२४

(छ)

छायावृक्षानलसलुलिताः	६९	२३

(ज)

जगतां त्रितये त्वमीशिषे	७१	१५
जगदम्ब कथं क्षमा	५१	७
जगदम्ब कुटुम्बिनि	३२	७
जगदम्ब विलम्बसे कथं	७०	६
जगदम्ब वृषध्वजप्रिये	६१	४
जगदीश्वरि दीनवत्सले	७१	२३
जगन्मातः प्रातः कमल	४२	३५
जगन्मातः शम्भोः सहचरि	३१	२३
जटाकटाहाज्जगदीश्वरस्य	२६	२०
जननमृत्युजरामयनाशनं	७६	३०
जननि तावकवासगृहाजिरे	११	२०
जननि भास्करशीतकरात्मकं	१०	१
जन्यानुपागतवतः सह	४६	१५
जपतपःक्रतुयोगपुरःसरा	७४	३
जपापुष्पच्छाया नवनलिन	३९	७
जम्भाराति पुरःसरैः सुर	८८	६३
जम्भारातिविनतविबुध	३२	३
जम्भारातिशिरोरत्न	६६	१७
जय जय महादेवि क्षिप्रं	१४	२४
जयति कामविरामकृतः	५७	२६
जयति चन्द्रकिरीटकुटुम्बिनी	५७	२५
जयति चन्द्रशिखामणि	५७	२४
जयति तव कृपाकटाक्ष	३२	६
जयति भक्तहिता चरणद्वयी	५७	२२
जयति शैलसुताचरणद्वयं	५७	२०
जयति हैमवतीचरणद्वयी	५७	२१
जयति शैलसुताचरणं दधत	५७	२३
जयत्यघघ्नं दुहितुः	५७	१७
जयत्यजस्रं तरुणारुण	५६	७
जयत्यनूनद्युति चण्डिका	५७	१४
जयत्यभीक्ष्णं शितिकण्ठ	५६	४
जयत्यभीष्टार्थकरं नगात्मजा	५७	१२
जयत्यमन्दं गिरिजापदद्वयं	५७	१३
जयत्यमन्दामरवन्दनीयं	५६	६
जयत्यशेषप्रणतार्तिभञ्जनं	५७	१८
जयत्यशेषार्थिसमीहित	५६	९
जयत्यहार्याधिपकन्यका	५६	१०
जयत्युदञ्चन्नवपल्लव	५७	१९
जयत्युदस्तं प्रणयापराधिनं	५७	१६
जयत्युपास्यं महतां	५७	१५
जयत्युपेन्द्रद्रुहिणादि	५६	११
जयत्युमायाश्चरणः सदाश्रितः	५६	८
जयन्ति चण्डीचरणावलग्नाः	५६	५
जयन्ति दुर्गाचरणाब्ज	५६	२
जयन्ति देवेन्द्र-ललाट	५६	१
जयन्ति सर्वार्तिनिवर्तनक्षमा	५६	३
जरसा परिपीडितो भृशं	४३	५
जागर्त्यनादिनिधनं	५	१०
जातः क्षीराम्बुराशेः	३५	२०
जातादराः सुकृतिनो	५९	१७
जातो हन्त यतः प्रभृति	४९	१८
जायते न तव	६४	२७
जितारिषड्वर्गनुता	६५	७
जिष्णुविष्णुविधिमौलि	३०	१२
जिह्वासहस्रयुगलं	७३	१९
जिह्वे वर्णय चण्डिकां गिरिसुतां	२२	१५
जीयान्नगेन्द्रदुहितुः प्रसिता	८	३३
जीवातुः कैरवाणामुदय	३७	३९

जीव्यात्सुखं चिरतरं स	८	३२
जृम्भारम्भविडम्बिवक्त्र	८८	६२
जैमिन्युक्तेः शबरविवृति	८५	२७
ज्योतिष्टोमप्रभृतिपु जना	६७	१०
ज्योतिष्टोममुखैर्मखैः	९८	१४
ज्योत्स्नारसं चुलुकयन्ति यथा	२	२०
ज्वालाजालं भवदवभवं	८४	५
ज्ञातुं तत्त्वं तव यदि	८६	४०
ज्ञानं वदन्ति सुधियः कृति	२	१८
(झ)		
झञ्झावाता विदधति	६७	५
(त)		
तत्त्वज्ञानं कतिचिदगदन्	६८	१५
तनुभृतां जनयन्ति	७६	२८
तनुमतां तव भक्ति	७५	११
तपस्विनः प्रत्यहमाद्रियन्ते	२६	७
तरुणारुणकोटिसन्निभं	४३	१
तरुणारुणप्रभमचिन्त्य	६१	१
तव कटाक्षवशाज्जगदम्बिके	४	३५
तव कर्तुमकर्तुमन्यथा	७१	१४
तव कीर्तिसुधारसानुपाने	८८	२
तव पदाब्जनिवेशित	७५	२४
तव पादसरोजसङ्गतं	३०	१०
तव भक्तिपरायणः	६१	९
तव भवदयिते कृपा	६१	२
तव यशःपटलेन	७३	२२
तव यशःस्तवनं नव	७२	१३
तव समुज्ज्वलकीर्ति	७२	१२
तव साम्यमुपैतु नीरदः	४८	२
तव विनिर्जितपल्लवतल्लजे	२८	५
तवाम्ब स्वर्योषाचिकुर	४२	३९
तस्मिन् महारजतनिर्मित	२०	२०
ताटङ्कभूषणमुदञ्चित	२९	१९
तातस्य ते जननि	४४	२
तारं निशम्य कृकवाकु	१५	१३
तारागणः सुविमले	९३	११
तारां ताराधिपतिवदनां	८६	४७
तावकं कथमगेन्द्रकन्यके	३०	१
तावकोक्तिरिति हेतुना	६४	२५
तिष्ठन् बद्धाञ्जलिः	६६	२
तुदति यस्तव भक्तमनागसं	३१	२४

तुलजा जलजाताक्षी	६५	६
तुलाप्रसङ्गे सति यज्जलस्य	२६	१५
तुल्याऽपि वर्णघटना	५	९
तुषारशीतेन जलेन यस्या	२७	३६
तुहिनांशुमरीचिमालिनौ	२९	२०
तूर्णीभावं भजति मुखरा	९५	२४
तौ पादौ गिरिजाप्रदक्षिण	२२	१४
त्रिलोकीं कल्पादौ रचयति	४०	१५
त्रैलोक्यत्राणमन्त्रं प्रबल	२३	२३
त्वङ्कारगर्भवदनं सदनं	५९	१४
त्वं कपर्द्यपि विभो महेश्वरः	८९	६
त्वं कल्पना कविजने	१९	८
त्वं पिताऽसि जननी	६४	४०
त्वं स्थूललक्ष्याऽपि	५०	२३
त्वत्कीर्तिकीर्तनविधौ	१९	१०
त्वत्क्षमातरणिसंश्रयाद्	५१	९
त्वत्पादपूजनविधौ	१९	११
त्वद्यशः समुदयैर्भुवने	७२	५
त्वदीयं लावण्यं भवति	१७	४
त्वदीयं सौन्दर्यं प्रभवति	४१	२३
त्वमेव लोके प्रकृतिः सनातनी	२५	३७
त्वयि भक्तिरहर्निशं मदीया	८८	६
त्वां किराततनुमर्जुनः	९०	१५
त्वां दोषाकरशेखरां	३०	९
त्वां वदन्तु कवयो	६३	८
त्वां विहाय सकलार्थ	६३	२०
त्वां शङ्करप्रियतमे ध्रुव	२	१७
त्वामम्ब कुङ्कुमरसोज्ज्वल	२०	१४
त्वामाराध्य त्रिपुरसहितां	६६	३
त्वामुपास्य भगवन् भगीरथः	९०	१६
(द)		
दक्षा रक्षविधिषु नमतां	८६	४८
दग्धोऽपि भूतपतिना	७७	१४
दण्डं बिभर्ति कुरुते	२०	१६
दण्डभृन्महिषकण्ठघण्टिकाः	८९	७
दण्डश्चक्रं सलिलमनलः	६८	१४
ददाति यस्याः करुणा	४८	१
दयस्वातीव त्वं मम	३१	१५
दाक्षिणात्यसुलभं तव	६४	३४
दातारो भुवि सन्ति सन्तु	८७	५९
दाधाध्वदाविति मुहुः	५८	७

दारिद्र्यार्तिविदूयमान ४९ ११
दिनकरं समुपास्य यथाविधि ११ १७
दिवि सन्तु सुराः सहस्रशः ७१ १८
दिशि दिशि प्रसरन्ति ७३ २३
दीनानां द्वाःस्थितानां ३६ २७
दीपं निधेहि चपले ९३ ६
दुर्गायशः सुरभितां कृतिभिः ९६ १०
दुष्कराराधना नित्यं ६६ १९
दृष्टा दरिद्रमधमर्णम् ५५ २३
दूरीकृत्याङ्कलेखां यदि ३६ २५
दृष्ट्वा कान्तिं यदीयां ३७ ३३
दृष्ट्वा मदान्धमतिभिः ७ २९
दृष्ट्वा सुधांशुमुदितं ९४ १८
देवाः कपालकमलासनं १९ ९
देवा गदाधरविरिञ्चि १६ २०
देवि त्वत्करुणारसायन ४९ १२
देशमद्रिवनदुर्गसङ्कुलं ६३ १८
देहप्रभाविलसितैरनिशं २० १८
दैत्यस्त्रीगण्डलेखाघुसृण ३६ २८
दैवादिमामुपगता ९७ ५
द्योतिते तव निरन्तरं ७४ २९
द्रष्टुं तवासेचनकं स्वरूपं २८ ३
द्रष्टुं भूमिगतं हिरण्य ५० २२
द्राक्षारसो विरस एव १८ २
द्वावर्हतः कविपदं भुवि ५ १२
द्विषदाक्रमणादशिश्रियद्विपिनं ३० ७

(ध)

धत्तूरबिल्वकरवीरजपा ४५ ७
धनलोभ तुभ्यमविवेक ८१ १९
धन्या केचिद्धिमगिरि ६८ १६
धन्या वदान्यां भुवनैकमान्यां ३२ २६
धनवतां मदघूर्णितचक्षुषां ७५ १४
धर्माचार्यजगद्धरप्रभृति ९६ ८
धाराधरः सलिलवृष्टि ६० २२
धूर्जटे न सदसद्विवेकजं ९० १२
धृत्वा रोमालिरज्जुं ३५ १६
ध्रुवं ते लिप्सन्ते ४० १७
ध्रुवमिदं नितराम ७२ ७
ध्यानाभ्यासे विनिहितधियः ८६ ४२
ध्यायन्ति ये कुमुदिनी १८ ५
ध्यायन् हिमाचलसुता २१ २३
ध्वंसाय कोकविपदां तमसा ३ ३१
ध्वान्तच्छटां जवनिका ९३ १०
ध्वान्तच्छटां प्रसृमरां ९४ २०
ध्वान्तच्छटानामिव घर्मरश्मि २७ २९

(न)

नक्षत्रदीपनिकरं गगने ९२ १
न गङ्गायां स्नातं ३८ ४
नगनन्दिनि तावकैर्गुणैः ३३ १०
न गन्धलेशो न मलीमसत्वं ४९ १०
नगराजसुते वदान्यता ७१ २१
नगसुते तव नामनवासवं ७५ २१
नगसुते विगलन्ति वियद् १० ७
नगेन्द्रकन्ये भुवनत्रयस्य २९ १४
न जानामि स्तोत्रं ३८ १
नटा विटा वा गणिकाः ५० १९
नद्यः सद्यः शरदि सुतराः ८४ १३
न धने न जने न ८८ ४
नन्दगोपसमुद्भूता ६६ १४
नन्दीश्वरेण कुसुमावचये ४५ ८
न पातकाद् यत्नशतेन ५० २
नभसि देवि जवेन समुत्पतद् १० १४
नभस्तले त्वद्यशसि ७२ १०
नमति यस्तुहिनाचल ७६ २९
नमनादिभिरम्बिकां ४४ १५
नमामः पादाब्जं तव ४२ ३८
नयनयोः सुषमामवलोक्य ३० ५
न यमुना न मनाक् ७३ २१
नरपतिं स्तुवतां धन ७५ २२
नरवाहनपूजितं करैः ४३ ९
नर्चैः शक्तास्तव नवविधौ ६७ ८
नलिनीदलस्थजलसन्निभं ८१ ११
न लिप्से रम्भादिस्तन ४१ ३०
नवजपाकुसुमद्युतिमश्नुते १० १२
नवनीतसमानमन्तरं तव ४३ ८
नवनीरदकान्तिधारिणी ४४ १२
नवरात्रमहोत्सवे विदध्यां ८८ ३
न वसुधाधिपसौध ७४ २
नव्यं न्यायं परमगहनं ८५ २६
न सभासु चित्तमधुना ८२ २२
न समाचरामि यदि ५० ३
न साङ्ख्यं सङ्ख्यातं ३९ १२

न सुधाभुजां बहुविध	५०	२०
नाऽऽकाङ्क्षा मे द्रविणनिकरे	२१	५
नाकाधिपार्चितपदा भजतां	५८	४
नाडिन्धमो बलवतामपि	८०	३३
नानादुराचरणसन्तति	२३	२०
नानायोनिषु सम्भवो यदि	८७	६०
नारायणे न रमते	१९	६
नाऽऽलोकसे सविनयं	५५	२९
नासावंशात् किमेषा मरकत	३७	३४
नासिकाभरणमम्ब तावकं	२९	१६
नास्ति देव धनधान्य	६५	४१
नास्ति देवि तव	६४	२९
नास्ति मे किमपि	६३	१७
नास्ति यत्र चतुरः	६२	३
नाहं वन्दे विजितकमलं	२१	४
निकायः पापानां मम	४२	३२
निगदन्तु महेशि तावकीं	७१	१९
निगमत्रयीवनविहार	८१	९
निजकुलव्रतपालनशालिना	७५	२७
निजभक्तजनाधमर्णतां	७०	९
निजभक्तिमतां निरामयं	३०	८
नितरामवधीरितो मया	७१	२०
नित्यं रात्रौ शमयति	६८	१९
नित्यमेव विपदामगोचरः	६४	३८
निद्रासुखं समनुभूय	१४	३
निधानं पूर्वेषां क्षिति	३८	३
निपतति यदि दुर्गानाम	२५	४२
निमज्जतां जातु निजप्रवाहे	२७	३१
नियतं क्षमाधरसुते	५१	४
निरस्तशुभ्रांशुसमस्त	९१	२८
निर्जित्य यः सुरपतिं	३१	२१
निर्भर्त्सनैर्विरहिणामिव	१४	१
निर्माणकर्मकुशलौ द्रुहिणः	६	१८
निर्माति यस्तव महेशि	७३	२०
निर्मात्सर्या यदि कृति	९६	५
निर्याति वक्त्रकमलात् सहसा	२०	१५
निर्वेदं गमिताऽसि मज्जन	९७	११
निवारयन्तीं शमनालयस्य	२५	३
निवेश्य वात्सल्यवशात्	९१	३२
निःशङ्कं कवयन्तु केचन	९६	७
निःशङ्कमद्रितनये नयनं	७७	१२
निशि कलयते साम्यं का नः	१३	१४
निष्प्रभत्वमुपयाति तव	६३	१४
निःसंशयं शैलसुते तुलाया	२७	३५
निहितं तव पादयोरिदं	२८	८
नीत्वा निशां विरहताप	१६	१७
नीपाराम परिस्फुरन्मणि	८७	५८
नूतनाम्बुधरकान्तिधारिणी	२५	४१
नेत्रयोर्विरचिता नगकन्ये	२९	१८
नेत्राञ्चलः करुणया मसृणः	७९	३१
नेदं नभः सरसगोमय	९३	१३
नेदीयसीं धनपतेरलका	४४	५
नैवेद्यीभूतमेतद् रति	३६	३०
नैसर्गिकी सुकृतिनां प्रतिभा	५	११
नैसर्गिकी स्फुरति सा न	३	२३
न्यस्यन्ति ये मूर्धनि	९१	२७

(प)

पक्वं फलं शुकमुखाद्	६	१३
पञ्चाननस्य तनयस्तुहिनांशु	४७	२७
पतति तत्क्षणमेव स वारुणीं	१०	१५
पदाम्भोजे क्षिप्तः परिमल	१८	१०
परभृतं सहकारलता	७४	६
परस्त्रीकौलीने गुरुजन	३८	२
परित्यज क्षिप्रं नियतगृह	४२	३३
परिभ्रान्तं नारीवदन	३८	५
परुषा सरुषा मया	७१	२५
पशुत्वं मे नीपद्रुमविपिन	४१	२९
पापाकरं न मकरं	५३	७
पापाटवीलवनकर्मकुठार	२१	२२
पापानां चेन्नाऽस्य दास्ये	५१	१२
पारदा भवपाथोधेः	६६	१८
पीठस्थितायास्तवकामरूपे	२६	१०
पित्रा पर्वतपुत्रि दैत्यपतिना	८७	५४
पीत्वा जगत्त्रयभयङ्कर	४६	१७
पीयूषदीधितिकलाममलां	१८	१
पीयूषमाधुर्यधुरन्धराणि	२३	२१
पीयूषसिन्धुजठरे परि	२०	१९
पुण्यारण्ये नियतवसतेः	६९	२२
पुण्येन किञ्चिदधिगत्य	७	२२
पुत्रद्वयं मम गुहो	५४	१६
पुत्रा विद्याविनयमहिताः	८५	२०
पुत्रीकृतानां गिरिराजपुत्र्या	८	३८
पुरः पूषाचन्द्रौ करकलित	१७	७

पुरोधाः प्रत्यूषे कुश	४१	२५
पुष्ट्या नितान्तहरिमाण	९४	१४
पुष्पमालादिसम्भारैः	६६	१६
पुष्पाणि जम्बूनदनिर्मितानि	२९	२३
पूजाविधिं तव यथार्थतया	५४	१९
पूजाविधौ ये गणराज	९१	३०
प्रज्वालिता परिजनैस्तव	९४	२१
प्रणमत्प्रभूतदिविषद्	८१	३
प्रतिभावतां गुणयुताऽपि	८१	६
प्रत्यहं विहितवर्जनान्मम	५१	५
प्रत्यासन्नस्य दृष्ट्वा	३५	१५
प्रभ्रंशितो निजपदान्मुनिना	७७	९
प्रभवन्ति गणं न	५१	१६
प्रमदविपिनक्रीडावापी	१४	२३
प्रयासेनाऽभ्यस्ता यवन	३९	९
प्रसभमुदयनाद्यैः कर्कशैः	५१	१०
प्रस्तुतं सदसि जम्भ	७३	१५
प्रहरति धनुषा	६२	११
प्राक्कविप्रवरवक्त्रनिःसरद्	३	२८
प्राणिनां जगति मुक्ति	६४	३७
प्रातः प्रबुद्धशतपत्रसपत्न	२८	१
प्राददाद्यदुपमन्यवे	८९	३
प्रादुर्भावं कलयति यदा	६७	६
प्रान्तरे नगसुते भवाभिधे	३	२७
प्राभातिकीमुपहसन्	७७	१०
प्रायः श्रयन्ति विपथं	५३	५
प्रालेयाद्रिसुतामशेषजननीं	२३	१८
प्रालेयांशुप्रदीपे मुकुटतट	३७	३५
प्रेमाम्बुपूरपरिपूरित	९५	२२
(ब)		
बटुसमुदयः पर्णागारे	१२	८
बलशासनशर्वपद्मभू	४३	७
बाधते न तव दास्य	६४	३०
बाला पाण्ड्यमहीपस्य	६५	१
बालो निदेशमवधूय	५३	९
बाष्पाम्भःपरिपूर्णनेत्रयुगलं	२४	३४
बिभर्ति या सैकतलीनहंसा	२७	२८
बिभ्रती नियतमन्त्रपूर्णता	६४	३६
बिभ्राणा वत्सलत्वं गुहगज	३७	३२
बिम्बं माधुर्यहीनं कलयति	३६	२३
ब्रह्मादयः सुरवरा निज	१८	३
ब्राह्मणेषु तव लोकविश्रुतं	९२	३९
(भ)		
भक्ताभीष्टकरौषधं शिव	२३	२४
भक्तावलोकविकसन्नयन	७७	६
भक्त्या मया परममन्दधिया	२	१३
भक्तिप्रकर्षपरिपूतधियो	९५	२
भगणकुसुमस्तोमं स्वीयैः	११	४
भजति न विनिवृत्तिं	५२	१९
भजन्त्येके विष्णुं कतिचन	४०	१८
भद्रा मुद्रा यदीया	३३	३
भवधन्वपरिभ्रमाकुलं	७०	८
भवमरुभ्रमणश्रमनाशिनी	७४	१
भवमानसराजहंसिके	४३	११
भस्मासुरान्निजवराधि	४७	२३
भानुः सानुग्रह इह भवेत्	८४	९
भालपट्टलिखितां	६३	१९
भिषजोऽपि दिशन्ति वाग्भट	५१	१७
भूतले भरतभूमिरुत्तमा	६४	३५
भूतले वसतिरर्थिसात्	९२	४२
भूयांस एव कवयो गवया	४	२
भूषणीकृत महाभुजङ्गमः	९०	१७
भृङ्गायते मुनिजनस्तुहिन	५९	१६
भ्रमरायितमानसोऽपि ते	७०	१
भ्रातः पद्मपलाशसंस्थित	२२	९
भ्रान्त्वा चिराय भवधन्वनि	७९	२३
भ्रामं भ्रामं विषयविपिने	८३	१
भ्रुकुटिविकटवक्त्रान्	८९	१
(म)		
मञ्चस्थिता लघुशिला	१५	११
मञ्जीरौ मञ्जुगुञ्जद्भ्रमर	३४	९
मञ्जुस्वनत्कनककङ्कण	१६	१४
मञ्जुस्वनत्काञ्चन	२८	९
मञ्जूषया मत्कृतया स्तवानां	९८	१८
मणिनूपुराभरणमादि	८०	१
मदनोत्थितं सकललोक	८२	२१
मदमीलितचक्षुषां प्रशंसा	८८	५
मदागसां वर्धत एव	५०	१
मधुकराश्चपला इव भिक्षुकाः	१०	९
मधुरं तव कीर्तिगायनं	४३	२
मधुलिहं नलिनीव	७४	४
मन्दं मन्दं वहति पवनो	८४	१६

मन्दधीरपि सतीर्थ्यमण्डले	९०	१८
मन्दाकिनी समवगाहन	९३	१२
मन्द्रारवेण गगनं	५८	३
मन्ये बिभर्ति तव	५४	२१
मन्ये भिन्ना अपि नगसुते	८५	३०
मन्ये षडङ्ग सहितः खलु	६	१४
मन्ये हिरण्यकशिपुं सुर	६	१९
मम चित्तमधुव्रतः	८८	१
मयि कृत्रिमपुत्रभावनां	७०	१०
मयि निधेहि दयार्द्र	७५	२५
मरकतमणिस्तम्भच्छाया	१३	२१
मलयशैलतटात् समुपागतो	१०	१३
महालसारूपमुपेत्य विष्णुः	२७	२१
महिमानमेति वचसाम्	८१	१०
महिषासुरं त्रिदशवृन्द	८१	८
महेश्वरोत्तुङ्गकपर्दनद्धां	१	३
मां नितान्तमपराध	६३	९
माकार्षं कर्मजातं तव चरण	२३	१९
मातः किरातवपुषा	७९	२८
मातर्भारति सारभूतम्	९८	१३
मातश्चतुर्विधपुमर्थं	२५	४०
मातश्चतुःषष्टिकलानिदानं	२८	४
मातस्त्वदीयं चरणारविन्दं	३२	५
मातस्त्वदीयकरुणार्द्र	५०	२१
मातस्त्वदीयपदपङ्कज	१८	४
मातस्त्वदीयवदनेन हृतां	९२	४
मातस्त्वया विनिहते	६१	५
मातस्त्वां हृदि चिन्तयामि	२४	२६
माता त्वमेव जनको	५२	४
माता मेना तव जनयिता	२५	३६
माद्यद्दन्तावलमदजलैः	७०	२९
माधुर्यधुर्यवचसां कवि	७	२५
मानुष्यकं परमदुर्लभ	८	३७
मान्या बुधेषु जननी	५३	११
मायामानुषविग्रहो जगति	८७	५३
मायावशाद् रचयितुं	५८	८
मायेव विश्वजननी जगदी	६	१५
मालां व्यालाधिपविरचितां	८४	८
माहेश्वराणामथ वैष्णवानां	९१	३१
माहेश्वरोपवनसम्भृत	४५	९
मित्रं जनस्य बहुधा	४५	६
मिथ्यास्तुतिर्न विहिता	५५	२७
मीमांसाख्यं यदिह विदितं	६७	९
मुकुरस्तव रत्नमण्डितः	२९	२६
मुकुलितकरास्तिष्ठन्त्येते	११	५
मुञ्जक्षोणिपतिर्ययौ निज	८७	५२
मुदमुदञ्चति कोककदम्बकं	१०	८
मुदितमनसः सूर्यालोकाद्	१३	१५
मुनिजनास्तव दर्शन	७४	९
मूलाधारास्वरितमुदिता	८६	४१
मृद्वीकामधरीकरोति	९६	९
मृषाजल्पे स्वल्पेतरपथिक	३९	८
मेनात्मजे तव यशः	७३	२८
म्रियते जलदालिवञ्चितः	७१	१२
म्लानिं वनं भजति	१४	४

(य)

यः पार्वणं तुदति मां	९४	१७
यः प्रपद्य शितिकण्ठ	९१	३६
यः शब्दशास्त्रपरिशीलन	६	२१
यः सहस्रभुजदण्डमण्डितो	९२	४०
यः स्वप्नेऽपि न मन्यते	८७	३
यं कृपामृतरसार्द्रया	६४	३९
यं तृतीयनयनस्थवह्निना	६२	१४
यं सानुकम्पमवलोकयसे	३	३०
यत्किञ्चिदस्ति भुवने	९४	१६
यत्तोयसंस्पर्शनमात्रलाभाद्	२६	५
यत्त्वमावहसि धर्मपुत्रतां	९२	४३
यत्प्रयाति प्रथमाशुतोष	८९	५
यत्सङ्गमं दक्षिणसागरेण	२६	१३
यत्समाधिविधिसम्भवं	६४	२६
यदनुग्रहादमृततां व्रजेद्	८१	१२
यदपाङ्गभङ्गिरचनावशंवदो	८२	२०
यदा धृत्वा रोषं हिमनगसुते	१७	२
यदा रामो रामाविति	३९	१०
यदाश्रितानामिह देहभाजां	२६	१७
यदिदं चकास्ति भुवने	८१	१३
यद्गृहेषु तव कीर्ति	७३	२७
यद्भ्रूवल्लीवलनविवशः	६६	१
यद्यदत्र श्रुतिशास्त्रसम्मतं	९०	११
यद्वायुरेलासुरभिर्गवाक्षे	२६	१४
यद्वाहनं बत जरद्गव	४६	१८
यद्विजित्य भुवनत्रयी	९०	१४
यद्वीचिजाले कलहंसमाला	२७	२५

यन्तुः शताङ्ग इव	६०	१९
यन्मुखे वसति सर्वं	६४	३२
यमदूतहूतिपरिभूत	८१	४
यशस्त्वदीयं नगराजकन्ये	७२	१
यस्मिञ्छीतांशुमौलिः	३६	२९
यस्मिन्नावासभूते	३४	१३
यस्मिन्नेणाङ्कमौलेर्हिम	३४	१४
यस्यां भ्राजिष्णुमुक्ताफल	३६	३१
यस्याऽधियार्गं नियतं	४८	६
यस्या नाथस्तव नगसुते	२	१२
यस्यास्तटी वेदविदां	२७	३०
यस्यास्तटे भक्तिमतां निधानं	२६	१९
यस्यास्तरङ्गा अवगाह	२५	२
यां कृत्वा वासवाद्याः	३३	१
याचामहे कमपि नैव	५९	९
याता दिवं पितृपितामह	५३	१२
याते दिवं हृदयहारिणि	४	३
यातो भोजः कविजनमनः	४९	१६
यात्राप्रसङ्गे प्रथमाधिपेन	३२	२५
या त्रायते जगदिदं	६०	२५
या त्वं सुधाकरमुखी	४७	२५
या नाम साम्यादिव गाधि	२६	११
या निर्विशङ्कं समुपागतानां	२६	१८
या मज्जनैः कुण्डिनसुन्दरीणां	२७	२२
यामाश्रितेषु नहि दर्शयितुं	५८	५
यामेधमानकरुणा	५८	१
या यज्वनां विन्दति	२६	८
या लग्ना फालमूले	३३	२
या सूर्यवंशोद्भवभूपतीनां	२६	४
युक्तं तदत्र तव चण्डि	७९	२५
युक्ता मुक्तालताभिश्छवि	३५	२१
ये केचिदत्र कवयः	७	२६
ये तावकीनगुणकीर्ति	२४	२७
येन प्रसह्य जगदन्तकरं	४६	१९
ये प्राक्तनाः सरसमञ्जुल	४	१
ये मत्सरग्रहगृहीतधियः	७	२४
ये ये ध्यायन्ति भक्त्या	३८	४०
ये रक्तचन्दनजपाकरवीर	२०	२१
ये शैवतत्त्वमवगत्य	९७	६
येषां न पृथिवीधरेन्द्रतनया	२२	१२
योगक्षेमं वहसि जगता	८६	३७
योगाचारो विलयमयते	६८	१३
योगीश्वरान् कविरतिक्रमते	६	१६
योगेन यस्याः सेवाया	६५	१०
योऽसौ स्कन्दद्विपवदन	९५	४
(र)		
रक्तोत्पलं मुकुलितं	९३	९
रजनिशकुनिकाया व्योम	९५	२३
रत्नप्रोताङ्गुलीय प्रकर	३३	५
रम्भादम्भापहारे विहित	३४	१२
रम्भोर्वशीप्रमुखदेव	५८	२
रम्यो हर्म्यैस्तुहिनधवलः	८४	१८
राकापतिः पवनदूत	९३	८
राजद्वारे सदसि विदुषां	९६	६
राजानो यदि सन्ति	४९	१७
राज्यं स्वर्गस्त्रिदशनगरी	६७	११
रात्रिर्विनश्यति समृद्धि	१५	५
रामणीयकनिधेर्निकेतनं	२८	२
रे रे मनोमधुप वाचमिमां	२३	२५
रोमाञ्चमञ्चति वपुर्मम	१९	१२
(ल)		
लक्ष्मीं ददाति कुरुते	७८	१८
लक्ष्मीनाथोऽप्यहह वसुधां	४८	९
लक्ष्मीमुच्चैः श्रवसममृतं	६७	४
लग्नं सीमन्तदेशेष्ववनत	३४	६
लङ्काधिपेन भुवनत्रय	४७	२४
लङ्कापतेः समिति यत्कृपयैव	५९	१३
लब्ध्वा वरं कमलसम्भवतः	९०	२१
लब्ध्वा सर्वप्रदमगसुते	४९	१४
लीनं दिवाकरभयाद्	९४	१५
लीलासक्तान् सरसिजवने	६९	२४
लुठन्तः पादाब्जे तव	१८	९
लोकत्रयेऽपि मणिमन्त्र	७७	१३
लोके जयन्तनलकूबर	४६	२०
लोपिते तव यशोभरैर्गले	७३	२५
(व)		
वक्त्राम्भोजान्तराले विलसति	३६	२४
वक्रोक्तिभिर्विरहिता कविता	९	४२
वक्षःप्रदेशे तव लम्बमानो	२८	१३
वदने मम नामधेयमास्तां	८९	८
वन्दे हिमाद्रितनयां कमला	२१	१
वपुषि रचय मामके निवासं	२३	१७
वराहरूपस्य जनार्दनस्य	२७	२४

वरुणककुभो भालप्रान्ते	११	२
वर्णयन्ति तव रूपम्	६३	२३
वर्णयामि किमहं महाद्भुतं	९१	३७
वर्षाकालं सघनचपलं	८४	११
वर्षागमेषु सहसा	७८	१५
वव्रे यदर्थमथ विप्रवटोः	३१	२०
वसति यद्वदने तव	७३	१७
वस्त्राञ्चलस्य तव देवि	४६	१४
वहति गैरिकविभ्रममद्रिषु	१०	११
वाक्पाटवादधिगतं विदुषां	५४	१५
वागाधिपत्यमधिगच्छति	५८	६
वाग्गुम्फनेन जगतां	४	४
वाग्देवीकरुणाकटाक्ष	९५	३
वाग्देवते जहिहि सम्प्रति	२	१९
वाचा गद्गदरुद्धया सपुलकैः	२२	१३
वाचालयन् दश दिशो	१६	१८
वाचोयुक्त्या सदसि	६९	२८
वाताघातादिव किसलयं	८४	६
वात्या यथा शिवनितम्बिनि	३१	१९
वादे च चाटुवचने च	३	२९
वान्तान्नवद्विषयभोग	६०	१८
वाराणस्यां विहितवसतिः	८५	३१
विकचयन् सरसीरुहमण्डलं	१०	४
विकलं कलयन्ति मां	७०	३
विगलदश्रुपरिप्लुतलोचनाः	७५	२०
विजयते तरुणेन्दुशिखा	९७	१०
विजरीहरीति गगने	७२	२
वितथा तथागतमतप्रणालिका	८१	१५
वित्तं पित्तवदुज्झितं बुध	९८	१२
विद्यां न वादिशमनीं	५४	१४
विद्यामधीत्य सकलां	४७	२६
विद्यास्तवैव सकलाः	४७	३०
विधत्तां पद्माक्षी हरिचरण	१७	६
विधाय यस्याः सलिले विहारं	२७	२६
विधुरा सहकारमाधुरी	२	१५
विधुवियोगवशादिव दुःखिता	१०	५
विन्दते कुलवधूरिव	६२	५
विफलं त्वदुपासनं मया	७०	४
वियोगस्ते जातो विविध	४२	३४
विरहजनितां चक्राह्वानां	१२	१२
विलसति सति यस्मिन्	४८	४
विलीयते त्वज्जठरे	९१	२९
विशालाक्षी दुर्गे त्वमसि	१७	५
विषयप्रवणाय रोचते	४	३३
विषयोपभोगमृगतृष्णिका	८१	५
विष्णुरुद्रकमलासनादयो	६३	२१
विष्वक्प्रत्युप्तनानाविध	३७	३८
विस्मरैस्तव देवि	७२	३
विस्तरेण कृतिनः	६३	७
वृद्धोक्षमन्धकरिपुर्भवती	४७	२९
वैतालिका धृतसमुज्ज्वल	१५	६
वैदर्भरीतिघटितां स्तव	९८	१७
वैरस्यमेति जनको	५४	१७
व्यङ्ग्यार्थभङ्गिरुचिरः कवि	९	४३
व्यधित निखिलं शास्त्रं	१२	७
व्यवहारजातमिह विष्टपत्रये	८१	१४
व्याधः पुरो धृतशरः	५५	२६
व्यापारयन्ति बहु यद्	५९	१०
व्यासादयोऽपि कलयन्ति	६१	२६

(श)

शतवृश्चिकदंशवेदना	६२	१०
शब्दशास्त्रविषयः परिश्रमः	६२	६
शब्दास्त एव हि भवन्ति	५	८
शम्भुर्जिघत्सति हलाहल	४७	२८
शम्भोरम्भोजसाम्यं	३४	८
शरणागतवत्सला च नित्यं	८९	७
शरदभ्रविभ्रमधरा	८१	७
शर्मदं सपदि धर्मगामिनां	७३	१६
शशधरपयः कुम्भं धृत्वा	११	३
शशिना रहिता यथा निशा	२	१४
शान्तस्वान्ताः कृतवसतयः	६८	२०
शिक्षितुं गतिविलास	२८	७
शिथिलय निजां निद्रां प्राण	१२	१३
शिरोदेशे वज्रं निपततु	४२	३६
शिवं स्वभक्ताभयदानसक्तं	१	२
शिवनितम्बिनि भाति	२९	२२
शिवप्रिये सादरमेतदेव	२१	३
शिशुना मया विरचिते तव	४	३६
शुद्धाद्वैतं श्रुतिमनुसृतं	८५	२८
शुम्भादयो दितिसुतास्तव	५२	३
शुश्रूषया गुरुमुखादधिगत्य	३	२२
शुष्यत्कण्ठः करुणकरुणैः	५२	२०
शृङ्गारसारमधुरा प्रणयान्	७९	२९

शेते कल्पान्तकाले	३५	१८
शैलात्मजास्तुतिपराः कवि	९	४१
शैलात्मजे जगति हीनबलः	४६	२२
श्यामा रामा रमयतिलवं	८४	१०
श्रद्धाबद्धाञ्जलिरविरतं	८५	१९
श्रवणं प्रवणं कुरु	३१	२२
श्रवणमञ्जुलनादमनोरमः	११	१८
श्रवणान्तिकवासमादधाना	३०	६
श्रीकान्त ! स्वागतं ते	३६	२६
श्रीकार्तिकेय सुरकिन्नर	९०	२०
श्रीरेवतीरमणलाङ्गल	३२	२७
श्रीशैवागमतत्त्वबोध	९६	१२
श्रुतयोऽपि दिशन्ति	५१	११
श्रुतिवाक्यजातकथिता	८१	१७
श्रुतिस्त्वं मीमांसा त्वमसि	४१	२८
श्रुत्वा पुरा बटुमुखाद्	७९	२६
श्रुत्वा विदग्धवदनाद्	५२	२
श्रेणिं शोणाम्बुजानां	३७	३६
श्वेतच्छत्रं मदननृपतेः	८४	१७

(स)

संसारार्तिप्रशमनकरं	८६	४६
संसाराब्धौ विषयसलिले	२२	१०
संसेविता सुरवरा विधि	२४	३३
संस्थितां निजकरे सुधान्वितां	८९	१०
सकलभक्तमनोरथदायिनीं	७५	१३
सकृदपि भुवनेशीं सर्वं	३२	४
सङ्कोचमेति कमलं	९३	५
सङ्ख्यामूलप्रकृतिमतुलां	८६	३९
सञ्जीवन भव नवज्वर	७८	१७
सततगतिना शाखाजालं	१३	१८
स तव भक्तियुतः	७५	१६
सत्यं शपामि तव	५५	२८
सत्यां त्वयि त्रिभुवनेश्वरि	४९	१५
सदयं हृदयं गले सुनीलं	१	१
स दृक्पातात्सर्पं सपदि	४०	२०
सद्भक्तिसारभरिता	९६	११
सद्यो विधूय विपदः	७७	७
सन्ततं नदति यस्य	७३	२६
सन्दर्भशुद्धिमभिलष्यति	५	६
सन्दानितं दृढतरं चरणे	५९	१२
सन्नह्यमाना मुह्यन्ति	६५	१२
सप्तशृङ्गगता देवी	६५	८
स भाजनं देव समस्त	९१	३५
समराहतदैत्यपुङ्गवां	४४	१४
समरे महिषासुरस्य	३०	२
समायातो द्रष्टुं तव	४१	२४
समायान्तं दृष्ट्वा त्रिदश	४१	३१
समीहन्ते सेवां कतिचन	४०	२२
समुदेति यथा नभस्तले	८२	१
समुपविश्य सुखेन	७५	१९
समुपैति जरा निशाचरी	७१	१६
सम्पादिताऽपि कमला	६०	२०
सम्प्रवर्तयति नस्तव	६२	४
सम्प्रेषितं मदभरादसुर	७९	३०
सम्भाव्यते त्रिनयनस्य न	४५	१२
सरोजकिञ्जल्कपिशङ्गभासं	१	४
सर्वङ्कषं तिमिरभारमपास्य	१६	१९
सर्वतः प्रसृमरा धरातले	९२	४१
सर्वे गजाः सुरगजाः	७४	३०
सर्वे रसा दधति नीरसतां	९७	४
सव्यापसव्यनयनोत्पल	७६	१
सहस्रं पद्मानां झटिति	४०	१९
सहृदयं कवितेव	७४	५
सा काऽपि ह्लापितभवा	८	३५
साकं स्त्रीभिर्भजन्ते	६६	२०
साङ्ख्यं न सङ्ख्यानमुपैति	९७	८
साङ्ख्यं योगं सुगतसरणिं	८५	२९
साङ्गो वेदः कपिलरचितं	६८	१२
सानुप्रासप्रथितकरुणां	८६	४५
सायं प्रातर्हिमनगसुते	८४	२
सालङ्कारा गुणगणवती	६९	२७
साहित्यशास्त्रपरिशीलन	५	५
सिंहाचले मातृपुरे स्थिताया	२७	२३
सिद्धान्तं साङ्ख्यशास्त्रे	३३	४
सिन्दूरपुञ्जारुणमञ्जुभासं	९१	३४
सीमन्तदेशे परिकल्पितेयं	२९	२४
सुतं पांसुक्रीडामलिनम्	३९	१३
सुधासूतिर्दीपाज्ज्वलयति	४१	२६
सुप्तो नक्तं मृदुलशयने	६८	१८
सुरगणो विधिविष्णुपुरःसरः	१०	२
सुरनदीपुलिने सिकतामये	७५	१८
सुरभीकृतदिङ्मुखा यशोभिः	४८	५
सुरेन्द्रकोटीरशिखामणि	२५	३९

सुवर्णकर्णाभरणप्रदोऽपि	४८	७
सूत्रं दाक्षीतनयगदितं	८५	२५
सेवावृत्तिं तव विदधतां	६९	२६
सेवावृत्तिमुपाश्रितो भजति	४९	१३
सेवासन्नद्धदेवावलिमुकुट	३४	७
सोममौलिदयिते त्वया	३२	१
सौभ्रात्रमग्र परिदर्शय	९१	२५
स्तन्यं पिबन्तु कतिचित्	८०	३४
स्तम्बेरमास्य भ्रमणं	९१	२६
स्तवमञ्जूषिकामेतां	९७	१
स्तावं स्तावं कतिपयपण	१	१०
स्तेनाः षड्रिपवस्तुदन्ति	८८	६१
स्तोतुमद्रितनया प्रवर्तते	१	९
स्थविरनृपतिः पाश्चात्याद्रिं	१३	२२
स्थितं द्वारोपान्ते द्रविणम्	३८	६
स्नेहानुविद्धहृदया गुरवः	५३	१०
स्फुरद्वंशीनादैस्त्रिभुवन	३१	१७
स्मारं स्मारं तावकीनं पदाब्जं	२५	३८
स्रवदमन्दमरन्दसमन्वितैः	७५	१५
स्वकान्त्या यः प्रत्यादिशति	१७	१
स्वगृहमगमत्प्रातः सन्ध्याम्	१२	९
स्वगृहे विपिनेषु वा विदेशे	२२	६
स्वपँस्तिष्ठञ्जल्पन् पथिषु	४०	२१
स्वर्गभोगरसिका	६३	१०
स्वर्गान्निरस्ता महिषासुरेण	३१	१६
स्वर्गो माऽस्तु कुमारिल	९८	१५
स्वस्वशास्त्रविनिविष्ट	६३	१३
स्वादिष्टमैक्षवरसादपि	९	४६
स्वामिन्नतिक्रमितुमर्हसि	९१	२४
स्वेच्छावशेन विविधानि	२०	१७
स्वे स्वे मते प्रतिनिविष्ट	५४	१८
(ह)		
हंसायिता सत्कविमानसेषु	९	४०
हंसीव दुग्धोदकयोर्विवेकं	२७	३२
हट्टेषु रथ्यासु चतुष्पथेषु	९१	३३
हतधियः कवयन्तु	७५	२६
हरिस्त्वामाधत्ते हृदयकुहरे	४२	३७
हरिहयप्रमुखा हरिदीश्वरा	७४	८
हसन्तु निन्दन्तु जनाः	३४	३१
हस्ताग्रेणाभिमृष्टं तुहिन	३५	२२
हस्तेकरोति रजनीमुदयाद्रि	९२	३
हालाहलं लसति कण्ठ	४५	१०
हालाहलं वहति	६०	२३
हीनं बन्धुस्वजनगुरुभिः	८४	३
हृद्या शिवस्तुतिमयी भणितिः	८	३०
हेमन्तोऽपि क्षितिपरिसरं	८४	१४
हे लोका यदि बाधते	२२	११
हेषान्विताः खुरपुटैः क्षिति	१६	१५
हैमं तूणीरयुग्मं पुरहर	३४	१०
हैय्यङ्गवीनदधिदुग्धघटान्	१५	७
हैय्यङ्गवीनमृदुलं हृदयं	५३	६
हैय्यङ्गवीनमृदुलं हृदयं	८०	३५

2
JAC